निवृत्तगुणमार्गाय निष्किञ्चनधनाय ते ॥ ६८ ॥

नमः स्वात्माभिरामाय निर्गुणाय गुणात्मने ।
कालरूपिणमीशानमादिमध्यान्तवर्जितम् ॥ ६९ ॥

समं चरन्तं सर्वत्र मन्ये त्वां पुरुषं परम् ।
देव ते चेष्टितं कश्चिन्न वेद नृविडम्बनम् ॥ ७० ॥

न तेऽस्ति कश्चिद्हयितो द्वेष्यो वापर एव च ।
त्वन्मायापिहितात्मानस्त्वां पश्यन्ति तथाविधम् ॥ ७१ ॥

अजस्याकर्तुरीशस्य देवतिर्यङ्नरादिषु ।
जन्मकर्मादिकं यद्यत्तदत्यन्तविडम्बनम् ॥ ७२ ॥

त्वामाहुरक्षरं जातं कथाश्रवणसिद्धये ।
केचित्कोसलराजस्य तपसः फलसिद्धये ॥ ७३ ॥

कौसल्यया प्रार्थ्यमानं जातमाहुः परे जनाः ।
दुष्टराक्षसभूभारहरणायार्थितो विभुः ॥ ७४ ॥

ब्रह्मणा नररूपेण जातोऽयमिति केचन ।
शृण्वन्ति गायन्ति च ये कथास्ते रघुनन्दन ॥ ७५ ॥

पश्यन्ति तव पादाब्जं भवार्णवसुतारणम् ।
त्वन्मायागुणबद्धाहं व्यतिरिक्तं गुणाश्रयम् ॥ ७६ ॥

कथं त्वां देव जानीयां स्तोतुं वाविषयं विभुम् ।
नमस्यामि रघुश्रेष्ठं बाणासनशरान्वितम् ।
लक्ष्मणेन सह भ्रात्रा सुग्रीवादिभिरन्वितम् ॥ ७७ ॥

एवं स्तुतो रघुश्रेष्ठः प्रसन्नः प्रणताघहृत् ।
उवाच योगिनीं भक्तां किं ते मनसि काङ्क्षितम् ॥ ७८ ॥

जो गुण-मार्गापासून निवृत्त झाला आहे, जो सर्वसंगपरित्यागी माणसाचे सर्वस्व असतो, जो स्वतःच्या स्वरूपातच रममाण झालेला असतो आणि जो निर्गुण असूनही सगुण असतो, अशा तुम्हाला माझा नमस्कार असो. जो कालस्वरूप आहे, जो सर्वांचा नियंता आहे, जो आदी, मध्य व अंत यांनी रहित आहे, जो सर्व ठिकाणी समभावाने व्यापून असतो, असे तुम्ही परम पुरुष आहात, असे मी मानते. हे देवा, मनुष्य- रूपात आल्यावर तुम्ही ज्या ज्या लीला करता त्या त्या कोणालाही कळत नाहीत. (६८-७०)

तुम्हाला कोणीही प्रिय नाही, शत्रू नाही, तसेच त्यापेक्षा वेगळा उदासीन नाही. तथापि तुमच्या मायेने ज्यांचे अंतःकरण झाकले गेले आहे, असे लोक तुम्हांला आपल्या भावनेप्रमाणे मानतात. (७१)

तुम्ही जन्मरहित, अकर्ता आणि ईश्वर आहात. देव, तिर्यक् प्राणी आणि मानव इत्यादी योनींमध्ये तुम्ही जे जन्म घेता आणि कर्म इत्यादी करता, ते सर्व त्या योनींचे अनुकरण असते, ती सर्व तुमची महान लीला होय. (७२)

असे म्हणतात की तुम्ही अविनाशी असूनही भक्तांना तुमच्या कथा ऐकण्यास मिळाव्यात, म्हणून तुम्ही अवतार घेता. तर काही जण असे म्हणतात की कोसल देशाच्या राजा दशरथांना त्यांच्या तपश्चर्येचे फळ देण्यासाठी तुम्ही अवतार घेतला आहे. (७३)

इतर लोक असे म्हणतात की कौसल्येने प्रार्थना केल्यावरून तुम्ही जन्म घेतला आहे. तर काही जण असे म्हणतात की दुष्ट राक्षसांचा भूमीला झालेला भार हरण करण्यासाठी ब्रह्मदेवांनी प्रार्थना केल्यामुळे विभू असलेले तुम्ही नररूपाने जन्माला आला आहात. हे रघुनंदना, जे लोक तुमच्या कथा गातात व ऐकतात ते तुमचे पदकमल हे संसार सागर तरून जाण्यास उत्तम नौका आहे, असे मानतात. हे देवा, तुमच्या मायेच्या गुणांनी मी बद्ध आहे; म्हणून गुणांपेक्षा वेगळ्या आणि गुणांचा आश्रय असणाऱ्या तुम्हांला मी कशी बरे जाणू शकेन ? तसेच वाणीचा विषय नसणाऱ्या आणि व्यापक असणाऱ्या तुमची स्तुती करण्यास मी कशी बरे समर्थ होईन ? म्हणून तुमचा भाऊ लक्ष्मण आणि सुग्रीव इत्यादींसह असणाऱ्या, धनुष्य व बाण धारण करणाऱ्या अशा तुम्हा रघुश्रेष्ठांना- मी नमस्कार करते . (७४-७७)

अशा प्रकारे स्वयंप्रभेकडून स्तुती केली गेली, तेव्हा शरणगतांची पापे हरण करणारे ते रघुश्रेष्ठ प्रसन्न झाले आणि आपली भक्त असणाऱ्या त्या योगिनीला ते म्हणाले, "तुझ्या मनात काय इच्छा आहे ?" (७८)

सा प्राह राघवं भक्त्या भक्तिं ते भक्तवत्सल ।
यत्र कुत्रापि जाताया निश्चलां देहि मे प्रभो ॥ ७९ ॥

त्वद्भक्तेषु सदा सङ्गो भूयान्मे प्राकृतेषु न ।
जिह्वा मे रामरामेति भक्त्या वदतु सर्वदा ॥ ८० ॥

मानसं श्यामलं रूपं सीतालक्ष्मणसंयुतम् ।
धनुर्बाणधरं पीतवाससं मुकुटोज्ज्वलम् ॥ ८१ ॥

अङ्गदैर्नूपुरैर्मुक्ताहारैः कौस्तुभकुण्डलैः ।
भान्तं स्मरतु मे राम वरं नान्यं वृणे प्रभो ॥ ८२ ॥

श्रीराम उवाच

भवत्वेवं महाभागे गच्छ त्वं बदरीवनम् ।
तत्रैव मां स्मरन्ती त्वं त्यक्त्वेदं भूतपञ्चकम् ।
मामेव परमात्मानमचिरात्प्रतिपद्यसे ॥ ८३ ॥

श्रुत्वा रघूत्तमवचोऽमृतसारकल्पं
गत्वा तदैव बदरीतरुषण्डजुष्टम् ।
तीर्थं तदा रघुपतिं मनसा स्मरन्ती
त्यक्त्वा कलेवरमवाप परं पदं सा ॥ ८४ ॥

भक्तिपूर्वक ती राघवांना म्हणाली, "हे भक्तवत्सल प्रभो, जेथे कोठे मी जन्माला येईन, त्या जन्मी तुम्ही मला तुमची निश्चल भक्ती द्या. (७९)

तसेच जन्मोजन्मी तुमच्या भक्तांशी माझी सदा संगती होवो, सामान्य संसारी माणसाशी नको. आणि माझी जिव्हा नेहमी भक्तीने 'राम राम' असा तुमच्या नावाचा उच्चार करो. (८०)

आणि हे प्रभू रामा, माझे मन सदा तुमच्या रूपाचे स्मरण करो. तुमचे रूप सीता आणि लक्ष्मण यांच्यासह असणारे, श्यामवर्ण, धनुष्य- बाण धारण करणारे, पीतांबर परिधान करणारे, मुकुटाने विभूषित, तसेच बाहुभूषणे, नूपुर, मोत्याचे हार, कौस्तुभ मणी आणि कुंडले यांनी शोभायमान आहे. याखेरीज मी अन्य कोणताही वर मागत नाही." (८१-८२)

श्रीराम म्हणाले– "हे महाभागे, असेच होईल. आता तू बदरिकाश्रमात जा. तेथेच तू माझे स्मरण करीत असताना हे तुझे पांचभौतिक शरीर टाकून देऊन तू लौकरच मज परमात्म्यालाच प्राप्त करून घेशील." (८३)

अमृताच्या साराप्रमाणे असणारे ते रघूतमांचे वचन ऐकल्यावर, स्वयंप्रभा त्याच वेळी बदरी वृक्षांच्या समूहांनी युक्त असणाऱ्या बदरिकाश्रमात गेली, आणि तेथे मनाने ती रघुपतींचे स्मरण करू लागली, आणि शेवटी स्वत:चे शरीर टाकून देऊन तिने परम पद प्राप्त करून घेतले. (८४)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तम सर्ग

वानरांचे प्रायोपवेशन आणि संपातीची भेट

श्रीमहादेव उवाच

अथ तत्र समासीना वृक्षषण्डेषु वानराः ।
चिन्तयन्तो विमुह्यन्तः सीतामार्गणकर्शिताः ॥ १ ॥

तत्रोवाचाङ्गदः कांश्चिद्वानरान् वानरर्षभः ।
भ्रमतां गह्वरेऽस्माकं मासो नूनं गतोऽभवत् ॥ २ ॥

श्रीमहादेव म्हणाले – हे पार्वती, नंतर त्या वनात सीतेचा शोध करताना थकून गेलेले वानर सीतेचा शोध न लागल्याने दु:खी झाले. तेव्हा झाडांवर बसून ते विचार करू लागले. (१)

त्या वेळी वानरश्रेष्ठ अंगद काही वानरांना म्हणाला, "सीतेच्या शोधासाठी आपण गिरि-कंदरांमध्ये फिरत असताना नक्कीच एक महिना होऊन गेला असणार. (२)

सीता नाधिगतास्माभिर्न कृतं राजशासनम् ।
यदि गच्छाम किष्किन्धां सुग्रीवोऽस्मान् हनिष्यति ॥३॥

विशेषतः शत्रुसुतं मां मिषान्निहनिष्यति ।
मयि तस्य कुतः प्रीतिरहं रामेण रक्षितः ॥४॥

इदानीं रामकार्यं मे न कृतं तन्मिषं भवेत् ।
तस्य मद्धनने नूनं सुग्रीवस्य दुरात्मनः ॥५॥

मातृकल्पां भ्रातृभार्यां पापात्मानुभवत्यसौ ।
न गच्छेयमतः पार्श्वं तस्य वानरपुङ्गवाः ॥६॥

त्यक्ष्यामि जीवितं चात्र येन केनापि मृत्युना ।
इत्यश्रुनयनं केचिद्दृष्ट्वा वानरपुङ्गवाः ॥७॥

व्यथिताः साश्रुनयना युवराजमथाब्रुवन् ॥८॥

किमर्थं तव शोकोऽत्र वयं ते प्राणरक्षकाः ।
भवामो निवसामोऽत्र गुहायां भयवर्जिताः ॥९॥

सर्वसौभाग्यसहितं पुरं देवपुरोपमम् ।
शनैः परस्परं वाक्यं वदतां मारुतात्मजः ॥१०॥

श्रुत्वाङ्गदं समालिङ्ग्य प्रोवाच नयकोविदः ।
विचार्यते किमर्थं ते दुर्विचारो न युज्यते ॥११॥

राज्ञोऽत्यन्तप्रियस्त्वं हि तारापुत्रोऽतिवल्लभः ।
रामस्य लक्ष्मणात्प्रीतिस्त्वयि नित्यं प्रवर्धते ॥१२॥

अतो न राघवाद्भीतिस्तव राज्ञो विशेषतः ।
अहं तव हिते सक्तो वत्स नान्यं विचारय ॥१३॥

गुहावासश्च निर्भेद्य इत्युक्तं वानरैस्तु यत् ।
तदेतद्रामबाणानामभेद्यं किं जगत्त्रये ॥१४॥

आपल्याला सीता सापडली नाही. साहजिकच राजाची आज्ञा आपल्याकडून पाळली गेली नाही. तेव्हा आता जर आपण किष्किंधा नगरीत परत गेलो तर सुग्रीव आपणास नक्कीच ठार करील. (३)

विशेषतः त्याच्या वाली या शत्रूचा पुत्र असणाऱ्या मला तो या निमित्ताने निश्चितच ठार करील. माझ्याबद्दल त्याला प्रेम का बरे वाटावे ? माझे रक्षण तर श्रीरामांनीच केलेले आहे. (४)

आता श्रीरामांचे कार्य मी केले नाही. तेव्हा मला ठार करण्यास त्या दुरात्म्या सुग्रीवाला खरोखर हे आयते निमित्त मिळेल. (५)

तो पापी मनाचा सुग्रीव हा आईप्रमाणे असणाऱ्या आपल्या भावाच्या भार्येचा उपभोग घेत आहे. म्हणून हे वानरश्रेष्ठांनो, मी आता त्याच्याजवळ जाणार नाही. (६)

तेव्हा येथेच कशाही रीतीने मृत्यू ओढवून घेऊन मी माझ्या जीविताचा त्याग करीन." त्याच्या डोळ्यांत अश्रू आले . अंगदाला पाहून, काही श्रेष्ठ वानर व्यथित झाले, त्यांच्याही डोळ्यांत अश्रू आले आणि मग ते युवराज अंगदाला म्हणाले, (७-८)

"तू येथे का बरे शोक करीत आहेस ? आम्ही सर्व जण तुझ्या प्राणांचे रक्षण करू. आपण सारेच येथे गुहेत निर्भयपणे राहू या. (९)

या गुहेत जे नगर आहे ते सर्व भोगसामग्रीनी भरलेले असून ते देवांच्या अमरावती नगरीप्रमाणे आहे." परस्परांशी हळूहळू बोलणाऱ्या त्या वानरांचे हे वचन नीती जाणणाऱ्या हनुमानाने ऐकले. तेव्हा अंगदाला दृढ आलिंगन देऊन त्याने म्हटले, "तू असा विचार का करीत आहेस बरे? वाईट विचार करणे हे तुला शोभत नाही. (१०-११)

कारण तू तारेचा अतिशय लाडका पुत्र आहेस आणि म्हणून तू राजा सुग्रीवालासुद्धा अतिशय प्रिय आहेस. आणि श्रीरामांची तुझ्यावरील प्रीती ही त्यांच्या लक्ष्मणावरील प्रेमापेक्षाही अधिक असून ती वाढत आहे. (१२)

म्हणून तुला श्रीराघवांकडून भीती नाही. आणि विशेषतः राजा सुग्रीवाकडून तुला मुळीच भीती नाही. तसेच, बाळा अंगदा, मी तुझे हित करण्यात सतत तत्पर आहे. म्हणून तू अन्य कशाचाही विचार करू नकोस. (१३)

तसेच येथे राहणे, ही गुहा अभेद्य असल्याने निर्भय आहे, असे जे काही वानर म्हणतात ते योग्य नाही. कारण या तिन्ही जगात असे काय आहे की जे श्रीरामांच्या बाणांना अभेद्य आहे? (१४)

ये त्वां दुर्बोधयन्त्येते वानरा वानरर्षभ ।
पुत्रदारादिकं त्यक्त्वा कथं स्थास्यन्ति ते त्वया ॥ १५ ॥

अन्यद्गुह्यतमं वक्ष्ये रहस्यं शृणु मे सुत ।
रामो न मानुषो देवः साक्षान्नारायणोऽव्ययः ॥ १६ ॥

सीता भगवती माया जनसम्मोहकारिणी ।
लक्ष्मणो भुवनाधारः साक्षाच्छेषः फणीश्वरः ॥ १७ ॥

ब्रह्मणा प्रार्थिताः सर्वे रक्षोगणविनाशने ।
मायामानुषभावेन जाता लोकैकरक्षकाः ॥ १८ ॥

वयं च पार्षदाः सर्वे विष्णोर्वैकुण्ठवासिनः ।
मनुष्यभावमापन्ने स्वेच्छया परमात्मनि ॥ १९ ॥

वयं वानररूपेण जातास्तस्यैव मायया ।
वयं तु तपसा पूर्वमाराध्य जगतां पतिम् ॥ २० ॥

तेनैवानुगृहीताः स्मः पार्षदत्वमुपागताः ।
इदानीमपि तस्यैव सेवां कृत्वैव मायया ॥ २१ ॥

पुनर्वैकुण्ठमासाद्य सुखं स्थास्यामहे वयम् ।
इत्यङ्गदमथाश्वास्य गता विन्ध्यं महाचलम् ॥ २२ ॥

विचिन्वन्तोऽथ शनकैर्जानकीं दक्षिणाम्बुधेः ।
तीरे महेन्द्राख्यगिरेः पवित्रं पादमाययुः ॥ २३ ॥

दृष्ट्वा समुद्रं दुष्पारमगाधं भयवर्धनम् ।
वानरा भयसन्त्रस्ताः किं कुर्म इति वादिनः ॥ २४ ॥

निषेदुरुदधेस्तीरे सर्वे चिन्तासमन्विताः ।
मन्त्रयामासुरन्योन्यमङ्गदाद्या महाबलाः ॥ २५ ॥

भ्रमतो मे वने मासो गतोऽत्रैव गुहान्तरे ।
न दृष्टो रावणो वाद्य सीता वा जनकात्मजा ॥ २६ ॥

आणखी असे की हे वानर श्रेष्ठा, हे जे वानर तुला चुकीचा सल्ला देत आहेत ते वानर स्वतःचे पुत्र, पत्नी इत्यादींचा त्याग करून, तुझ्याबरोबर कसे बरे राहतील ? (१५)

बाळा, आणखी अत्यंत गुप्त असे एक रहस्य मी तुला सांगतो. ते तू ऐक. राम हे सामान्य मनुष्य नाहीत. तर ते साक्षात अविनाशी असे परमेश्वर नारायण आहेत. (१६)

सीता ही सर्व लोकांना मोहित करणारी भगवती माया आहे आणि लक्ष्मण म्हणजे सर्व जगाला आधार देणारा साक्षात नागराज शेष आहे. (१७)

ब्रह्मदेवाने प्रार्थना केल्यामुळे हे सर्व राक्षस-समुदायांचा नाश करण्यासाठी माया-मनुष्य रूपाने जन्माला आले आहेत. त्यांतील प्रत्येक जण तिन्ही लोकांचे रक्षण करण्यास समर्थ आहे. (१८)

वैकुंठात वास करणाऱ्या विष्णूचे आपण सर्व वानरगण पार्षद आहोत. परमात्मा हा स्वतःच्या इच्छेने मानवी रूपात आला आहे, तेव्हा त्याच्याच मायेने आपण सर्व जण वानर रूपाने जन्माला आलो आहोत. पूर्वी आपण जगांच्या स्वामीची तपस्येद्वारे आराधना केली होती; तेव्हा त्यानेच आपणांवर अनुग्रह केल्याने आपण त्याचे पार्षद झालेलो आहोत. तेव्हा आत्तासुद्धा मायेच्या प्रेरणेनुसार त्या विष्णूंचीच सेवा करूनच शेवटी आपण वैकुंठात जाऊन सुखाने राहाणार आहोत." अशा प्रकारे अंगदाचे सांत्वन करून, ते सर्व वानर विंध्य नावाच्या महापर्वतावर गेले. (१९-२२)

त्यानंतर सावकाशपणे जानकीचा शोध घेत ते वानर दक्षिण समुद्राच्या तीरावरील महेंद्र नावाच्या पर्वताच्या पवित्र पायथ्याशी येऊन पोचले. (२३)

तेथे पार करण्यास कठीण, अथांग आणि भीतिदायक समुद्र पाहून, ते सर्व वानर भयाने त्रस्त झाले. 'आता आपण काय करायचे ?' असे परस्परांशी बोलत, ते सर्व जण चिंताग्रस्त होऊन समुद्राच्या किनाऱ्यावर बसून राहिले. मग अंगद इत्यादी महाबलवान वानर परस्परांशी विचार विनिमय करू लागले- "अहो, सीतेच्या शोधासाठी वनात हिंडता हिंडता त्या गुहेतच एक महिना निघून गेला आहे. आजपर्यंत आपणास रावणही दिसला नाही आणि जनककन्या सीतासुद्धा आपणास दिसली नाही. (२४-२६)

सुग्रीवस्तीक्ष्णदण्डोऽस्मान्निहन्त्येव न संशयः ।
सुग्रीववधतोऽस्माकं श्रेयः प्रायोपवेशनम् ॥ २७ ॥

इति निश्चित्य तत्रैव दर्भानास्तीर्य सर्वतः ।
उपाविवेशुस्ते सर्वे मरणे कृतनिश्चयाः ॥ २८ ॥

एतस्मिन्नन्तरे तत्र महेन्द्राद्रिगुहान्तरात् ।
निर्गत्य शनकैरागाद्गृध्रः पर्वतसन्निभः ॥ २९ ॥

दृष्ट्वा प्रायोपवेशेन स्थितान्वानरपुङ्गवान् ।
उवाच शनकैर्गृध्रः प्राप्तो भक्ष्योऽद्य मे बहुः ॥ ३० ॥

एकैकशः क्रमात्सर्वान् भक्षयामि दिने दिने ।
श्रुत्वा तद्गृध्रवचनं वानरा भीतमानसाः ॥ ३१ ॥

भक्षयिष्यति नः सर्वानसौ गृध्रो न संशयः ।
रामकार्यं च नास्माभिः कृतं किञ्चिद्धरीश्वराः ॥ ३२ ॥

सुग्रीवस्यापि च हितं न कृतं स्वात्मनामपि ।
वृथानेन वधं प्राप्ता गच्छामो यमसादनम् ॥ ३३ ॥

अहो जटायुर्धर्मात्मा रामस्यार्थे मृतः सुधीः ।
मोक्षं प्राप दुरावापं योगिनामप्यरिन्दमः ॥ ३४ ॥

सम्पातिस्तु तदा वाक्यं श्रुत्वा वानरभाषितम् ।
के वा यूयं मम भ्रातुः कर्णपीयूषसन्निभम् ॥ ३५ ॥

जटायुरिति नामाद्य व्याहरन्तः परस्परम् ।
उच्यतां वो भयं मा भून्मत्तः प्लवगसत्तमाः ॥ ३६ ॥

श्रुत्वाचाङ्गदः श्रीमानुत्थितो गृध्रसन्निधौ ।
राजा दाशरथिः श्रीमान् लक्ष्मणेन समन्वितः ॥ ३७ ॥

जनक्या भार्यया सार्धं विचचार महावने ।
तस्य सीता हृता साध्वी रावणेन दुरात्मना ॥ ३८ ॥

सुग्रीव हा भयंकर शिक्षा देणारा आहे. तो आपणास ठार करेल, यात संदेह नाही. तेव्हा सुग्रीवाकडून वध करून घेण्यापेक्षा आपण प्रायोपवेशन करून मरून जाणे हे अधिक श्रेयस्कर आहे." (२७)

अशा प्रकारे प्रायोपवेशन करण्याचा निश्चय करून, सगळीकडे दर्भ पसरून, मरून जाण्याचा निश्चय करून ते सर्व वानर तेथे बसून राहिले. (२८)

दरम्यानच्या काळात, महेंद्र पर्वताच्या एका गुहेतून बाहेर पडून एक पर्वतप्राय शरीराचे गिधाड हळूहळू तेथे आले. (२९)

श्रेष्ठ वानर प्रायोपवेशनास बसले आहेत हे पाहून ते गिधाड हळू आवाजात म्हणू लागले, "आज मला पुष्कळ भक्ष्य प्राप्त झाले आहे. (३०)

आता रोज या सर्वांना एकेक करून मी खाईन."ते गिधाडाचे वचन ऐकल्यावर त्या वानरांची मने भीतीने ग्रस्त झाली. (३१)

ते वानर आपापसात बोलू लागले- "हे गिधाड आम्हा सर्वांना खाऊन टाकील यात संशय नाही. हे वानर प्रमुखांनो, आपण श्रीरामांचे कोणतेही कार्य केले नाही. तसेच सुग्रीवाचेही काही कार्य आपण केले नाही आणि आपलेही हित आपण साधले नाही. आता मात्र या गिधाडाकडून फुकटच आपण मारले जाऊ आणि यमसदनास जाऊ . (३२-३३)

अहो, तो जटायू किती बुद्धिमान् आणि धर्मात्मा होता ! तो श्रीरामांच्या कार्यासाठी मरण पावला. आणि योगिजनांनासुद्धा मिळण्यासाठी कठीण असा मोक्ष त्या शत्रूचे दमन करणाऱ्या जटायूला मिळाला." (३४)

त्या वेळी वानरांनी उच्चारलेली ती वाक्ये ऐकून संपाती म्हणाला, "हे वानरश्रेष्ठांनो, माझ्या कानांना अमृताप्रमाणे वाटणारे, माझ्या भावाचे जटायू हे नाव आत्ता परस्परांशी बोलताना उच्चारणारे तुम्ही कोण आहात ? माझ्यापासून कोणतेही भय न बाळगता तुम्ही हकीगत सांगा." (३५-३६)

तेव्हा श्रीमान् अंगद उठला आणि त्या गिधाडाजवळ जाऊन म्हणाला "राजा दशरथांचे पुत्र श्रीमान श्रीराम हे लक्ष्मणासह आणि सीता या पत्नीसह घोर वनामध्ये फिरत होते. त्या वेळी त्यांची साध्वी सीता ही दुरात्म्या रावणाने हरण करून नेली. (३७-३८)

मृगयां निर्गते रामे लक्ष्मणे च हृता बलात् ।
रामरामेति क्रोशन्ती श्रुत्वा गृध्रः प्रतापवान् ॥ ३९ ॥

जटायुर्नाम पक्षीन्द्रो युद्धं कृत्वा सुदारुणम् ।
रावणेन हतो वीरो राघवार्थं महाबलः ॥ ४० ॥

रामेण दग्धो रामस्य सायुज्यमगमत्क्षणात् ।
रामः सुग्रीवमासाद्य सख्यं कृत्वाग्निसाक्षिकम् ॥ ४१ ॥

सुग्रीवचोदितो हत्वा वालिनं सुदुरासदम् ।
राज्यं ददौ वानराणां सुग्रीवाय महाबलः ॥ ४२ ॥

सुग्रीवः प्रेषयामास सीतायाः परिमार्गणे ।
अस्मान्वानरवृन्दान्वै महासत्त्वान्महाबलः ॥ ४३ ॥

मासादर्वाङ्निवर्तध्वं नोचेत्प्राणान्हरामि वः ।
इत्याज्ञया भ्रमन्तोऽस्मिन्वने गह्वरमध्यगाः ॥ ४४ ॥

गतो मासो न जानीमः सीतां वा रावणं च वा ।
मर्तुं प्रायोपविष्टाः स्मस्तीरे लवणवारिधेः ॥ ४५ ॥

यदि जानासि हे पक्षिन्सीतां कथय नः शुभाम् ।
अङ्गदस्य वचः श्रुत्वा सम्पातिर्हृष्टमानसः ॥ ४६ ॥

उवाच मत्प्रियो भ्राता जटायुः प्लवगेश्वराः ।
बहुवर्षसहस्रान्ते भ्रातृवार्ता श्रुता मया ॥ ४७ ॥

वाक्साहाय्यं करिष्येऽहं भवतां प्लवगेश्वराः ।
भ्रातुः सलिलदानाय नयध्वं मां जलान्तिकम् ॥ ४८ ॥

पश्चात्सर्वं शुभं वक्ष्ये भवतां कार्यसिद्धये ।
तथेति निन्युस्ते तीरं समुद्रस्य विहङ्गमम् ॥ ४९ ॥

सोऽपि तत्सलिले स्नात्वा भ्रातुर्दत्त्वा जलाञ्जलिम् ।
पुनः स्वस्थानमासाद्य स्थितो नीतो हरीश्वरैः ।
सम्पातिः कथयामास वानरान्परिहर्षयन् ॥ ५० ॥

राम आणि लक्ष्मण हे दोघेही मृगयेसाठी गेले असताना बळजबरीने रावणाने तिला पळविले. तेव्हा ती 'हे रामा, हे रामा,' असा आक्रोश करीत होती. तिचा आक्रोश ऐकून, प्रतापी पक्षिराज अशा जटायू नावाच्या गिधाडाने श्रीरामांसाठी रावणाबरोबर फार घनघोर युद्ध केले. परंतु तो महाबलवान वीर रावणाकडून मारला गेला. (३९-४०)

नंतर स्वतः श्रीरामांनी त्याचा दहन-संस्कार केला. तो तत्काळ श्रीरामांमध्ये लीन झाला. त्याने सायुज्य मुक्ती मिळविली. त्यानंतर श्रीराम सुग्रीवाजवळ आले आणि त्यांनी अग्नीला साक्षी ठेवून सुग्रीवाशी मैत्री केली. (४१)

पुढे सुग्रीवाच्या प्रेरणेने महाबळी श्रीरामांनी जिंकण्यास अत्यंत कठीण असणाऱ्या वालीला ठार करून सुग्रीवाला वानरांचे राज्य दिले. (४२)

नंतर महाबलवान् सुग्रीवाने सीतेचा शोध करण्यासाठी आम्हा महापराक्रमी वानरांच्या समूहांना पाठविले आहे. (४३)

सुग्रीवाने आम्हांला सांगितले की 'एक महिन्याच्या आत तुम्ही सर्व परत या. तसे न घडल्यास मी तुमचे प्राण हरण करीन.' सुग्रीवाच्या अशा आज्ञेने आम्ही वनात हिंडत असता एका गुहेत गेलो. (४४)

एक महिना निघून गेला आणि आम्हांला सीतेचा किंवा रावणाचा काहीच पत्ता लागलेला नाही. म्हणून या खाऱ्या समुद्राच्या तीरावर आम्ही प्रायोपवेशन करून मरून जाण्यास बसलो आहोत. (४५)

हे गृध्रपक्ष्या, सुलक्षणी सीतेबद्दल तुला काही माहिती असल्यास ती तू आम्हांला सांग." अंगदाचे वचन ऐकून संपातीचे मन संतुष्ट झाले. (४६)

तो म्हणाला "हे वानरश्रेष्ठांनो, जटायू हा माझा फार लाडका भाऊ होता. हजारो वर्षांनी मला आज भावाची वार्ता ऐकावयास मिळाली आहे. (४७)

हे वानरश्रेष्ठ हो, मी तुम्हांला माहिती देऊन तोंडी साहाय्य करीन. पण तत्पूर्वी आधी माझ्या बंधूला जलांजली देण्यासाठी मला तुम्ही पाण्याजवळ न्या. (४८)

त्यानंतर तुमच्या कार्यसिद्धीसाठी जे कल्याणकारक असेल ते सर्व मी तुम्हांला सांगेन." "ठीक आहे" असे म्हणून त्या वानरांनी संपाती पक्ष्याला समुद्राच्या तीरावर नेले. (४९)

तेथे त्याने समुद्राच्या पाण्यात स्नान केले व मग भावाला जलांजली दिली. त्यानंतर श्रेष्ठ वानरांनी त्याला पुनः त्याच्या पूर्वीच्या स्थानी नेले. तेथे तो व्यवस्थित बसला आणि वानरांना आनंदित करीत सांगू लागला. (५०)

लङ्का नाम नगर्यास्ते त्रिकूटगिरिमूर्धनि ।
तत्राशोकवने सीता राक्षसीभिः सुरक्षिता ॥ ५१ ॥

समुद्रमध्ये सा लङ्का शतयोजनदूरतः ।
दृश्यते मे न सन्देहः सीता च परिदृश्यते ॥ ५२ ॥

गृध्रत्वाद्दूरदृष्टिर्मे नात्र संशयितुं क्षमम् ।
शतयोजनविस्तीर्णं समुद्रं यस्तु लङ्घयेत् ॥ ५३ ॥

स एव जानकीं दृष्ट्वा पुनरायास्यति ध्रुवम् ।
अहमेव दुरात्मानं रावणं हन्तुमुत्सहे ।
भ्रातुर्हन्तारमेकाकी किन्तु पक्षविवर्जितः ॥ ५४ ॥

यतध्वमतियत्नेन लङ्घितुं सरितां पतिम् ।
ततो हन्ता रघुश्रेष्ठो रावणं राक्षसाधिपम् ॥ ५५ ॥

उल्लङ्घ्य सिन्धुं शतयोजनायतं
लङ्कां प्रविश्याथ विदेहकन्यकाम् ।
दृष्ट्वा समाभाष्य च वारिधिं पुन-
स्तर्तुं समर्थः कतमो विचार्यताम् ॥ ५६ ॥

"त्रिकूट नावाच्या पर्वताच्या माथ्यावर लंका नावाची नगरी आहे. तेथे राक्षसिणीच्या पहाऱ्यात सीता अशोक वनात राहात आहे. (५१)

येथून शंभर योजने अंतरावर समुद्रामध्ये ती लंका आहे. तरी ती सीता मला येथून दिसत आहे, तुम्ही यात शंका बाळगू नका. (५२)

मी गिधाड असल्याने मला दूरवरचे दिसणारी दृष्टी आहे. म्हणून या बाबतीत शंका घेणे योग्य नाही. तुमच्यापैकी जो कुणी शत योजने विस्तीर्ण असा हा समुद्र ओलांडून जाईल, तोच निश्चितपणे जानकीची भेट घेऊन पुनः परत येईल. माझ्या भावाचा वध करणाऱ्या त्या दुरात्म्या रावणाला मी एकट्यानेच ठार करण्यास उत्सुक आहे. परंतु काय करू ? मला पंख नाहीत. (५३-५४)

हे वानरांनो, तुम्ही अतिशय प्रयत्नपूर्वक समुद्र ओलांडण्याचा प्रयत्न करा. तेव्हा रघुश्रेष्ठ राम राक्षसराज रावणाला ठार करू शकतील. (५५)

शंभर योजने विस्तार असणाऱ्या समुद्राचे उल्लंघन करून, लंकेत प्रवेश करायचा आणि विदेह राजकन्या सीतेला भेटून व तिच्याशी बोलून, नंतर पुनः समुद्र ओलांडून परत येण्यास तुमच्यापैकी कोण समर्थ आहे, याचा तुम्ही विचार करा." (५६)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टम सर्ग

संपातीची आत्मकथा

श्रीमहादेव उवाच

अथ ते कौतुकाविष्टाः सम्पातिं सर्ववानराः ।
पप्रच्छुर्भगवन् ब्रूहि स्वमुदन्तं त्वमादितः ॥ १ ॥

सम्पातिः कथयामास स्ववृत्तान्तं पुरा कृतम् ।
अहं पुरा जटायुश्च भ्रातरौ रूढयौवनौ ॥ २ ॥

बलेन दर्पितावावां बलजिज्ञासया खगौ ।
सूर्यमण्डलपर्यन्तं गन्तुमुत्पतितौ मदात् ॥ ३ ॥

श्रीमहादेव म्हणाले – हे पार्वती, (संपातीचे बोलणे ऐकल्यावर) त्या सर्व वानरांना मोठे कुतूहल वाटले आणि ते संपातीला म्हणाले, "हे भगवन, तू पहिल्यापासून तुझा स्वतःचा सर्व वृत्तांत सांग." (१)

तेव्हा पूर्वी आपण काय केले होते इत्यादी स्वतःचा वृत्तांत संपाती सांगू लागला. "पूर्वीच्या काळी मी आणि जटायू हे आम्ही दोघे भाऊ भर तारुण्यात आलो असताना, स्वतःच्या सामर्थ्यामुळे उन्मत्त झालो होतो. नंतर आपले सामर्थ्य किती आहे हे जाणून घेण्याच्या इच्छेने आम्ही गर्वाने आकाशातून उडत सूर्यबिंबापर्यंत जाण्यासाठी उड्डाण केले. (२-३)

बहुयोजनसाहस्रं गतौ तत्र प्रतापितः ।
जटायुस्तं परित्रातुं पक्षैराच्छाद्य मोहतः ॥ ४ ॥

स्थितोऽहं रश्मिभिर्दग्धपक्षोऽस्मिन्विन्ध्यमूर्धनि ।
पतितो दूरपतनान्मूर्च्छितोऽहं कपीश्वराः ॥ ५ ॥

दिनत्रयात्पुनः प्राणसहितो दग्धपक्षकः ।
देशं वा गिरिकूटान्वा न जाने भ्रान्तमानसः ॥ ६ ॥

शनैरुन्मील्य नयने दृष्ट्वा तत्राश्रमं शुभम् ।
शनैः शनैराश्रमस्य समीपं गतवानहम् ॥ ७ ॥

चन्द्रमा नाम मुनिराड् दृष्ट्वा मां विस्मितोऽवदत् ।
सम्पाते किमिदं तेऽद्य विरूपं केन वा कृतम् ॥ ८ ॥

जानामि त्वामहं पूर्वमत्यन्तं बलवानसि ।
दग्धौ किमर्थं ते पक्षौ कथ्यतां यदि मन्यसे ॥ ९ ॥

ततः स्वचेष्टितं सर्वं कथयित्वातिदुःखितः ।
अब्रवं मुनिशार्दूलं दह्येऽहं दाववह्निना ॥ १० ॥

कथं धारयितुं शक्तो विपक्षो जीवितं प्रभो ।
इत्युक्तोऽथ मुनिर्वीक्ष्य मां दयार्द्रविलोचनः ॥ ११ ॥

शृणु वत्स वचो मेऽद्य श्रुत्वा कुरु यथेप्सितम् ।
देहमूलमिदं दुःखं देहः कर्मसमुद्भवः ॥ १२ ॥

कर्म प्रवर्तते देहेऽहंबुद्ध्या पुरुषस्य हि ।
अहङ्कारस्त्वनादिः स्यादविद्यासम्भवो जडः ॥ १३ ॥

चिच्छायया सदा युक्तस्तप्तायःपिण्डवत्सदा ।
तेन देहस्य तादात्म्याद्देहश्चेतनवान्भवेत् ॥ १४ ॥

देहोऽहमिति बुद्धिः स्यादात्मनोऽहङ्कृतेर्बलात् ।
तन्मूल एष संसारः सुखदुःखादिसाधकः ॥ १५ ॥

अनेक सहस्र योजने आम्ही उड्डाण केले. त्यानंतर जटायू हा सूर्याच्या उष्णतेने होरपळू लागला. त्याचे रक्षण करण्यासाठी दयेने मी त्याला माझ्या पंखांनी झाकून टाकल्यामुळे सूर्याच्या किरणांनी माझे दोन्ही पंख जळून गेले आणि मी विंध्यपर्वताच्या या शिखरावर पडलो. वानरश्रेष्ठांनो, खूप उंचीवरून खाली पडल्यामुळे मी मूर्च्छित झालो. (४-५)

पुढे तीन दिवसांनंतर मी शुद्धीवर आलो. परंतु पंख जळून गेल्यामुळे माझे मन भ्रमिष्ट झाले होते आणि त्यामुळे तो देश कोणता आणि आजूबाजूंची पर्वतांची शिखरे कोणती हे मला काहीच उमजेनासे झाले . (६)

मी हळूहळू डोळे उघडले. तेव्हा मला एक पवित्र आश्रम दिसला. मी सावकाश त्या आश्रमाजवळ गेलो. (७)

तेथे आश्रमात राहाणारे चंद्रमा नावाचे मुनिराज मला पाहून विस्मित झाले आणि म्हणाले, "अरे संपाती, हे काय ? तुझे रूप कुणी बरे विद्रूप केले आहे ? (८)

मी तुला पूर्वी ओळखत होतो. तू पूर्वी अत्यंत बलवान होतास. तुझे पंख कशामुळे जळून गेले ? जर तुला योग्य वाटेल तर तू सर्व काही मला सांग." (९)

तेव्हा मी त्यांना माझे सर्व कृत्य सांगितले आणि अतिशय दुःखी होऊन त्या मुनिश्रेष्ठाला म्हणालो, "मी आता दावाग्नीत शिरून जळून मरतो. (१०)

कारण हे प्रभो, पंख नसणारा मी कसा बरे माझ्या जीवनाचे रक्षण करू शकेन?" मी असे म्हटल्यावर त्या मुनींनी दयार्द्र दृष्टीने माझ्याकडे पाहिले आणि म्हटले. (११)

'वत्सा, आता माझे वचन ऐक आणि मग जशी तुझी इच्छा असेल तसे तू कर. या दुःखाचे मूळ हा देह असून तो कर्मामुळे उत्पन्न होतो. (१२)

देह म्हणजे मी, अशी बुद्धी झाली की पुरुषाची कर्मे प्रवृत्त होतात. अहंकार हा अनादी व अचेतन असून तो अविद्येपासून निर्माण होतो. (१३)

अग्नीने तप्त झालेला लोखंडाचा गोळा ज्या प्रमाणे अग्नीसारखे कार्य करतो, त्या प्रमाणे हा अहंकार सदा चिदाभासाने व्याप्त असून, त्याचे देहाशी तादात्म्य झाले की देह हा चैतन्याने युक्त होतो. (१४)

त्या अहंकाराच्या सामर्थ्यानेच 'मी देह आहे' अशी बुद्धी आत्म्याला होते. आणि त्या तादात्म्यामुळेच सुख-दुःखे देणारा हा जन्म-मरणरूप संसार उत्पन्न होतो व तो प्राण्यांना भोगावा लागतो. (१५)

सप्तमे मासि रोमाणि शिरः केशास्तथैव च ।
विभक्तावयवत्वं च सर्वं सम्पद्यतेऽष्टमे ॥ ३० ॥

जठरे वर्धते गर्भः स्त्रिया एवं विहङ्गम ।
पञ्चमे मासि चैतन्यं जीवः प्राप्नोति सर्वशः ॥ ३१ ॥

नाभिसूत्रात्परन्ध्रेण मातृभुक्तान्नसारतः ।
वर्धते गर्भगः पिण्डो न म्रियेत स्वकर्मतः ॥ ३२ ॥

स्मृत्वा सर्वाणि जन्मानि पूर्वकर्माणि सर्वशः ।
जठरानलतप्तोऽयमिदं वचनमब्रवीत् ॥ ३३ ॥

नानायोनिसहस्रेषु जायमानोऽनुभूतवान् ।
पुत्रदारादिसम्बन्धं कोटिशः पशुबान्धवान् ॥ ३४ ॥

कुटुम्बभरणासक्त्या न्यायान्यायैर्धनार्जनम् ।
कृतं नाकरवं विष्णुचिन्तां स्वप्नेऽपि दुर्भगः ॥ ३५ ॥

इदानीं तत्फलं भुञ्जे गर्भदुःखं महत्तरम् ।
अशाश्वते शाश्वतबुद्धेहे तृष्णासमन्वितः ॥ ३६ ॥

अकार्याण्येव कृतवान्न कृतं हितमात्मनः ।
इत्येवं बहुधा दुःखमनुभूय स्वकर्मतः ॥ ३७ ॥

कदा निष्क्रमणं मे स्याद्गर्भान्निरयसन्निभात् ।
इत ऊर्ध्वं नित्यमहं विष्णुमेवानुपूजये ॥ ३८ ॥

इत्यादि चिन्तयञ्जीवो योनियन्त्रप्रपीडितः ।
जायमानोऽतिदुःखेन नरकात्पातकी यथा ॥ ३९ ॥

पूतिव्रणान्निपतितः कृमिरेष इवापरः ।
ततो बाल्यादिदुःखानि सर्व एवं विभुञ्जते ॥ ४० ॥

त्वया चैवानुभूतानि सर्वत्र विदितानि च ।
न वर्णितानि मे गृध्र यौवनादिषु सर्वतः ॥ ४१ ॥

सातव्या महिन्यात अंगावरील बारीक लव आणि डोक्यावरील केस निर्माण होतात. मग आठव्या महिन्यात सर्वच अवयव स्पष्ट आणि विभक्त असे होतात. (३०)

हे गृध्र पक्ष्या, या प्रमाणे स्त्रीच्या उदरात गर्भ वाढत जातो. पाचव्या महिन्यात जीवाला संपूर्णपणे चेतनशक्ती प्राप्त होते. (३१)

बेंबीत असणाऱ्या नाळेच्या सूक्ष्म छिद्रातून येणाऱ्या, आईने खालेल्या अन्नाच्या सारामुळे गर्भातील पिंड वाढत राहातो. स्वतःच्या कर्मामुळे तो मरत नाही. (३२)

गर्भात असताना त्याला आपले पूर्वीचे सर्व जन्म आणि पूर्वीची सर्व कर्मे आठवतात. आईच्या जठराग्नीने तापलेला तो जीव असे म्हणू लागतो. (३३)

'आजपर्यंत नाना प्रकारच्या हजारो योनींमध्ये जन्म घेऊन मी कोट्यवधी पुत्र, पत्नी इत्यादींचे संबंध त्याचप्रमाणे पशू व बांधव यांचा अनुभव घेतला आहे. (३४)

कुटुंबाचे पोषण करण्याच्या आसक्तीने मी न्याय्य मार्गाने अथवा अन्याय्य मार्गाने धनार्जन केले. परंतु दुर्भाग्यामुळे मी स्वप्नातसुद्धा विष्णूचे चिंतन केले नाही. (३५)

म्हणून आता त्याचे फळ म्हणून गर्भवासातील फार मोठे दुःख मी भोगीत आहे. आणि नश्वर देहाला शाश्वताप्रमाणे मानून त्याच्या तृष्णेने युक्त होऊन मी बसलो आहे. (३६)

पूर्वी करू नयेत ती कुकर्मे मी केली, पण स्वतःचे कोणतेही हित मात्र केले नाही आणि याच कारणाने मी स्वतःच्या कर्मांनीच नाना प्रकारचे दुःख भोगत आलो आहे. (३७)

आता या नरकसदृश अशा गर्भातून मी केव्हा बरे बाहेर पडेन, हे मला माहीत नाही . यानंतर मात्र मी नित्य विष्णूचीच उपासना करीन.' (३८)

इत्यादी विचार करणारा तो जीव योनीच्या चिमट्याने पीडित होऊन, ज्याप्रमाणे नरकातून पातकी माणूस बाहेर पडतो त्याप्रमाणे तो अतिशय कष्टाने योनीतून बाहेर पडून जन्माला येतो . (३९)

पुवाने भरलेल्या व्रणातून एखादा कृमी बाहेर पडावा, त्या प्रमाणे तो योनीतून बाहेर पडतो. त्यानंतर बालपण इत्यादी अवस्थांतील सर्वच दुःखे तो भोगतो. सर्व प्राण्यांना ही सर्व दुःखे भोगावी लागतातच. (४०)

हे गिधाडा, त्यानंतर तारुण्य इत्यादी अवस्थांतील सर्व दुःखे तू अनुभवली आहेसच आणि ती सर्वांना विदित आहेतच. म्हणून मी त्यांचे वर्णन केलेले नाही. (४१)

एवं देहोऽहमित्यस्मादध्यासान्निरयादिकम् ।
गर्भवासादिदुःखानि भवन्त्यभिनिवेशतः ॥ ४२ ॥

अशा प्रकारे 'मी देह आहे' या खोट्या कल्पनेने येणाऱ्या देहाभिमानाच्या अभिनिवेशामुळे नरक इत्यादीतील दुःखे आणि गर्भवास इत्यादी दुःखे जीवाला भोगावी लागतात. (४२)

तस्माद्देहद्वयादन्यमात्मानं प्रकृतेः परम् ।
ज्ञात्वा देहादिममतां त्यक्त्वात्मज्ञानवान् भवेत् ॥ ४३ ॥

म्हणून आत्मा हा स्थूल आणि सूक्ष्म या दोन देहांपेक्षा भिन्न आहे आणि तो प्रकृतीच्या पलीकडे आहे हे जाणून, देह इत्यादींवरील ममता टाकून देऊन, माणसाने आत्मज्ञानाने संपन्न व्हावयास हवे. (४३)

जाग्रदादिविनिर्मुक्तं सत्यज्ञानादिलक्षणम् ।
शुद्धं बुद्धं सदा शान्तमात्मानमवधारयेत् ॥ ४४ ॥

आत्मा हा जागृती इत्यादी अवस्थांनी रहित, सत्य आणि ज्ञान हे स्वरूप असणारा, शुद्ध, बुद्ध आणि सदा शांत आहे, असे जाणावे. (४४)

चिदात्मनि परिज्ञाते नष्टे मोहेऽज्ञसम्भवे ।
देहः पततु वारब्धकर्मवेगेन तिष्ठतु ॥ ४५ ॥

चेतनस्वरूप आत्म्याला जाणल्यावर आणि अज्ञानापासून उत्पन्न होणारा मोह नष्ट झाल्यावर, मग प्रारब्ध कर्माच्या सामर्थ्याने हा देह पडो अथवा राहो, योगी पुरुषाला अज्ञानापासून निर्माण होणारे कोणतेही सुख किंवा दुःख यांची बाधा होत नाही. म्हणून जोपर्यंत तुझ्या प्रारब्ध कर्मांचा नाश होत नाही, तोपर्यंत तू कात सांभाळणाऱ्या सापाप्रमाणे, तुझा देह सांभाळीत सुखाने राहा. हे गृध्र पक्ष्या, तुला अतिशय हितकारक असणारी आणखी एक गोष्ट मी सांगतो, ती ऐक. (४५-४७)

योगिनो न हि दुःखं वा सुखं वाज्ञानसम्भवम् ।
तस्माद्देहेन सहितो यावत्प्रारब्धसङ्क्षयः ॥ ४६ ॥

तावत्तिष्ठ सुखेन त्वं धृतकञ्चुकसर्पवत् ।
अन्यद्वक्ष्यामि ते पक्षिन् शृणु मे परमं हितम् ॥ ४७ ॥

त्रेतायुगे दाशरथिर्भूत्वा नारायणोऽव्ययः ।
रावणस्य वधार्थाय दण्डकानागमिष्यति ॥ ४८ ॥

त्रेतायुगात राजा दशरथांचे पुत्र राम बनून, अव्यय असे नारायण रावणाच्या वधासाठी दंडकारण्यात येतील. ते श्रीराम आपली पत्नी सीता व भाऊ लक्ष्मण यांच्यासह असतील. तेथे ते दोघे भाऊ हजर नसताना वनातील आश्रमामधून रावण एकाद्या चोराप्रमाणे सीतेला पळवून नेऊन लंकेमध्ये ठेवील. त्यानंतर सुग्रीवाच्या आज्ञेने त्या सीतेचा शोध करण्यासाठी काही वानर समुद्राच्या तीरावर येतील. तेथे काही निमित्ताने त्यांच्याबरोबर तुझी भेट होईल, यात संशय नाही. (४८-५१)

सीतया भार्यया सार्धं लक्ष्मणेन समन्वितः ।
तत्राश्रमे जनकजां भ्रातृभ्यां रहिते वने ॥ ४९ ॥

रावणश्चोरवन्नीत्वा लङ्कायां स्थापयिष्यति ।
तस्याः सुग्रीवनिर्देशाद्वानराः परिमार्गणे ॥ ५० ॥

आगमिष्यन्ति जलधेस्तीरं तत्र समागमः ।
त्वया तैः कारणवशाद्भविष्यति न संशयः ॥ ५१ ॥

त्या वेळी तू त्यांना सीतेचा पत्ता बरोबर सांग. त्याच वेळी तुला दोन नवीन पंख फुटतील." (५२)

तदा सीतास्थितिं तेभ्यः कथयस्व यथार्थतः ।
तदैव तव पक्षौ द्वावुत्पत्स्येते पुनर्नवौ ॥ ५२ ॥

सम्पातिरुवाच

संपाती म्हणाला – हे वानरांनो, अशा प्रकारे त्या चंद्र नावाच्या मुनिकुळातील श्रेष्ठांनी मला उपदेश केला. (त्या वेळेपासून मी शांत होऊन तुमची वाट पाहात राहिलो.) बघा, आता मला हे दोन नवीन आणि अतिशय कोमल असे पंख फुटले आहेत. (५३)

बोधयामास मां चन्द्रनामा मुनिकुलेश्वरः ।
पश्यन्तु पक्षौ मे जातौ नूतनावतिकोमलौ ॥ ५३ ॥

तुमचे कल्याण होवो. मी आता जातो. तुम्हांला सीता निश्चितपणे सापडेल यात शंका नाही. तेव्हा आता ओलांडण्यास कठीण अशा समुद्राचे उल्लंघन करण्यासाठी प्रयत्न करा. (५४)

स्वस्ति वोऽस्तु गमिष्यामि सीतां द्रक्ष्यथ निश्चयम् ।
यत्नं कुरुध्वं दुर्लङ्घ्यसमुद्रस्य विलङ्घने ॥ ५४ ॥

यन्नामस्मृतिमात्रतोऽपरिमितं
संसारवारांनिधिं
तीर्त्वा गच्छति दुर्जनोऽपि परमं
विष्णोः पदं शाश्वतम् ।
तस्यैव स्थितिकारिणस्त्रिजगतां
रामस्य भक्ताः प्रिया
यूयं किं न समुद्रमात्रतरणे
शक्ताः कथं वानराः ॥ ५५ ॥

अरे वानरांनो, ज्यांच्या नावाच्या केवळ स्मरणाने दुर्जन माणूससुद्धा अपरंपार असा संसाररूपी सागर तरून जाऊन विष्णूंचे परम व शाश्वत असे पद प्राप्त करून घेतो, त्याच तीनही लोकांचे पालन करणाऱ्या, श्रीरामांचे तुम्ही प्रिय भक्त आहात. तेव्हा हा क्षुल्लक समुद्र तरून जाण्यात तुम्ही का व कसे बरे समर्थ होणार नाही ?" (५५)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किन्धाकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवम सर्ग

समुद्र उल्लंघून जाण्यासंबंधी वानरांची चर्चा

श्रीमहादेव उवाच

गते विहायसा गृध्रराजे वानरपुङ्गवाः ।
हर्षेण महताविष्टाः सीतादर्शनलालसाः ॥ १ ॥

ऊचुः समुद्रं पश्यन्तो नक्रचक्रभयङ्करम् ।
तरङ्गादिभिरुन्नद्धमाकाशमिव दुर्ग्रहम् ॥ २ ॥

परस्परमवोचन्वै कथमेनं तरामहे ।
उवाच चाङ्गदस्तत्र शृणुध्वं वानरोत्तमाः ॥ ३ ॥

भवन्तोऽत्यन्तबलिनः शूराश्च कृतविक्रमाः ।
को वात्र वारिधिं तीर्त्वा राजकार्यं करिष्यति ॥ ४ ॥

एतेषां वानराणां स प्राणदाता न संशयः ।
तदुत्तिष्ठतु मे शीघ्रं पुरतो यो महाबलः ॥ ५ ॥

वानराणां च सर्वेषां रामसुग्रीवयोरपि ।
स एव पालको भूयान्नात्र कार्या विचारणा ॥ ६ ॥

इत्युक्ते युवराजेन तूष्णीं वानरसैनिकाः ।
आसन्नोचुः किञ्चिदपि परस्परविलोकिनः ॥ ७ ॥

श्रीमहादेव म्हणाले– हे पार्वती, गिधाडांचा राजा संपाती आकाशमार्गाने निघून गेल्यावर, सीतेची भेट घेण्याची अतिशय उत्कंठा असणारे ते श्रेष्ठ वानर तिचा पत्ता लागल्याने अतिशय आनंदित झाले. (१)

पण मगरी आणि भोवरे यांच्यामुळे भयंकर असणारा, लाटा इत्यादींनी सतत उसळत राहाणारा, आणि आकाशाप्रमाणे दुर्लंघ्य असा समुद्र त्या वानरांनी पाहिला. तेव्हा ते एकमेकांना म्हणू लागले, 'हा समुद्र आपण कसा बरे तरून जाऊ शकू ?' त्यावेळी तेथे अंगद म्हणाला, "हे वानरश्रेष्ठांनो, मी काय म्हणतो ते ऐका. (२-३)

तुम्ही सर्वजण बलवान शूरवीर असून तुम्ही आत्तापर्यंत अनेक पराक्रम केलेले आहेत. तेव्हा येथे तुमच्या मध्ये असा कोण आहे की जो हा समुद्र तरून जाऊन, सुग्रीव राजाचे कार्य पूर्ण करील ? (४)

तो या सर्व वानरांना जीवदान देईल यात संशय नाही. म्हणून तुमच्यापैकी असा जो कोणी महाबलवान आहे त्याने चट्दिशी येऊन माझ्यापुढे यावे. (५)

तो वानरच सर्व वानरांचा तसेच राम व सुग्रीव यांचा रक्षक ठरेल. या बाबतीत मुळीच विचार करण्याचे कारण नाही." (६)

युवराज अंगदाने असे म्हटल्यावर, वानर सैनिक गप्प बसून राहिले. आणि परस्परांकडे पाहात, ते काहीही बोलले नाहीत. (७)

अङ्गद उवाच

उच्यतां वै बलं सर्वैः प्रत्येकं कार्यसिद्धये ।
केन वा साध्यते कार्यं जानीमस्तदनन्तरम् ॥ ८ ॥

अङ्गदस्य वचः श्रुत्वा प्रोचुर्वीरा बलं पृथक् ।
योजनानां दशारभ्य दशोत्तरगुणं जगुः ॥ ९ ॥

शतादर्वाग्जाम्बवांस्तु प्राह मध्ये वनौकसाम् ।
पुरा त्रिविक्रमे देवे पादं भूमानलक्षणम् ॥ १० ॥

त्रिःसप्तकृत्वोऽहमगां प्रदक्षिणविधानतः ।
इदानीं वार्धक्यस्तो न शक्नोमि विलङ्घितुम् ॥ ११ ॥

अङ्गदोऽप्याह मे गन्तुं शक्यं पारं महोदधेः ।
पुनर्लङ्घनसामर्थ्यं न जानाम्यस्ति वा न वा ॥ १२ ॥

तमाह जाम्बवान्वीरस्त्वं राजा नो नियामकः ।
न युक्तं त्वां नियोक्तुं मे त्वं समर्थोऽसि यद्यपि ॥ १३ ॥

अङ्गद उवाच

एवं चेत्पूर्ववत्सर्वे स्वपस्यामो दर्भविष्टरे ।
केनापि न कृतं कार्यं जीवितुं च न शक्यते ॥ १४ ॥

तमाह जाम्बवान्वीरो दर्शयिष्यामि ते सुत ।
येनास्माकं कार्यसिद्धिर्भविष्यत्यचिरेण च ॥ १५ ॥

इत्युक्त्वा जाम्बवान्प्राह हनूमन्तमवस्थितम् ।
हनूमन्किं रहस्तूष्णीं स्थीयते कार्यगौरवे ॥ १६ ॥

प्रामेऽज्ञेनेव सामर्थ्यं दर्शयाद्य महाबल ।
त्वं साक्षाद्वायुतनयो वायुतुल्यपराक्रमः ॥ १७ ॥

अंगद म्हणाला- "आता तुम्हांपैकी प्रत्येकाने या कार्याच्या सिद्धीसाठी आपले सामर्थ्य किती आहे, हे सांगावे. त्यानंतर हे कार्य कोणाकडून साधले जाईल, हे आम्हांला कळू शकेल." (८)

अंगदाचे वचन ऐकल्यावर वानर-वीरांनी स्वतंत्रपणे आपापले सामर्थ्य कथन केले. दहा योजनांपासून सुरवात करून क्रमाने दहा योजनांच्या दहा दहा योजने अधिक उड्डाण होईल असे त्या वानरांनी सांगितले. (९)

वनात राहाणाऱ्या प्राण्यांपैकी त्या जांबवान अस्वलाने आपली शक्ती शंभर योजनांपेक्षा काही कमी अंतर इतके जाण्याची आहे, असे सांगितले. तो पुढे म्हणाला, "पूर्वी जेव्हा श्रीविष्णूंनी वामन अवतार घेतला होता, तेव्हा त्या वामनाचे एक पाऊल पृथ्वीएवढ्या मापाचे होते. त्या वेळी मी एकवीस वेळा त्याला प्रदक्षिणा घातल्या होत्या. परंतु आता मी वार्धक्याने ग्रस्त असल्याने समुद्राचे उल्लंघन करू शकणार नाही." (१०-११)

तेव्हा अंगदसुद्धा म्हणाला, "या महासागराच्या पलीकडे मला जाता येईल. परंतु पुनः परत येण्याचे सामर्थ्य माझ्याजवळ आहे की नाही, हे मात्र मला माहीत नाही." (१२)

तेव्हा वीर जांबवान त्याला म्हणाला, "तू वीर आहेस. आणि तू हे कार्य करण्यास समर्थ असलास तरी या कार्यासाठी तुझी योजना करणे, हे मला योग्य वाटत नाही, कारण तू आमचा नायक आहेस आणि नियामक आहेस." (१३)

अंगद म्हणाला– "असे जर असेल तर आपण सर्वजण पूर्वीप्रमाणे कुशासनांवर प्रायोपवेशन करण्यास पडून राहू. कारण हे कार्य कुणाकडूनही झाले नाही तर अशा स्थितीत जिवंत राहाणे, हेही आपणांस शक्य होणार नाही." (१४)

तेव्हा वीर जांबवान त्याला म्हणाला, "वत्सा, ज्याच्याकडून आपली कार्य-सिद्धी झटपट होईल, असा वानर- वीर मी तुला दाखवितो." (१५)

असे बोलून जांबवान तेथे जवळच उभ्या असलेल्या हनुमंताला म्हणाला, 'अरे हनुमाना, हे महान कार्य उपस्थित झाले असताना, एखाद्या अज्ञानी माणसाप्रमाणे तू बाजूला एकटाच गप्प का उभा राहिला आहेस ? अरे सामर्थ्यसंपन्न हनुमाना, तू साक्षात वायूचा पुत्र आहेस आणि वायूप्रमाणेच तुझा पराक्रम आहे. तेव्हा आज तू आपले सामर्थ्य दाखव. (१६-१७)

रामकार्यार्थमेव त्वं जनितोऽसि महात्मना ।
जातमात्रेण ते पूर्वं दृष्ट्वोद्यन्तं विभावसुम् ॥ १८ ॥

पक्वं फलं जिघृक्षामीत्युत्प्लुतं बालचेष्टया ।
योजनानां पञ्चशतं पतितोऽसि ततो भुवि ॥ १९ ॥

अतस्त्वद्बलमाहात्म्यं को वा शक्नोति वर्णितुम् ।
उतिष्ठ कुरु रामस्य कार्यं नः पाहि सुव्रत ॥ २० ॥

श्रुत्वा जाम्बवतो वाक्यं हनूमानतिहर्षितः ।
चकार नादं सिंहस्य ब्रह्माण्डं स्फोटयन्निव ॥ २१ ॥

बभूव पर्वताकारस्त्रिविक्रम इवापरः ।
लङ्घयित्वा जलनिधिं कृत्वा लङ्कां च भस्मसात् ॥ २२ ॥

रावणं सकुलं हत्वानेष्ये जनकनन्दिनीम् ।
यद्वा बद्ध्वा गले रज्ज्वा रावणं वामपाणिना ॥ २३ ॥

लङ्कां सपर्वतां धृत्वा रामस्याग्रे क्षिपाम्यहम् ।
यद्वा दृष्ट्वैव यास्यामि जानकीं शुभलक्षणाम् ॥ २४ ॥

श्रुत्वा हनुमतो वाक्यं जाम्बवानिदमब्रवीत् ।
दृष्ट्वैवागच्छ भद्रं ते जीवन्तीं जानकीं शुभाम् ॥ २५ ॥

पश्चाद्रामेण सहितो दर्शयिष्यसि पौरुषम् ।
कल्याणं भवताद्भद्र गच्छतस्ते विहायसा ॥ २६ ॥

गच्छन्तं रामकार्यार्थं वायुस्त्वामनुगच्छतु ।
इत्याशीर्भिः समामन्त्र्य विसृष्टः प्लवगाधिपैः ॥ २७ ॥

महेन्द्राद्रिशिरो गत्वा बभूवाद्भुतदर्शनः ॥ २८ ॥
महानगेन्द्रप्रतिमो महात्मा
सुवर्णवर्णोऽरुणचारुवक्त्रः ।
महाफणीन्द्राभसुदीर्घबाहु-
र्वातात्मजोऽदृश्यत सर्वभूतैः ॥ २९ ॥

अरे महात्म्या, वायूने तुला श्रीरामांचे कार्य करण्यासाठीच जन्माला घातले आहे. पूर्वी जन्माला येताच उगवणारा सूर्य पाहून, 'हे पिकले फळ मी घेतो,' असा विचार करून, तू बाललीला करीत पाचशे योजने उड्डाण करून मग जमिनीवर पडला होतास. (१८-१९)

म्हणून तुझ्या सामर्थ्याचे माहात्म्य वर्णन करण्यास कोण बरे समर्थ आहे ? तेव्हा, हे सुव्रता, ऊठ. रामाचे कार्य कर आणि आमचे रक्षण कर. " (२०)

जांबवानाचे हे वाक्य ऐकून हनुमान अतिशय आनंदित झाला. आणि जणू ब्रह्मांड फोडणारा असा प्रचंड सिंहनाद त्याने केला. (२१)

तो पर्वताच्या आकाराचा झाला. जणू तो दुसरा वामन आहे असे वाटत होते. तो गर्जना करू लागला, "अरे वानरांनो, हा समुद्र उल्लंघून, लंकेला भस्मसात् करतो आणि कुळासकट रावणाला ठार करून मी जनकाच्या कन्येला परत आणतो किंवा तुम्ही म्हणाल तर रावणाच्या गळ्यात दोर बांधून आणि डाव्या हाताने पर्वतासकट लंका पकडून मी त्याला श्रीरामांच्या पुढे उभा करतो, किंवा शुभलक्षणी जानकीला जिवंत पाहूनच परत येतो. " (२२-२४)

हनुमंताचे वाक्य ऐकून जांबवान असे म्हणाला, "हनुमाना, तुझे कल्याण होवो. शुभलक्षणी जानकीला जिवंत पाहूनच तू परत ये. (२५)

मग श्रीरामांबरोबर लंकेत जाऊन तू तुझे सामर्थ्य दाखव. हे कल्याणा, आकाशमार्गाने जाणाऱ्या तुझे कल्याण असो. (२६)

श्रीरामांच्या कार्यासाठी जाणाऱ्या तुझ्या मागोमाग वायुदेवता तुझ्याबरोबर येवो." अशा प्रकारे आशीर्वाद देऊन त्या वानरश्रेष्ठांनी हनुमानाला निरोप दिला. (२७)

मग मारुती महेंद्र पर्वताच्या शिखरावर गेला. तेथे त्याने अद्भुत रूप धारण केले. (२८)

त्या वेळी महान पर्वतराजाप्रमाणे असणारा, सुवर्णवर्ण, बाल सूर्याप्रमाणे लाल आणि सुंदर मुख असणारा, महान सर्पराजाप्रमाणे दीर्घ बाहू असणारा, असा तो महात्मा वायुपुत्र हनुमान सर्व प्राण्यांना दिसला. (२९)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकाण्डे नवमः सर्गः ॥ ९ ॥

किष्किन्धाकाण्ड समाप्त

ॐ

अध्यात्मरामायण

सुन्दरकाण्ड

प्रथम सर्ग

हनुमानाचे समुद्र-उल्लंघन आणि त्याचा लंकेत प्रवेश

श्रीमहादेव उवाच

शतयोजनविस्तीर्णं समुद्रं मकरालयम् ।
लिलङ्घयिषुरानन्दसन्दोहो मारुतात्मजः ॥ १ ॥

ध्यात्वा रामं परात्मानमिदं वचनमब्रवीत् ।
पश्यन्तु वानराः सर्वे गच्छन्तं मां विहायसा ॥ २ ॥

अमोघं रामनिर्मुक्तं महाबाणमिवाखिलाः ।
पश्याम्यद्यैव रामस्य पत्नीं जनकनन्दिनीम् ॥ ३ ॥

कृतार्थोऽहं कृतार्थोऽहं पुनः पश्यामि राघवम् ।
प्राणप्रयाणसमये यस्य नाम सकृत्स्मरन् ॥ ४ ॥

नरस्तीर्त्वा भवाम्भोधिमपारं याति तत्पदम् ।
किं पुनस्तस्य दूतोऽहं तदङ्गाङ्गुलिमुद्रिकः ॥ ५ ॥

तमेव हृदये ध्यात्वा लङ्घयाम्यल्पवारिधिम् ।
इत्युक्त्वा हनुमान्बाहू प्रसार्यायतवालधिः ॥ ६ ॥

ऋजुग्रीवोर्ध्वदृष्टिः सन्नाकुञ्चितपदद्वयः ।
दक्षिणाभिमुखस्तूर्णं पुप्लुवेऽनिलविक्रमः ॥ ७ ॥

आकाशात्त्वरितं देवैर्वीक्ष्यमाणो जगाम सः ।
दृष्ट्वानिलसुतं देवा गच्छन्तं वायुवेगतः ॥ ८ ॥

परीक्षणार्थं सत्त्वस्य वानरस्येदमब्रुवन् ।
गच्छत्येष महासत्त्वो वानरो वायुविक्रमः ॥ ९ ॥

लङ्कां प्रवेष्टुं शक्तो वा न वा जानीमहे बलम् ।
इति विचार्य नागानां मातरं सुरसाभिधाम् ॥ १० ॥

श्रीमहादेव म्हणाले – हे पार्वती, आनंदाचा डोह असणाऱ्या हनुमानाने शंभर योजने विस्तृत असणाऱ्या आणि मगरींचे वसति-स्थान असणाऱ्या समुद्र उल्लंघून जाण्याची तयारी केली. (१)

नंतर परमात्मा श्रीरामांचे स्मरण करून हनुमान म्हणाला, "अरे वानरांनो, श्रीरामांनी सोडलेल्या अमोघ व प्रचंड बाणाप्रमाणे आकाशमार्गाने जाणाऱ्या मला तुम्ही आता सर्व जण बघा. मी आजच जनकाची कन्या असणाऱ्या श्रीरामांच्या पत्नीला भेटेन. (२-३)

अशा रीतीने कृतार्थ व कृतकृत्य होऊन मी पुनः श्रीराघवांचे दर्शन घेईन. प्राणप्रयाणाच्या वेळी ज्यांचे नाव एकदाच स्मरण करणारा माणूस हा अपार भवसागर तरून, श्रीरामांचे श्रेष्ठ स्थानी जातो, अशा त्या श्रीरामांचा मी दूत आहे. त्यांच्या बोटातील मुद्रिका माझ्याजवळ आहे. श्रीरामांचेच ध्यान माझ्या हृदयात करीत मी हा तुच्छ समुद्र ओलांडून जाईन. त्यात काय मोठे " ? असे बोलून हनुमानाने आपले बाहू पसरले, शेपटी सरळ लांब केली, मान सरळ केली, दृष्टी वर केली आणि दोन्ही पाय जवळ घेतले, दक्षिणेकडे तोंड केले आणि वायूप्रमाणे पराक्रमी असणाऱ्या हनुमानाने लगेच उड्डाण केले . (४-७)

देवगण पाहात असताना तो हनुमान आकाशातून त्वरेने जात होता. त्या वेळी वायुवेगाने जाणाऱ्या पवनसुत हनुमानाला पाहून, त्याच्या सामर्थ्याची परीक्षा पाहण्यास देव आपापसात म्हणू लागले-"वायूसारखा पराक्रमी आणि महासामर्थ्यसंपन्न, असा हा वानर जात आहे. (८-९)

परंतु तो लंकेत प्रवेश करण्यास समर्थ होईल की नाही हे कळत नाही. म्हणून याच्या सामर्थ्याची परीक्षा घ्यावयास हवी." अशा कुतूहलाने देवतांचा समूह सुरसा

अब्रवीद्देवतावृन्दः कौतूहलसमन्वितः ।
गच्छ त्वं वानरेन्द्रस्य किञ्चिद्विघ्नं समाचर ॥ ११ ॥

ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता ।
इत्युक्ता सा ययौ शीघ्रं हनुमद्विघ्नकारणात् ॥ १२ ॥

आवृत्य मार्गं पुरतः स्थित्वा वानरमब्रवीत् ।
एहि मे वदनं शीघ्रं प्रविशस्व महामते ॥ १३ ॥

देवैरस्त्वं कल्पितो भक्ष्यः क्षुधासम्पीडितात्मनः ।
तामाह हनुमान्मातरहं रामस्य शासनात् ॥ १४ ॥

गच्छामि जानकीं द्रष्टुं पुनरागम्य सत्वरः ।
रामाय कुशलं तस्याः कथयित्वा त्वदाननम् ॥ १५ ॥

निवेक्ष्ये देहि मे मार्गं सुरसायै नमोऽस्तु ते ।
इत्युक्ता पुनरेवाह सुरसा क्षुधितास्म्यहम् ॥ १६ ॥

प्रविश्य गच्छ मे वक्त्रं नो चेत्त्वां भक्षयाम्यहम् ।
इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय ॥ १७ ॥

प्रविश्य वदनं तेऽद्य गच्छामि त्वरयान्वितः ।
इत्युक्त्वा योजनायामदेहो भूत्वा पुरः स्थितः ॥ १८ ॥

दृष्ट्वा हनूमतो रूपं सुरसा पञ्चयोजनम् ।
मुखं चकार हनुमान् द्विगुणं रूपमादधत् ॥ १९ ॥

ततश्चकार सुरसा योजनानां च विंशतिम् ।
वक्त्रं चकार हनुमांस्त्रिंशद्योजनसम्मितम् ॥ २० ॥

ततश्चकार सुरसा पञ्चाशद्योजनायतम् ।
वक्त्रं तदा हनूमांस्तु बभूवाङ्गुष्ठसन्निभः ॥ २१ ॥

प्रविश्य वदनं तस्याः पुनरेत्य पुरः स्थितः ।
प्रविष्टो निर्गतोऽहं ते वदनं देवि ते नमः ॥ २२ ॥

नावाच्या नागांच्या मातेला म्हणाला, "सुरसे, तू आता जा आणि त्या श्रेष्ठ वानराच्या मार्गात काही तरी विघ्न आण. त्याचे बळ आणि बुद्धी हे जाणून घेऊन तू त्वरेने परत ये." देवांनी असे सांगितल्यावर, हनुमानाच्या मार्गात विघ्न आणण्यासाठी सुरसा त्वरित निघाली. (१०-१२)

हनुमानाचा मार्ग अडवून आणि त्याच्यापुढे उभी राहून ती म्हणाली, "हे महाबुद्धिमान वानरा, ये आणि माझ्या तोंडात शीघ्र प्रवेश कर. भुकेने माझा जीव अगदी व्याकूळ झाला आहे. म्हणून देवांनीच तुला माझे भक्ष्य म्हणून तुझी योजना केली असावी." तेव्हा हनुमान तिला म्हणाला, "हे माते, मी श्रीरामांच्या आज्ञेने जानकीला भेटण्यासाठी जात आहे. भेटून सत्वर परत येतो, तिचे कुशल श्रीरामांना सांगून, मग मी तुझ्या तोंडात प्रवेश करतो. माझा रस्ता सोड. हे सुरसे, तुला माझा नमस्कार असो." हनुमान असे बोलल्यावर सुरसा त्याला पुन: म्हणाली, "मी अतिशय भुकेली आहे. तेव्हा तू सत्वर माझ्या तोंडात प्रवेश कर आणि मग जा. तू असे केले नाहीस तर मी तुला खाऊन टाकीन." तिने असे म्हटल्यावर हनुमान तिला म्हणाला, "तू पटकन तोंड उघड. आत्ताच तुझ्या तोंडात प्रवेश करून मी त्वरेने पुढे जातो." असे म्हणून आपला देह एक योजन लांब रुंद करून हनुमान तिच्या पुढे उभा राहिला. (१३-१८)

हनुमानाचे ते रूप पाहून सुरसेने आपले मुख पाच योजने विस्तृत केले. तेव्हा हनुमानाने आपले रूप त्याच्या दुप्पट केले. (१९)

त्यानंतर सुरसेने आपले तोंड वीस योजने लांब रुंद केले. तेव्हा हनुमानाने आपले शरीर तीस योजने लांब रुंद केले. (२०)

मग सुरसेने आपले मुख पन्नास योजने विस्तृत केले. तेव्हा हनुमान पटकन अंगठ्या एवढ्या आकाराचा झाला. (२१)

नंतर तिच्या मुखात प्रवेश करून, तिने तोंड बंद करण्यापूर्वी चट्दिशी पुन: बाहेर येऊन हनुमान तिच्यापुढे उभा राहिला आणि म्हणाला, "हे देवी, तुझ्या तोंडात प्रवेश करून मी पुन: बाहेर आलो आहे. आता तुला नमस्कार असो." (२२)

एवं वदन्तं दृष्ट्वा सा हनूमन्तमथाब्रवीत् ।
गच्छ साधय रामस्य कार्यं बुद्धिमतां वर ॥ २३ ॥

देवैः सम्प्रेषिताहं ते बलं जिज्ञासुभिः कपे ।
दृष्ट्वा सीतां पुनर्गत्वा रामं द्रक्ष्यसि गच्छ भोः ॥ २४ ॥

इत्युक्त्वा सा ययौ देवलोकं वायुसुतः पुनः ।
जगाम वायुमार्गेण गरुत्मानिव पक्षिराट् ॥ २५ ॥

समुद्रोऽप्याह मैनाकं मणिकाञ्चनपर्वतम् ।
गच्छत्येष महासत्त्वो हनूमान्मारुतात्मजः ॥ २६ ॥

रामस्य कार्यसिद्ध्यर्थं तस्य त्वं सचिवो भव ।
सगरैर्वर्द्धितो यस्मात्पुराहं सागरोऽभवम् ॥ २७ ॥

तस्यान्वये बभूवासौ रामो दाशरथिः प्रभुः ।
तस्य कार्यानुसिद्ध्यर्थं गच्छत्येष महाकपिः ॥ २८ ॥

त्वमुत्तिष्ठ जलात्तूर्णं त्वयि विश्राम्य गच्छतु ।
स तथेति प्रादुरभूज्जलमध्यान्महोन्नतः ॥ २९ ॥

नानामणिमयैः शृङ्गैस्तस्योपरि नराकृतिः ।
प्राह यान्तं हनूमन्तं मैनाकोऽहं महाकपे ॥ ३० ॥

समुद्रेण समादिष्टस्त्वद्विश्रामाय मारुते ।
आगच्छामृतकल्पानि जग्ध्वा पक्वफलानि मे ॥ ३१ ॥

विश्राम्यात्र क्षणं पश्चाद्गमिष्यसि यथासुखम् ।
एवमुक्तोऽथ तं प्राह हनूमान्मारुतात्मजः ॥ ३२ ॥

गच्छतो रामकार्यार्थं भक्षणं मे कथं भवेत् ।
विश्रामो वा कथं मे स्याद्गन्तव्यं त्वरितं मया ॥ ३३ ॥

इत्युक्त्वा स्पृष्टशिखरः कराग्रेण ययौ कपिः ।
किञ्चिद्दूरं गतस्यास्य छायां छायाग्रहोऽग्रहीत् ॥ ३४ ॥

अशा प्रकारे त्याचे बोलणे ऐकून सुरसा हनुमंताला म्हणाली, "हे बुद्धिमंतामध्ये श्रेष्ठा, तू आता जा आणि श्रीरामांचे कार्य सिद्ध करून घे. (२३)

हे वानरा, तुझे बळ जाणून घेण्यासाठी देवांनी मला पाठविले होते. सीतेला भेटून आणि पुनः परत येऊन तू श्रीरामांना भेटशील. तू जा आता." (२४)

असे सांगून ती देवलोकाला निघून गेली. त्यानंतर पुनः वायुसुत हनुमान पक्षिराज गरुडाप्रमाणे वायुमार्गाने पुढे गेला. (२५)

त्यावेळी रत्ने आणि कांचन यांनी युक्त मैनाक पर्वताला समुद्र म्हणाला, "बघ, श्रीरामांचे कार्य सिद्ध करण्यासाठी हा महाशक्तिशाली मारुत- पुत्र हनुमान जात आहे. तू त्याचा सहायक हो. पूर्वीच्या काळी सगर नावाच्या राजाच्या पुत्रांनी मला वाढविले; म्हणून मला सागर म्हणतात. (२६-२७)

त्या सगराच्या वंशातच दशरथ-तनय, प्रभू श्रीराम जन्माला आले आहेत. आणि हा महान वानर त्यांच्या कार्याची सिद्धी करण्यासाठी जात आहे. (२८)

तेव्हा तू पाण्यातून झटदिशी वर ऊठ. तुझ्या माथ्यावर विश्रांती घेऊन या वानराला जाऊ दे." 'ठीक आहे', असे म्हणून, नाना रत्नांनी युक्त अशा आपल्या शिखरांसह तो पाण्यामधून अतिशय उंच होऊन प्रकट झाला. त्या शिखरावर माणसाचे रूप धारण करून तो जाणाऱ्या हनुमंताला म्हणाला, "हे महावानरा, मी मैनाक पर्वत आहे. (२९-३०)

हे मारुती, तुला विश्रांती द्यावी अशी समुद्राने मला आज्ञा केली आहे. तेव्हा ये, आणि अमृताप्रमाणे असणारी माझ्या शिखरावरील पिकलेली फळे खाऊन, येथेच क्षणभर विश्रांती घेऊन, नंतर तू सुखाने पुढे जा." असे त्याने म्हटल्यावर मारुतपुत्र हनुमान त्याला म्हणाला- (३१-३२)

"श्रीरामांच्या कार्यासाठी मी जात असताना मला खाणे कसे बरे सुचेल ? किंवा मी विश्रांती तरी कशी घेऊ ? कारण मला ताबडतोब जायचे आहे." (३३)

असे बोलून आपल्या बोटाने मैनाक पर्वताच्या शिखराला स्पर्श करून मारुती पुढे गेला. तो थोडेसे दूर गेल्यावर छायाग्रहाने त्याच्या छायेला पकडले. (३४)

सिंहिका नाम सा घोरा जलमध्ये स्थिता सदा ।
आकाशगामिनां छायामाक्रम्याकृष्य भक्षयेत् ॥ ३५ ॥

तया गृहीतो हनुमांश्चिन्तयामास वीर्यवान् ।
केनेदं मे कृतं वेगरोधनं विघ्नकारिणा ॥ ३६ ॥

दृश्यते नैव कोऽप्यत्र विस्मयो मे प्रजायते ।
एवं विचिन्त्य हनूमानधो दृष्टिं प्रसारयत् ॥ ३७ ॥

तत्र दृष्ट्वा महाकायां सिंहिकां घोररूपिणीम् ।
पपात सलिले तूर्णं पद्भ्यामेवाहनद्रुषा ॥ ३८ ॥

पुनरुत्प्लुत्य हनुमान्दक्षिणाभिमुखो ययौ ।
ततो दक्षिणमासाद्य कूलं नानाफलद्रुमम् ॥ ३९ ॥

नानापक्षिमृगाकीर्णं नानापुष्पलतावृतम् ।
ततो ददर्श नगरं त्रिकूटाचलमूर्धनि ॥ ४० ॥

प्राकारैर्बहुभिर्युक्तं परिखाभिश्च सर्वतः ।
प्रवेक्ष्यामि कथं लङ्कामिति चिन्तापरोऽभवत् ॥ ४१ ॥

रात्रौ वेक्ष्यामि सूक्ष्मोऽहं लङ्कां रावणपालिताम् ।
एवं विचिन्त्य तत्रैव स्थित्वा लङ्कां जगाम सः ॥ ४२ ॥

धृत्वा सूक्ष्मं वपुर्द्वारं प्रविवेश प्रतापवान् ।
तत्र लङ्कापुरी साक्षाद्राक्षसीवेषधारिणी ॥ ४३ ॥

प्रविशन्तं हनूमन्तं दृष्ट्वा लङ्का व्यतर्जयत् ।
कस्त्वं वानररूपेण मामनादृत्य लङ्घिनीम् ॥ ४४ ॥

प्रविश्य चोरवद्रात्रौ किं भवान्कर्तुमिच्छति ।
इत्युक्त्वा रोषताम्राक्षी पादेनाभिजघान तम् ॥ ४५ ॥

हनुमानपि तां वाममुष्टिनावज्ञयाहनत् ।
तदैव पतिता भूमौ रक्तमुद्वमती भृशम् ॥ ४६ ॥

तो छायाग्रह म्हणजे सिंहिका नावाची एक भयंकर राक्षसी होती. ती नेहमी पाण्यामध्ये राहात असे. आकाशातून जाणाऱ्या प्राण्यांची छाया पकडून ती त्यांना खेचून घेई आणि त्यांना खाऊन टाकी. (३५)

तिने पकडल्यावर सामर्थ्यसंपन्न हनुमानाने विचार केला की, "माझ्या मार्गात विघ्न निर्माण करणाऱ्या कुणी बरे माझ्या वेगाला रोखून धरले आहे ? (३६)

येथे तर कुणीही दिसत नाही. त्यामुळे मला फार आश्चर्य वाटत आहे." असा विचार करून हनुमंताने आपली दृष्टी खालच्या बाजूला टाकली. (३७)

तेव्हा तेथे त्याला धिप्पाड शरीराची आणि भयंकर रूप असणारी सिंहिका दिसली. लगेच त्याने पाण्यात उडी मारली आणि रागाने तिला दोन्ही पायांनी लाथा घालून ठार केले. (३८)

नंतर पुन: वर आकाशात उड्डाण करून हनुमान दक्षिणेकडे तोंड करून निघाला आणि तो समुद्राच्या दक्षिण तीरावर पोचला. त्या तीरावर फळांनी भरलेले नाना प्रकारचे वृक्ष होते. नानाप्रकारचे पशू व पक्षी यांनी ते तीर भरलेले होते. तसेच ते विविध प्रकारच्या पुष्पलतांनी युक्त होते. त्यानंतर त्रिकूट पर्वताच्या माथ्यावर त्याला एक नगर दिसले. (३९-४०)

ते नगर अनेक तटांनी युक्त होते; ते तट सर्व बाजूंनी खंदकांनी वेढले होते. तेव्हा 'या लंका नगरीत कसा बरे प्रवेश करता येईल,' अशी चिंता मारुतीला लागली. (४१)

रावणाने पालन केलेल्या या लंकेत मी सूक्ष्म रूप धारण करून रात्रीच्या वेळी प्रवेश करीन, असा विचार करून, तो रात्र होईपर्यंत तेथेच थांबला आणि मग रात्र पडल्यावर लंकेकडे जाण्यास निघाला. (४२)

सूक्ष्म रूप धारण करून प्रतापी हनुमानाने लंकेच्या द्वारात प्रवेश केला. तेथे प्रत्यक्ष लंका नगरी ही राक्षसीचा वेष धारण करून उभी होती. (४३)

हनुमान प्रवेश करीत आहे हे पाहिल्यावर लंकेने त्याला दटावले. "मज लंकिनीचा अनादर करून, रात्री चोराप्रमाणे प्रवेश करणारा, वानराचे रूप धारण केलेला तू कोण आहेस? तुला काय पाहिजे ?" असे बोलून क्रोधाने डोळे लाल करून तिने त्या हनुमानाला आपल्या लाथेने तडाखा दिला. (४४-४५)

तेव्हा हनुमानानेसुद्धा आपल्या डाव्या हाताचा ठोसा तिला लगावला. तत्काळ खूप रक्त ओकीत ती जमिनीवर पडली. (४६)

सिंहिका नाम सा घोरा जलमध्ये स्थिता सदा ।
आकाशगामिनां छायामाक्रम्याकृष्य भक्षयेत् ॥ ३५ ॥

तया गृहीतो हनुमांश्चिन्तयामास वीर्यवान् ।
केनेदं मे कृतं वेगरोधनं विघ्नकारिणा ॥ ३६ ॥

दृश्यते नैव कोऽप्यत्र विस्मयो मे प्रजायते ।
एवं विचिन्त्य हनूमानधो दृष्टिं प्रसारयत् ॥ ३७ ॥

तत्र दृष्ट्वा महाकायां सिंहिकां घोररूपिणीम् ।
पपात सलिले तूर्णं पद्भ्यामेवाहनद्रुषा ॥ ३८ ॥

पुनरुत्प्लुत्य हनुमान्दक्षिणाभिमुखो ययौ ।
ततो दक्षिणमासाद्य कूलं नानाफलद्रुमम् ॥ ३९ ॥

नानापक्षिमृगाकीर्णं नानापुष्पलतावृतम् ।
ततो ददर्श नगरं त्रिकूटाचलमूर्धनि ॥ ४० ॥

प्राकारैर्बहुभिर्युक्तं परिखाभिश्च सर्वतः ।
प्रवेक्ष्यामि कथं लङ्कामिति चिन्तापरोऽभवत् ॥ ४१ ॥

रात्रौ वेक्ष्यामि सूक्ष्मोऽहं लङ्कां रावणपालिताम् ।
एवं विचिन्त्य तत्रैव स्थित्वा लङ्कां जगाम सः ॥ ४२ ॥

धृत्वा सूक्ष्मं वपुर्द्वारं प्रविवेश प्रतापवान् ।
तत्र लङ्कापुरी साक्षाद्राक्षसीवेषधारिणी ॥ ४३ ॥

प्रविशन्तं हनूमन्तं दृष्ट्वा लङ्का व्यतर्जयत् ।
कस्त्वं वानररूपेण मामनादृत्य लङ्किनीम् ॥ ४४ ॥

प्रविश्य चोरवद्रात्रौ किं भवान्कर्तुमिच्छति ।
इत्युक्त्वा रोषताम्राक्षी पादेनाभिजघान तम् ॥ ४५ ॥

हनुमानपि तां वाममुष्टिनावज्ञयाहनत् ।
तदैव पतिता भूमौ रक्तमुद्वमती भृशम् ॥ ४६ ॥

तो छायाग्रह म्हणजे सिंहिका नावाची एक भयंकर राक्षसी होती. ती नेहमी पाण्यामध्ये राहात असे. आकाशातून जाणाऱ्या प्राण्यांची छाया पकडून ती त्यांना खेचून घेई आणि त्यांना खाऊन टाकी. (३५)

तिने पकडल्यावर सामर्थ्यसंपन्न हनुमानाने विचार केला की, "माझ्या मार्गात विघ्न निर्माण करणाऱ्या कुणी बरे माझ्या वेगाला रोखून धरले आहे ? (३६)

येथे तर कुणीही दिसत नाही. त्यामुळे मला फार आश्चर्य वाटत आहे." असा विचार करून हनुमंताने आपली दृष्टी खालच्या बाजूला टाकली. (३७)

तेव्हा तेथे त्याला धिप्पाड शरीराची आणि भयंकर रूप असणारी सिंहिका दिसली. लगेच त्याने पाण्यात उडी मारली आणि रागाने तिला दोन्ही पायांनी लाथा घालून ठार केले. (३८)

नंतर पुनः वर आकाशात उड्डाण करून हनुमान दक्षिणेकडे तोंड करून निघाला आणि तो समुद्राच्या दक्षिण तीरावर पोचला. त्या तीरावर फळांनी भरलेले नाना प्रकारचे वृक्ष होते. नानाप्रकारचे पशू व पक्षी यांनी ते तीर भरलेले होते. तसेच ते विविध प्रकारच्या पुष्पलतांनी युक्त होते. त्यानंतर त्रिकूट पर्वताच्या माथ्यावर त्याला एक नगर दिसले. (३९-४०)

ते नगर अनेक तटांनी युक्त होते; ते तट सर्व बाजूंनी खंदकांनी वेढले होते. तेव्हा 'या लंका नगरीत कसा बरे प्रवेश करता येईल,' अशी चिंता मारुतीला लागली. (४१)

रावणाने पालन केलेल्या या लंकेत मी सूक्ष्म रूप धारण करून रात्रीच्या वेळी प्रवेश करीन, असा विचार करून, तो रात्र होईपर्यंत तेथेच थांबला आणि मग रात्र पडल्यावर लंकेकडे जाण्यास निघाला. (४२)

सूक्ष्म रूप धारण करून प्रतापी हनुमानाने लंकेच्या द्वारात प्रवेश केला. तेथे प्रत्यक्ष लंका नगरी ही राक्षसीचा वेष धारण करून उभी होती. (४३)

हनुमान प्रवेश करीत आहे हे पाहिल्यावर लंकेने त्याला दटावले. "मज लंकिनीचा अनादर करून, रात्री चोराप्रमाणे प्रवेश करणारा, वानराचे रूप धारण केलेला तू कोण आहेस? तुला काय पाहिजे ?" असे बोलून क्रोधाने डोळे लाल करून तिने त्या हनुमानाला आपल्या लाथेने तडाखा दिला. (४४-४५)

तेव्हा हनुमानानेसुद्धा आपल्या डाव्या हाताचा ठोसा तिला लगावला. तत्काळ खूप रक्त ओकीत ती जमिनीवर पडली. (४६)

उत्थाय प्राह सा लङ्का हनूमन्तं महाबलम् ।
हनूमन् गच्छ भद्रं ते जिता लङ्का त्वयानघ ॥ ४७ ॥

पुराहं ब्रह्मणा प्रोक्ता ह्यष्टाविंशतिपर्यये ।
त्रेतायुगे दाशरथी रामो नारायणोऽव्ययः ॥ ४८ ॥

जनिष्यते योगमाया सीता जनकवेश्मनि ।
भूभारहरणार्थाय प्रार्थितोऽयं मया क्वचित् ॥ ४९ ॥

सभार्यो राघवो भ्रात्रा गमिष्यति महावनम् ।
तत्र सीतां महामायां रावणोऽपहरिष्यति ॥ ५० ॥

पश्चाद्रामेण साचिव्यं सुग्रीवस्य भविष्यति ।
सुग्रीवो जानकीं द्रष्टुं वानरान्प्रेषयिष्यति ॥ ५१ ॥

तत्रैको वानरो रात्रावागमिष्यति तेऽन्तिकम् ।
त्वया च भर्त्सितः सोऽपि त्वां हनिष्यति मुष्टिना ॥ ५२ ॥

तेनाहता त्वं व्यथिता भविष्यसि यदानघे ।
तदैव रावणस्यान्तो भविष्यति न संशयः ॥ ५३ ॥

तस्मात्त्वया जिता लङ्का जितं सर्वं त्वयानघ ।
रावणान्तःपुरवरे क्रीडाकाननमुत्तमम् ॥ ५४ ॥

तन्मध्येऽशोकवनिका दिव्यपादपसङ्कुला ।
अस्ति तस्यां महावृक्षः शिंशपा नाम मध्यगः ॥ ५५ ॥

तत्रास्ते जानकी घोरराक्षसीभिः सुरक्षिता ।
दृष्ट्वैव गच्छ त्वरितं राघवाय निवेदय ॥ ५६ ॥

धन्याहमद्यैव चिराय राघव-
स्मृतिर्ममासीद्भवपाशमोचनी ।
सदुक्तसङ्गोऽप्यतिदुर्लभो मम
प्रसीदतां दाशरथिः सदा हृदि ॥ ५७ ॥

मग उठून उभी राहून ती लंका महाबली हनुमानाला म्हणाली, "हे हनुमाना, तू जा. तुझे कल्याण होवो. हे पुण्यशीला, तू लंकेला जिंकले आहेस. (४७)

पूर्वी मला ब्रह्मदेवांनी सांगितले होते की 'अठ्ठाविसाव्या चार युगाच्या पर्यायांतील त्रेतायुगामध्ये, अविनाशी नारायण हे दशरथाचे पुत्र श्रीराम या स्वरूपात जन्माला येतील; त्यांची योगमाया ही जनकाच्या घरी सीता होऊन जन्म घेईल. कारण पूर्वी भूमीचा भार हरण करण्याची प्रार्थना मी नारायणाला केली होती. (४८-४९)

श्रीराम आपली पत्नी व भाऊ यांचेसह घोर अरण्यात जातील. तेथे महामाया सीतेचे अपहरण रावण करील. (५०)

त्यानंतर श्रीरामांबरोबर सुग्रीवाचे सख्य होईल. आणि जानकीला शोधण्यासाठी सुग्रीव आपल्या वानरांना पाठवील. (५१)

त्यांतील एक वानर रात्रीच्या वेळी तुझ्याजवळ येईल. तू त्याची निर्भर्त्सना करशील, तेव्हा तोसुद्धा तुझ्यावर मुष्टिप्रहार करील. (५२)

हे निष्पाप स्त्रिये, त्या वानराने मुष्टिप्रहार केल्याने जेव्हा तू व्याकूळ होशील, तेव्हाच रावणाचा अंत होईल, यात संशय नाही.' (५३)

"ज्या अर्थी हे पावना, तू मज लंकेला जिंकले आहेस, त्या अर्थी तू आता सर्वांनाच जिंकले आहेस. आता मी सांगते ते ऐक. रावणाच्या श्रेष्ठ अंतःपुरात क्रीडा करण्यासाठी एक उत्तम उपवन आहे. (५४)

त्याच्या मध्यभागी दिव्य वृक्षांनी भरलेले अशोकवन आहे. त्याच्या मध्यभागी अशोकाचा एक विशाल वृक्ष आहे. (५५)

तेथे भयंकर राक्षसींच्या पहाऱ्यात सीता आहे. तिला भेटून तू त्वरित परत जा आणि श्रीराघवांना तिची वार्ता सांग. (५६)

बऱ्याच काळानंतर, संसाराचे पाशातून मुक्त करणारी श्रीरामांची स्मृती मला आली आहे. तसेच त्यांच्या भक्ताचा अतिशय दुर्लभ असा संग मला प्राप्त झाला म्हणून मी आज धन्य झाले. माझ्या हृदयात असणारे दशरथपुत्र श्रीराम माझ्यावर सदा प्रसन्न असोत." (५७)

उल्लङ्घितेऽब्धौ पवनात्मजेन
धरासुतायाश्च दशाननस्य ।
पुस्फोर वामाक्षि भुजश्च तीव्रं
रामस्य दक्षाङ्गमतीन्द्रियस्य ॥ ५८ ॥

पवनसुत हनुमानाने समुद्र ओलांडला. त्या क्षणीच भूमिकन्या सीता आणि रावण यांचा डावा डोळा आणि बाहू हे जोराने स्फुरण पावू लागले, तर अतींद्रिय अशा श्रीरामांचे उजवे अंग स्फुरण पावू लागले. (५८)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुंदरकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीय सर्ग

हनुमानाचे अशोकवनात गमन आणि रावणाने सीतेला भीती दाखवणे

श्रीमहादेव उवाच

ततो जगाम हनुमान् लङ्कां परमशोभनाम् ।
रात्रौ सूक्ष्मतनुर्भूत्वा बभ्राम परितः पुरीम् ॥ १ ॥

श्रीमहादेव म्हणाले– हे पार्वती, त्यानंतर अतिशय शोभिवंत असणाऱ्या लंकेत हनुमान शिरला आणि सूक्ष्म शरीर धारण करून तो रात्रीच्या वेळी लंका नगरीत सर्वत्र फिरू लागला. (१)

सीतान्वेषणकार्यार्थी प्रविवेश नृपालयम् ।
तत्र सर्वप्रदेशेषु विविच्य हनुमान्कपिः ॥ २ ॥

सीतेचा शोध घेण्याचे कार्य करण्याची इच्छा असल्याने त्याने राजवाड्यात प्रवेश केला. तेथे सर्व ठिकाणी शोध केल्यावरसुद्धा जेव्हा हनुमानाला सीता दिसली नाही, तेव्हा त्याला लंकेचे शब्द आठवले आणि मग तो त्वरेने मनोहर अशा अशोकवाटिकेत गेला. (२-३)

नापश्यज्जानकीं स्मृत्वा ततो लङ्काभिभाषितम् ।
जगाम हनुमान् शीघ्रमशोकवनिकां शुभाम् ॥ ३ ॥

सुरपादपसम्बाधां रत्नसोपानवापिकाम् ।
नानापक्षिमृगाकीर्णां स्वर्णप्रासादशोभिताम् ॥ ४ ॥

ती अशोक वाटिका कल्पवृक्षांनी भरलेली होती. तेथे रत्नांच्या पायऱ्या असणाऱ्या विहिरी होत्या. नाना प्रकारचे पक्षी आणि पशू तेथे फिरत होते. ती एका सुवर्ण-प्रासादाने शोभिवंत झाली होती. फळांच्या भारामुळे ज्यांच्या शाखांची टोके खाली लवलेली होती अशा वृक्षांनी ती वेढलेली होती. तेथे प्रत्येक वृक्षाच्या खाली जानकी आहे का, असा शोध वायुसुताने घेतला. (४-५)

फलैरानम्रशाखाग्रपादपैः परिवारिताम् ।
विचिन्वन् जानकीं तत्र प्रतिवृक्षं मरुत्सुतः ॥ ५ ॥

ददर्शाभ्रंलिहं तत्र चैत्यप्रासादमुत्तमम् ।
दृष्ट्वा विस्मयमापन्नो मणिस्तम्भशतान्वितम् ॥ ६ ॥

तेथे त्याला एक उत्तम देव मंदिर दिसले; त्याचे शिखर आकाशाला भिडलेले होते आणि त्याला रत्नजडित शेकडो खांब होते. ते पाहून हनुमान आश्चर्यचकित झाला. (६)

समतीत्य पुनर्गत्वा किञ्चिद्दूरं स मारुतिः ।
ददर्श शिंशपावृक्षमत्यन्तनिबिडच्छदम् ॥ ७ ॥

ते मंदिर ओलांडून पुनः पुढे काहीसे दूर गेल्यावर मारुतीला एक अशोक वृक्ष दिसला; त्या वृक्षाची पाने अतिशय घनदाट होती; त्याच्या खाली सूर्याचे ऊन येत नव्हते; आणि वृक्ष सोनेरी पक्ष्यांनी भरलेला होता. त्या वृक्षाच्या मुळाशी जनक-कन्या सीता वीर हनुमानाला दिसली; ती राक्षसींच्या वेढ्यात असली तरी; पृथ्वीवरील देवतेप्रमाणे दिसत होती; तिने एक वेणी घातली होती.

अहृद्यातपमाकीर्णं स्वर्णवर्णविहङ्गमम् ।
तन्मूले राक्षसीमध्ये स्थितां जनकनन्दिनीम् ॥ ८ ॥

ददर्श हनुमान् वीरो देवतामिव भूतले ।
एकवेणीं कृशां दीनां मलिनाम्बरधारिणीम् ॥ ९ ॥

भूमौ शयानां शोचन्तीं रामरामेति भाषिणीम् ।
त्रातारं नाधिगच्छन्तीमुपवासकृशां शुभाम् ॥ १० ॥

शाखान्तच्छदमध्यस्थो ददर्श कपिकुञ्जरः ।
कृतार्थोऽहं कृतार्थोऽहं दृष्ट्वा जनकनन्दिनीम् ॥ ११ ॥

मयैव साधितं कार्यं रामस्य परमात्मनः ।
ततः किलकिलाशब्दो बभूवान्तःपुराद्बहिः ॥ १२ ॥

किमेतदिति सँल्लीनो वृक्षपत्रेषु मारुतिः ।
आयान्तं रावणं तत्र स्त्रीजनैः परिवारितम् ॥ १३ ॥

दशास्यं विंशतिभुजं नीलाञ्जनचयोपमम् ।
दृष्ट्वा विस्मयमापन्नः पत्रखण्डेष्वलीयत ॥ १४ ॥

रावणो राघवेणाशु मरणं मे कथं भवेत् ।
सीतार्थमपि नायाति रामः किं कारणं भवेत् ॥ १५ ॥

इत्येवं चिन्तयन्नित्यं राममेव सदा हृदि ।
तस्मिन्दिनेऽपरात्रौ रावणो राक्षसाधिपः ॥ १६ ॥

स्वप्ने रामेण सन्दिष्टः कश्चिदागत्य वानरः ।
कामरूपधरः सूक्ष्मो वृक्षाग्रस्थोऽनुपश्यति ॥ १७ ॥

इति दृष्ट्वाद्भुतं स्वप्नं स्वात्मन्येवानुचिन्त्य सः ।
स्वप्नः कदाचित्सत्यः स्यादेवं तत्र करोम्यहम् ॥ १८ ॥

जानकीं वाक्शरैर्विद्ध्वा दुःखितां नितरामहम् ।
करोमि दृष्ट्वा रामाय निवेदयतु वानरः ॥ १९ ॥

इत्येवं चिन्तयन्सीतासमीपमगमद्द्रुतम् ।
नूपुराणां किङ्किणीनां श्रुत्वा शिञ्जितमङ्गना ॥ २० ॥

सीता भीता लीयमाना स्वात्मन्येव सुमध्यमा ।
अधोमुख्यश्रुनयना स्थिता रामार्पितान्तरा ॥ २१ ॥

आणि मळके वस्त्र परिधान केले होते; कृश आणि दीन अशी ती जमिनीवर पडून , 'राम राम' म्हणत शोक करीत होती; कोणी आपले रक्षण करील असे तिला वाटत नव्हते; ती उपवासाने कृश झाली असली तरीही सुंदर होती. (७-१०)

वृक्षाच्या फांदीच्या पानामध्ये दडलेल्या कपिश्रेष्ठाने जनक नंदिनीला पाहिले. "आज आपण कृतार्थ झालो, परमात्म्या श्रीरामांचे कार्य माझ्याकडूनच घडले," असे त्याला वाटले. त्याच वेळी रावणाच्या अंतःपुरातून हलकल्लोळ येऊ लागला. (११-१२)

हे काय असेल बरे ? असा विचार करीत मारुती झाडाच्या पानांआड दडून राहिला. तेव्हा तेथे स्त्रियांसमवेत बाहेर येणारा रावण त्याला दिसला. (१३)

त्या रावणाला दहा तोंडे व वीस भुजा होत्या. काजळाच्या राशीप्रमाणे त्याचे शरीर काळे होते. त्याला पाहून मारुती विस्मित झाला आणि त्या दुष्टाचे तोंडही पाहणे टाळण्यासाठी तो पानांच्या आड लपून बसला. (१४)

श्रीराघवांच्या हातून मला लवकर मरण कसे बरे येईल ? सीतेसाठीसुद्धा श्रीराम अद्यापि येथे आले नाहीत, याचे काय कारण असेल बरे ? असे सदा श्रीरामांचेच मनात चिंतन करणाऱ्या राक्षसराज रावणाने त्याच दिवशी मध्यरात्रीनंतर एक स्वप्न पाहिले होते. त्या स्वप्नांत श्रीरामांचा संदेश घेऊन कोणी एक वानर आला होता, आणि इच्छेप्रमाणे रूप धारण करणारा तो सूक्ष्म शरीराने झाडाच्या शेंड्यावर बसून सर्व काही पाहात होता, असे त्याला दिसले होते. (१५-१७)

असे अद्‌भुत स्वप्न पाहिल्यावर त्याने मनात विचार केला की कदाचित हे स्वप्न सत्य होईल. तेव्हा त्या बाबतीत मी आता असे करतो की, (अशोक वनात जाऊन) जानकीला माझ्या वाग्बाणांनी विद्ध करून अतिशय दुःखी करतो, मग ते पाहून तो वानर श्रीरामांना निवेदन करील. (१८-१९)

असा विचार करीत तो त्वरित सीतेच्याजवळ गेला. त्या वेळी (रावणाबरोबर असणाऱ्या राक्षसींच्या) नूपुरांचा आणि किंकिणींचा आवाज ऐकल्यावर, सुंदर कटी असणारी सीता भ्याली आणि स्वतःला सावरून घेऊन ती अधोमुख बसली. त्या वेळी तिच्या डोळ्यांत अश्रू आले होते आणि तिचे मन श्रीरामांच्या ठिकाणी लागले होते. (२०-२१)

रावणोऽपि तदा सीतामालोक्याह सुमध्यमे ।
मां दृष्ट्वा किं वृथा सुभ्रु स्वात्मन्येव विलीयसे ॥ २२ ॥

रामो वनचराणां हि मध्ये तिष्ठति सानुजः ।
कदाचिद्दृश्यते कैश्चित्कदाचिन्नैव दृश्यते ॥ २३ ॥

मया तु बहुधा लोकाः प्रेषितास्तस्य दर्शने ।
न पश्यन्ति प्रयत्नेन वीक्षमाणाः समन्ततः ॥ २४ ॥

किं करिष्यसि रामेण निःस्पृहेण सदा त्वयि ।
त्वया सदालिङ्गितोऽपि समीपस्थोऽपि सर्वदा ॥ २५ ॥

हृदयेऽस्य न च स्नेहस्त्वयि रामस्य जायते ।
त्वकृतान्सर्वभोगांश्च त्वद्गुणाननपि राघवः ॥ २६ ॥

भुञ्जानोऽपि न जानाति कृतघ्नो निर्गुणोऽधमः ।
त्वमानीता मया साध्वी दुःखशोकसमाकुला ॥ २७ ॥

इदानीमपि नायाति भक्तिहीनः कथं व्रजेत् ।
निःसत्त्वो निर्ममो मानी मूढः पण्डितमानवान् ॥ २८ ॥

नराधमं त्वद्विमुखं किं करिष्यसि भामिनि ।
त्वय्यतीव समासक्तं मां भजस्वासुरोत्तमम् ॥ २९ ॥

त्या वेळी रावणानेसुद्धा सीतेला पाहून म्हटले. "हे सुंदरी, मला पाहून तू उगीचच अंग सावरून बसली आहेस. (२२)

आपल्या लहान भावासह राम वनचरांच्यामध्ये राहात आहे. कधी तो काही लोकांना दिसतो तर कधी तो दिसत नाही . (२३)

त्याला पाहण्यासाठी मी अनेक जणांना पाठवित होते. परंतु पुष्कळ प्रयत्न करूनही, सगळीकडे शोधूनसुद्धा तो त्यांना दिसला नाही. (२४)

जो तुझ्या बाबतीत सदा उदासीन आहे, तो तुझ्या काय कामाचा ? जरी तो नेहमी तुझ्याजवळ होता आणि तू त्याला सदा आलिंगन देत होतीस, तरी त्याच्या हृदयात तुझ्याविषयी प्रेम निर्माण झाले नाही. तुझ्याकडून प्राप्त झालेले सर्व भोग आणि तुझे गुण या सर्वांचा जरी तो उपभोग घेत होता, तरी त्या कृतघ्न, गुणरहित आणि अधम रामाला त्यांची जाणीव नाही. तुला मी पळवून आणले. तू साध्वी स्त्री दुःखमग्न आणि शोकमग्न झालीस तरीसुद्धा तो अद्यापि इकडे येत नाही. तुझ्याविषयी त्याला प्रीती नसल्यामुळे तो कसा बरे इकडे येईल ? तो संपूर्णपणे शक्तिहीन, ममताशून्य, अभिमानी, मूर्ख आणि स्वतःला पंडित समजणारा आहे. (२५-२८)

हे सुंदरी, तुझ्याशी विन्मुख झालेल्या त्या नराधमाशी तुला काय करायचे आहे ?* याउलट मी असुरश्रेष्ठ तुझ्या ठिकाणी अतिशय आसक्त आहे. तू माझा अंगीकार कर. (२९)

* येथे २३ व्या श्लोकापासून २८ व्या श्लोकापर्यंत रावणाने अध्याहृतपणाने निंदेच्या मिषाने भगवान रामांची स्तुती केली आहे, तिचे तात्पर्य असे आहे :- राम आपल्या भावासह वनवासी तपस्वी लोकांमध्ये राहात आहे. त्यांतील काही तपस्व्यांना तो कधी ध्यान धारणा इत्यादींच्या द्वारा दिसून येतो, तर कधी तो ध्यान धारणा करूनही दिसून येत नाही (२३). त्याचा साक्षात्कार करून घेण्यास मी अनेकदा माझी इंद्रिये त्याच्या ठिकाणी लावली होती; परंतु खूप प्रयत्न करूनसुद्धा मला साक्षात्कार कधीच झाला नाही (२४). (तू साक्षात् योगमाया आहेस; परब्रह्म रामाबरोबर तुझा सदा सहवास आहे. आणि त्याच्याशी तुझे तादात्म्यसुद्धा आहे. परंतु) तो मात्र सदा निःस्पृह आणि असंग असतो; उदासीन असतो. (२५). निःस्पृह आणि असंग असल्याने त्या परब्रह्मरूप रामाला मायारूपी तुझ्याकडून कधीही बंधन येत नाही आणि तुझ्या- मायेच्या- गुणांत अथवा भोगांत तो अडकत नाही (२६). सांख्यमताचे लोक त्याला उपचाराने भोक्ता असेही म्हणतात. तथापि त्यांच्या मतानुसार **जहात्येनां भुक्तभोगामजोऽन्य** या श्रुतीला अनुसरून तो 'मी भोक्ता आहे' असा अभिमान धारण करीत नाही, अशा प्रकारे तो कृतघ्न (केलेल्या कर्माचा नाश करणारा), निर्गुण (सत्त्व, रज, व तम या तीन गुणांनी रहित) आणि अधम (जो धमत नाही म्हणजे शब्दांचा विषय होत नाही म्हणजे अशब्द असासुद्धा) आहे (२७). त्याची मायेवर प्रीती नाही; म्हणून तो आत्तापर्यंत आला नाही. याचेद्वारा रावण स्वतः म्हणतो की अजूनसुद्धा राम माझ्या हृदयात येत नाही; कारण मी भक्तिहीन असल्याने माझे हृदय त्याच्यापर्यंत कसे बरे पोचेल ? तो निर्गुण, ममतारहित, अमानी, मूढ (म्= शिव+ उ=ब्रह्मदेव, ताभ्यां ऊढः ध्यानविषयाप्रत नेलेला म्हणजे शिव आणि ब्रह्मदेव यांना ध्येय म्हणून असणारा) आणि विद्वानांकडून सन्मानित असा आहे (२८).आणखी असे की नराधम (=नराः अधमाः यस्मात् स नराधमः) म्हणजे ज्याच्यापेक्षा माणसे अधम आहेत म्हणजे पुरुषोत्तम. विन्मुख याचा अर्थ मायेला पराङ्मुख.

देवगन्धर्वनागानां यक्षकिन्नरयोषिताम् ।
भविष्यसि नियोक्त्री त्वं यदि मां प्रतिपद्यसे ॥ ३० ॥

रावणस्य वचः श्रुत्वा सीतामर्षसमन्विता ।
उवाचाधोमुखी भूत्वा निधाय तृणमन्तरे ॥ ३१ ॥

राघवाद्विभ्यता नूनं भिक्षुरूपं त्वया धृतम् ।
रहिते राघवाभ्यां त्वं शुनीव हविरध्वरे ॥ ३२ ॥

हृतवानसि मां नीच तत्फलं प्राप्स्यसेऽचिरात् ।
यदा रामशराघातविदारितवपुर्भवान् ॥ ३३ ॥

ज्ञास्यसेऽमानुषं रामं गमिष्यसि यमान्तिकम् ।
समुद्रं शोषयित्वा वा शरैर्बद्ध्वाथ वारिधिम् ॥ ३४ ॥

हन्तुं त्वां समरे रामो लक्ष्मणेन समन्वितः ।
आगमिष्यत्यसन्देहो द्रक्ष्यसे राक्षसाधम ॥ ३५ ॥

त्वां सपुत्रं सहबलं हत्वा नेष्यति मां पुरम् ।
श्रुत्वा रक्षःपतिः क्रुद्धो जानक्याः परुषाक्षरम् ॥ ३६ ॥

वाक्यं क्रोधसमाविष्टः खड्गमुद्यम्य सत्वरः ।
हन्तुं जनकराजस्य तनयां ताम्रलोचनः ॥ ३७ ॥

मन्दोदरी निवार्याह पतिं पतिहिते रता ।
त्यजैनां मानुषीं दीनां दुःखितां कृपणां कृशाम् ॥ ३८ ॥

देवगन्धर्वनागानां बह्व्यः सन्ति वराङ्गनाः ।
त्वामेव वरयन्त्युच्चैर्मदमत्तविलोचनाः ॥ ३९ ॥

ततोऽब्रवीद्दशग्रीवो राक्षसीर्विकृताननाः ।
यथा मे वशगा सीता भविष्यति सकामना ।
तथा यतध्वं त्वरितं तर्जनादरणादिभिः ॥ ४० ॥

जर तू माझा स्वीकार करशील तर तू देव, गंधर्व नाग, यक्ष आणि किन्नर यांच्या स्त्रियांवर अधिकार गाजवशील." (३०)

रावणाचे वचन ऐकल्यावर सीतेला अतिशय क्रोध आला. अधोमुख होऊन आणि मध्ये तृण ठेवून* ती म्हणाली. (३१)

"अरे नीचा, निःसंशय श्रीराघवांना भ्याल्यामुळे तू खरोखर भिक्षूचे रूप धारण केलेस आणि एखादी कुत्री ज्या प्रमाणे यज्ञातून हवी घेऊन जाते, त्या प्रमाणे श्रीराम व लक्ष्मण हे दोघेही उपस्थित नसताना, तू माझे अपहरण केलेस. लौकरच त्याचे फळ तुला भोगावे लागेल. ज्या वेळी रामांच्या बाणाच्या प्रहारांनी तुझे शरीर विदीर्ण होऊन, तू यमसदनास जाशील, त्या वेळी श्रीराम हे अमानव कसे आहेत, हे तुला कळेल. अरे अधम राक्षसा, समुद्राला कोरडा करून अथवा समुद्रावर बाणांनी सेतू बांधून, लक्ष्मणासह श्रीराम तुला युद्धात ठार करण्यास येतील, हे तू लौकरच पाहाशील, यात शंका नाही. (३२-३५)

तुझे पुत्र आणि सैन्य यांच्यासह तुला ठार करून श्रीराम मला अयोध्या नगरीला घेऊन जातील." जानकीचे कठोर शब्द असणारे हे वाक्य ऐकून राक्षसांचा राजा रावण क्रुद्ध झाला आणि डोळे लाल झाले. तो सत्वर तलवार उपसून जनक राजाच्या कन्येला ठार करण्यास सिद्ध झाला. (३६-३७)

तितक्यात पतीचे हित करण्यात तत्पर असलेल्या महाराणी मंदोदरीने आपल्या पतीला अडविले आणि ती म्हणाली, "या दीन, दुःखी, भयभीत, कृश अशा मानवी स्त्रीला सोडून द्या. (३८)

देव, गंधर्व आणि नाग यांच्या अनेक सुंदर स्त्रिया आहेत आणि तारुण्यमदाने ज्यांचे डोळे धुंद झाले आहेत अशा त्या स्त्रिया तुम्हांलाच वरण्यास फार उत्सुक आहेत." (३९)

तेव्हा विकराल तोंडे असणाऱ्या राक्षसींना रावण म्हणाला, "भीती किंवा आदर इत्यादी कोणत्याही उपायाने ही सीता माझी अभिलाषा धरून त्वरित मला वश होईल असे काही तरी प्रयत्न करा. (४०)

* पतिव्रता स्त्रीने परपुरुषाबरोबर प्रत्यक्ष वार्तालाप करावयाचा नसतो. जर काही अनिवार्य प्रसंग आलाच, तरीसुद्धा लज्जादी जड वा अचेतन वस्तू मध्ये ठेवावयास हवी. या नियमाला अनुसरूनच सीतेने मध्ये तृण ठेवले.

द्विमासाभ्यन्तरे सीता यदि मे वशगा भवेत् ।
तदा सर्वसुखोपेता राज्यं भोक्ष्यति सा मया ॥ ४१ ॥

यदि मासद्वयादूर्ध्वं मच्छय्यां नाभिनन्दति ।
तदा मे प्रातराशाय हत्वा कुरुत मानुषीम् ॥ ४२ ॥

इत्युक्त्वा प्रययौ स्त्रीभी रावणोऽन्तःपुरालयम् ।
राक्षस्यो जानकीमेत्य भीषयन्त्यः स्वतर्जनैः ॥ ४३ ॥

तत्रैका जानकीमाह यौवनं ते वृथा गतम् ।
रावणेन समासाद्य सफलं तु भविष्यति ॥ ४४ ॥

अपरा चाह कोपेन किं विलम्बेन जानकि ।
इदानीं छेद्यतामङ्गं विभज्य च पृथक् पृथक् ॥ ४५ ॥

अन्या तु खड्गमुद्यम्य जानकीं हन्तुमुद्यता ।
अन्या करालवदना विदार्यास्यमभीषयत् ॥ ४६ ॥

एवं तां भीषयन्तीस्ता राक्षसीर्विकृताननाः ।
निवार्य त्रिजटा वृद्धा राक्षसी वाक्यमब्रवीत् ॥ ४७ ॥

शृणुध्वं दुष्टराक्षस्यो मद्वाक्यं वो हितं भवेत् ॥ ४८ ॥

न भीषयध्वं रुदतीं नमस्कुरुत जानकीम् ।
इदानीमेव मे स्वप्ने रामः कमललोचनः ॥ ४९ ॥

आरुह्यैरावतं शुभ्रं लक्ष्मणेन समागतः ।
दग्ध्वा लङ्कापुरीं सर्वां हत्वा रावणमाहवे ॥ ५० ॥

आरोप्य जानकीं स्वाङ्के स्थितो दृष्टोऽगमूर्धनि ।
रावणो गोमयह्रदे तैलाभ्यक्तो दिगम्बरः ॥ ५१ ॥

अगाहत्पुत्रपौत्रैश्च कृत्वा वदनमालिकाम् ।
बिभीषणस्तु रामस्य सन्निधौ हृष्टमानसः ॥ ५२ ॥

सेवां करोति रामस्य पादयोर्भक्तिसंयुतः ।
सर्वथा रावणं रामो हत्वा सकुलमञ्जसा ॥ ५३ ॥

दोन महिन्यांच्या आत जर सीता मला वश झाली तर सर्व सुखे प्राप्त करून घेऊन ती माझ्यासह राज्याचा उपभोग घेईल. (४१)

आणि जर दोन महिन्यानंतर तिने माझ्या शय्येवर येण्याचे मान्य केले नाही, तर या मानव स्त्रीला ठार करून माझ्या सकाळच्या न्याहारीची व्यवस्था करा." (४२)

असे बोलून आपल्या स्त्रियांसह रावण अंतःपुरातील निवासाकडे निघून गेला. इकडे जानकीजवळ येऊन राक्षसी आपापल्या विविध उपायांनी तिला भिवडू लागल्या. (४३)

तेव्हा त्यातील एक राक्षसी जानकीला म्हणाली, "तुझे तारुण्य फुकट जात आहे. रावणाचा स्वीकार केल्याने ते तारुण्य सफल होईल." (४४)

दुसरी राक्षसी क्रोधाने म्हणाली, "अग जानकी, रावणाचे म्हणणे मान्य करण्यास कशाला फुकट विलंब करतेस?" तिसरी राक्षसी तरवार उगारून जानकीला ठार करण्यास तयार होऊन म्हणाली, " आता हिचे शरीर तोडून त्याचे वेगवेगळे तुकडे करू या." तर आणखी एक भयंकर तोंड असणारी राक्षसी आपले तोंड उघडून जानकीला भिवडू लागली. (४५-४६)

अशा प्रकारे सीतेला भिवविणाऱ्या त्या विकृत तोंडाच्या राक्षसींचे निवारण करून त्रिजटा नावाची एक म्हातारी राक्षसी म्हणाली. (४७)

"हे दुष्ट राक्षसींनो, माझे वचन ऐका. त्यामुळे तुमचे हित होईल. (४८)

या रडणाऱ्या जानकीला तुम्ही भिववू नका. तुम्ही तिला नमस्कार करा. लक्ष्मणासह पांढऱ्या शुभ्र ऐरावतावर आरोहण करून, कमलनयन श्रीराम आताच माझ्या स्वप्नात आले होते. संपूर्ण लंकापुरी जाळून टाकून, युद्धामध्ये रावणाचा वध करून आणि जानकीला आपल्या मांडीवर बसवून, पर्वताच्या शिखरावर बसलेले श्रीराम मला स्वप्नात दिसले. याउलट तेलाने माखलेला, वस्त्ररहित रावण गळ्यात रुंडमाळा घालून, आपल्या पुत्रपौत्रांसह शेणाच्या खड्ड्यात बुडाला आहे व संतुष्ट मनाचा बिभीषण श्रीरामांजवळ बसून भक्तिपूर्वक रामांच्या पायांची सेवा करीत आहे, असे मी पाहिले. तेव्हा कुळासकट रावणाचा संपूर्ण नाश विनासायास करून बिभीषणाला लंकेचे आधिपत्य देऊन, आणि

विभीषणायाधिपत्यं दत्त्वा सीतां शुभाननाम् ।
अङ्के निधाय स्वपुरीं गमिष्यति न संशयः ॥ ५४ ॥

शुभवदना सीतेला मांडीवर बसवून श्रीराम स्वतःच्या नगरीला जातील, यात संशय नाही." (४९-५४)

त्रिजटाया वचः श्रुत्वा भीतास्ता राक्षसस्त्रियः ।
तूष्णीमासंस्तत्र तत्र निद्रावशमुपागताः ॥ ५५ ॥

त्रिजटेचे वचन ऐकल्यावर, भ्यालेल्या त्या राक्षस स्त्रिया गप्प बसल्या आणि हळू हळू झोपी गेल्या. (५५)

तर्जिता राक्षसीभिः सा सीता भीतातिविह्वला ।
त्रातारं नाधिगच्छन्ती दुःखेन परिमूर्च्छिता ॥ ५६ ॥

राक्षसींच्या भिवविण्यामुळे भ्यालेली सीता अतिशय विव्हल झाली. आपले रक्षण करणारा येथे कोणी नाही असे वाटून अतिशय दुःखाने ती मूर्च्छित पडली. (५६)

अश्रुभिः पूर्णनयना चिन्तयन्तीदमब्रवीत् ।
प्रभाते भक्षयिष्यन्ति राक्षस्यो मां न संशयः ।
इदानीमेव मरणं केनोपायेन मे भवेत् ॥ ५७ ॥

मग शुद्धीवर आल्यावर अश्रूंनी डोळे भरलेली आणि चिंता करणारी ती असे म्हणाली, "सकाळी या राक्षसी मला खाऊन टाकतील, यात संशय नाही. तेव्हा कोणत्या उपायाने मला आत्ताच मरण येईल बरे ?" (५७)

एवं सुदुःखेन परिप्लुता सा
विमुक्तकण्ठं रुदती चिराय ।
आलम्ब्य शाखां कृतनिश्चया मृतौ
न जानती कञ्चिदुपायमङ्गना ॥ ५८ ॥

अशा प्रकारे तिने जरी मरणाचा निश्चय केला होता, तरी त्यासाठी कोणताही उपाय न सापडल्याने ती सुंदरी वृक्षाची फांदी पकडून अतिशय दुःखाने बराच काळ मुक्त कंठाने रडत राहिली. (५८)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीय सर्ग

जानकीची भेट, अशोकवनाचा विध्वंस आणि ब्रह्मपाशात बंधन

श्रीमहादेव उवाच

उद्बन्धनेन वा मोक्ष्ये शरीरं राघवं विना ।
जीवितेन फलं किं स्यान्मम रक्षोऽधिमध्यतः ॥ १ ॥

श्रीमहादेव म्हणाले– हे पार्वती, रडताना सीतेने विचार केला की 'आता गळफास लावून मी शरीराचा त्याग करते. राक्षसींच्या गराड्यात रामाविना माझ्या जगण्याचा काय उपयोग आहे बरे ? (१)

दीर्घा वेणी ममात्यर्थमुद्बन्धाय भविष्यति ।
एवं निश्चितबुद्धिं तां मरणायाथ जानकीम् ॥ २ ॥

गळफास लावण्यास ही माझी लांब वेणी मला अतिशय उपयोगी पडेल.' अशा प्रकारे मरण्याचा निश्चय केलेल्या जानकीला पाहून, हनुमानाने थोडा विचार केला आणि सूक्ष्मरूपाने त्याने जानकीच्या कानापर्यंत पोचेल अशा मंद आवाजात हळूहळू बोलण्यास प्रारंभ केला. (२-३)

विलोक्य हनुमान्किञ्चिद्विचार्यैतदभाषत ।
शनैः शनैः सूक्ष्मरूपो जानक्याः श्रोत्रगं वचः ॥ ३ ॥

इक्ष्वाकुवंशसम्भूतो राजा दशरथो महान् ।
अयोध्याधिपतिस्तस्य चत्वारो लोकविश्रुताः ॥ ४ ॥

"इक्ष्वाकूच्या वंशात उत्पन्न झालेले, अयोध्या नगरीचे अधिपती, राजा दशरथ हे महान प्रतापी होते. त्यांचे चार पुत्र जगात विख्यात आहेत. (४)

पुत्रा देवसमाः सर्वे लक्षणैरुपलक्षिताः ।
रामश्च लक्ष्मणश्चैव भरतश्चैव शत्रुहा ॥ ५ ॥

राम, लक्ष्मण, भरत आणि शत्रुघ्न असे ते सर्व पुत्र शुभ लक्षणांनी युक्त आणि देवतुल्य आहेत. (५)

ज्येष्ठो रामः पितुर्वाक्याद्दण्डकारण्यमागतः ।
लक्ष्मणेन सह भ्रात्रा सीतया भार्यया सह ॥ ६ ॥

त्यांतील ज्येष्ठ पुत्र श्रीराम हे लक्ष्मण या भावासह आणि पत्नी सीता हिच्यासह पित्याच्या आज्ञेने दंडकारण्यात आले. (६)

उवास गौतमीतीरे पञ्चवट्यां महामनाः ।
तत्र नीता महाभागा सीता जनकनन्दिनी ॥ ७ ॥

थोर मनाचे श्रीराम गौतमी नदीच्या तीरावरील पंचवटीमध्ये राहात होते. तेथे असताना, श्रीरामचंद्र जेव्हा आश्रमात नव्हते, तेव्हा दुरात्म्या रावणाने महाभागा जनककन्या सीतेला पळवून नेले. त्यानंतर अतिशय दुःखविव्हल होऊन, जानकीचा शोध करणाऱ्या श्रीरामांना जमिनीवर मरणोन्मुख होऊन पडलेला पक्षिराज जटायू दिसला. त्या जटायूला स्वर्गात पोचवून, श्रीराम त्वरित ऋष्यमूक पर्वताजवळ आले. आत्मरूप जाणणाऱ्या श्रीरामांना स्वतःची परिस्थिती सांगून सुग्रीवाने त्यांच्याशी मैत्री केली. सुग्रीवाच्या भार्येचे हरण करणाऱ्या वालीचा वध करून व सुग्रीवाला राज्याभिषेक करून, रघुनंदन श्रीरामांनी आपल्या मित्राचे कार्य केले. मग वानरराज सुग्रीवाने अनेक वानरांना एकत्र बोलावून सीतेच्या शोधासाठी त्यांना सगळीकडे पाठविले. त्या वानरांपैकी मी एक वानर आहे आणि मी सुग्रीवाचा मंत्री आहे. (७-१२)

रहिते रामचन्द्रेण रावणेन दुरात्मना ।
ततो रामोऽतिदुःखार्तो मार्गमाणोऽथ जानकीम् ॥ ८ ॥

जटायुषं पक्षिराजमपश्यत्पतितं भुवि ।
तस्मै दत्त्वा दिवं शीघ्रमृष्यमूकमुपागमत् ॥ ९ ॥

सुग्रीवेण कृता मैत्री रामस्य विदितात्मनः ।
तद्भार्याहारिणं हत्वा वालिनं रघुनन्दनः ॥ १० ॥

राज्येऽभिषिच्य सुग्रीवं मित्रकार्यं चकार सः ।
सुग्रीवस्तु समानाय्य वानरान्वानरप्रभुः ॥ ११ ॥

प्रेषयामास परितो वानरान्परिमार्गणे ।
सीतायास्तत्र चैकोऽहं सुग्रीवसचिवो हरिः ॥ १२ ॥

त्यानंतर संपातीच्या कथनानुसार शत योजने विस्तीर्ण असणारा समुद्र सत्वर ओलांडून लंकापुरीत येऊन, मी शुभलक्षणी जानकीचा शोध करू लागलो. नंतर हळूहळू अशोकवनात शोध घेताना मला एक अशोकाचा वृक्ष दिसला आणि त्या वृक्षाखाली दुःखात बुडालेली, शोक करणारी, श्रीरामांची पट्टराणी देवी जानकी मला दिसली. तिला पाहिल्यावर मी आता कृतकृत्य होऊन गेलो आहे." असे बोलून तो अतिशय बुद्धिमान मारुती गप्प बसला. (१३-१५)

सम्पातिवचनाच्छीघ्रमुल्लङ्घ्य शतयोजनम् ।
समुद्रं नगरीं लङ्कां विचिन्वञ्जानकीं शुभाम् ॥ १३ ॥

शनैरशोकवनिकां विचिन्वञ् शिंशपातरुम् ।
अद्राक्षं जानकीमत्र शोचन्तीं दुःखसम्प्लुताम् ॥ १४ ॥

रामस्य महिषीं देवीं कृतकृत्योऽहमागतः ।
इत्युक्त्वोपररामाथ मारुतिर्बुद्धिमत्तरः ॥ १५ ॥

क्रमाने ते सर्व ऐकल्यावर सीतेला विस्मय वाटला. 'मी हे काय ऐकले ? हे वचन आकाशात वायूने उच्चारले काय ? की हे स्वप्न आहे ? की माझ्या मनाला

सीता क्रमेण तत्सर्वं श्रुत्वा विस्मयमाययौ ।
किमिदं मे श्रुतं व्योम्नि वायुना समुदीरितम् ॥ १६ ॥

स्वप्नो वा मे मनोभ्रान्तिर्यदि वा सत्यमेव तत् ।
निद्रा मे नास्ति दुःखेन जानाम्येतत्कुतो भ्रमः ॥ १७ ॥

येन मे कर्णपीयूषं वचनं समुदीरितम् ।
स दृश्यतां महाभागः प्रियवादी ममाग्रतः ॥ १८ ॥

श्रुत्वा तज्जानकीवाक्यं हनुमान्पत्रखण्डतः ।
अवतीर्य शनैः सीतापुरतः समवस्थितः ॥ १९ ॥

कलविङ्कप्रमाणाङ्गो रक्तास्यः पीतवानरः ।
ननाम शनकैः सीतां प्राञ्जलिः पुरतः स्थितः ॥ २० ॥

दृष्ट्वा तं जानकी भीता रावणोऽयमुपागतः ।
मां मोहयितुमायातो मायया वानराकृतिः ॥ २१ ॥

इत्येवं चिन्तयित्वा सा तूष्णीमासीदधोमुखी ।
पुनरप्याह तां सीतां देवि यत्त्वं विशङ्कसे ॥ २२ ॥

नाहं तथाविधो मातस्त्यज शङ्कां मयि स्थिताम् ।
दासोऽहं कोसलेन्द्रस्य रामस्य परमात्मनः ॥ २३ ॥

सचिवोऽहं हरीन्द्रस्य सुग्रीवस्य शुभप्रदे ।
वायोः पुत्रोऽहमखिलप्राणभूतस्य शोभने ॥ २४ ॥

तच्छ्रुत्वा जानकी प्राह हनूमन्तं कृताञ्जलिम् ।
वानराणां मनुष्याणां सङ्गतिर्घटते कथम् ॥ २५ ॥

यथा त्वं रामचन्द्रस्य दासोऽहमिति भाषसे ।
तामाह मारुतिः प्रीतो जानकीं पुरतः स्थितः ॥ २६ ॥

ऋष्यमूकमगाद्रामः शबर्या नोदितः सुधीः ।
सुग्रीवो ऋष्यमूकस्थो दृष्टवान् रामलक्ष्मणौ ॥ २७ ॥

भीतो मां प्रेषयामास ज्ञातुं रामस्य हृद्गतम् ।
ब्रह्मचारिवपुर्धृत्वा गतोऽहं रामसन्निधिम् ॥ २८ ॥

भ्रम झाला आहे ? की हे सर्व खरेच आहे ? दुःखामुळे मला झोप येत नाही; तेव्हा हे स्वप्न असणार नाही आणि मला हे सर्व नीट कळले आहे; मग हा भ्रम तरी कसा असेल बरे ? (१६-१७)

माझ्या कानांना अमृताप्रमाणे वाटणारे हे वचन ज्या कुणी उच्चारले आहे, त्या प्रिय बोलणाऱ्या महाभागाने माझ्यापुढे येऊन मला दर्शन द्यावे.' (१८)

ते जानकीचे वचन ऐकल्यावर, हनुमान पानांच्या समूहातून सावकाश खाली उतरून सीतेच्या पुढे उभा राहिला. (१९)

चिमणीच्या आकाराचे शरीर असणाऱ्या, लाल तोंड असणाऱ्या, पीतवर्णी वानराने सीतेपुढे उभा राहून हात जोडून तिला प्रणाम केला. (२०)

त्याला पाहून जानकी भ्याली. 'मला फसविण्यास हा रावणच मायेने वानराचा आकार धारण करून माझ्यापुढे आला आहे' असा विचार करून व खाली तोंड करून ती गप्पच बसून राहिली. तेव्हा हनुमान पुन्हा म्हणाला, "हे देवी, तुला जशी शंका येत आहे तसा मी नाही. हे माते, माझ्याविषयी तुझ्या मनात जी शंका आली आहे, ती काढून टाक. कोसलाधिपती परमात्मा श्रीरामांचा मी दास आहे. आणि हे कल्याणकारी देवी, मी वानरराज सुग्रीवाचा मंत्री आहे. तसेच हे शोभने, सर्वांना प्राणभूत असणाऱ्या वायूचा मी पुत्र आहे." (२१-२४)

ते ऐकल्यावर, हात जोडून आपल्यापुढे उभ्या असणाऱ्या हनुमानाला जानकी म्हणाली, "मी रामचंद्रांचा दास आहे, असे तू सांगतोस, तर वानर आणि मनुष्य यांची मैत्री कशी काय घडून येईल ?" तेव्हा तिच्यापुढे उभा असणारा मारुती आनंदाने तिला म्हणाला. (२५-२६)

"शबरीने सांगितल्यावरून अतिशय बुद्धिमान श्रीराम हे ऋष्यमूक पर्वताजवळ आले. ऋष्यमूक पर्वतावर राहणाऱ्या सुग्रीवाने श्रीराम व लक्ष्मणांना (दुरून जाताना) पाहिले. (२७)

त्यांना पाहून भ्यालेल्या सुग्रीवाने श्रीरामांचे हृद्गत जाणून घेण्यासाठी मला पाठविले. तेव्हा ब्रह्मचारी बटूचे रूप धारण करून मी श्रीरामांजवळ गेलो. (२८)

ज्ञात्वा रामस्य सद्भावं स्कन्धोपरि निधाय तौ ।
नीत्वा सुग्रीवसामीप्यं सख्यं चाकरवं तयोः ॥ २९ ॥

श्रीरामांचा शुद्ध भाव पाहिल्यावर, त्या दोघांना माझ्या खांद्यावर बसवून आणि सुग्रीवाजवळ नेऊन, मी त्या दोघांचे सख्य घडवून आणले. (२९)

सुग्रीवस्य हृता भार्या वालिना तं रघूत्तमः ।
जघानैकेन बाणेन ततो राज्येऽभ्यषेचयत् ॥ ३० ॥

सुग्रीवाची बायको वालीने हरण केली होती. त्याला रामांनी एका बाणाने ठार केले. मग वानरांच्या राजपदावर रामांनी सुग्रीवाचा अभिषेक केला. त्यानंतर तुझा शोध घेण्यासाठी त्याने महाबली वीर वानरांना दाही दिशांना पाठविले. (३०-३१)

सुग्रीवं वानराणां स प्रेषयामास वानरान् ।
दिग्भ्यो महाबलान्वीरान् भवत्याः परिमार्गणे ॥ ३१ ॥

गच्छन्तं राघवो दृष्ट्वा मामभाषत सादरम् ॥ ३२ ॥

त्या वेळी शोधासाठी निघालेल्या मला पाहून राघव आदरपूर्वक मला म्हणाले, "हे पवनपुत्रा, माझे सर्व कार्य तुझ्यावर अवलंबून आहे. तू माझे आणि लक्ष्मणाचे सर्व कुशल सीतेला सांग. (३२-३३)

त्वयि कार्यमशेषं मे स्थितं मारुतनन्दन ।
ब्रूहि मे कुशलं सर्वं सीतायै लक्ष्मणस्य च ॥ ३३ ॥

तसेच सीतेला ओळख पटावी म्हणून, माझ्या नावाची अक्षरे कोरलेली ही माझी सुंदर अंगठी तू सीतेला काळजीपूर्वक दे." (३४)

अङ्गुलीयकमेतन्मे परिज्ञानार्थमुत्तमम् ।
सीतायै दीयतां साधु मन्नामाक्षरमुद्रितम् ॥ ३४ ॥

असे बोलून आपल्या बोटातून अंगठी उतरवून ती त्यांनी मला दिली. हे देवी, ती अंगठी मी प्रयत्नपूर्वक आणली आहे. ती तू बघ." (३५)

इत्युक्त्वा प्रददौ मह्यं कराग्रादङ्गुलीयकम् ।
प्रयत्नेन मयानीतं देवि पश्याङ्गुलीयकम् ॥ ३५ ॥

असे म्हणून मारुतीने सीता देवीला ती मुद्रिका दिली आणि तिला नमस्कार करून व हात जोडून, तो दूर उभा राहिला. (३६)

इत्युक्त्वा प्रददौ देव्यै मुद्रिकां मारुतात्मजः ।
नमस्कृत्य स्थितो दूराद्बद्धाञ्जलिपुटो हरिः ॥ ३६ ॥

त्या वेळी रामनामाने अंकित असणारी ती मुद्रिका पाहून सीता अतिशय आनंदित झाली आणि ती अंगठी मस्तकी धारण केल्यावर तिच्या डोळ्यांतून आनंदाश्रू येऊ लागले. (३७)

दृष्ट्वा सीता प्रमुदिता रामनामाङ्कितां तदा ।
मुद्रिकां शिरसा धृत्वा स्ववदानन्दनेत्रजा ॥ ३७ ॥

(नंतर सीता म्हणाली,) "हे वानरा, तू माझा प्राणदाता आहेस. तू बुद्धिमान् आहेस. तू श्रीराघवांचा भक्त आणि त्यांचे प्रिय करणारा आहेस. त्यांनासुद्धा तुझाच पूर्ण विश्वास वाटतो. (३८)

कपे मे प्राणदाता त्वं बुद्धिमानसि राघवे ।
भक्तोऽसि प्रियकारी त्वं विश्वासोऽस्ति तवैव हि ॥ ३८ ॥

तसे नसते तर त्यांनी अन्य परपुरुषाला माझ्याजवळ कसे बरे पाठविले असते ? अरे हनुमाना, माझे दुःख इत्यादी सर्व काही तू पाहिले आहेस. (३९)

नो चेन्मत्सन्निधिं चान्यं पुरुषं प्रेषयेत्कथम् ।
हनूमन्दृष्टमखिलं मम दुःखादिकं त्वया ॥ ३९ ॥

हे सर्व तू श्रीरामांना सांग. म्हणजे त्यांना माझी दया येईल. हे साधुश्रेष्ठा, आता दोन महिन्यांच्या अवधीपर्यंतच माझे प्राण राहातील. (४०)

सर्वं कथय रामाय यथा मे जायते दया ।
मासद्वयावधि प्राणाः स्थास्यन्ति मम सत्तम ॥ ४० ॥

नागमिष्यति चेद्रामो भक्षयिष्यति मां खलः ।
अतः शीघ्रं कपीन्द्रेण सुग्रीवेण समन्वितः ॥ ४१ ॥

वानरानीकपैः सार्धं हत्वा रावणमाहवे ।
सपुत्रं सबलं रामो यदि मां मोचयेत्प्रभुः ॥ ४२ ॥

तत्तस्य सदृशं वीर्यं वीर वर्णय वर्णितम् ।
यथा मां तारयेद्रामो हत्वा शीघ्रं दशाननम् ॥ ४३ ॥

तथा यतस्व हनुमन्वाचा धर्ममवाप्नुहि ।
हनूमानपि तामाह देवि दृष्टो यथा मया ॥ ४४ ॥

रामः सलक्ष्मणः शीघ्रमागमिष्यति सायुधः ।
सुग्रीवेण ससैन्येन हत्वा दशमुखं बलात् ॥ ४५ ॥

समानेष्यति देवि त्वामयोध्यां नात्र संशयः ।
तमाह जानकी रामः कथं वारिधिमाततम् ॥ ४६ ॥

तीर्त्वायास्यत्यमेयात्मा वानरानीकपैः सह ।
हनूमानाह मे स्कन्धावारुह्य पुरुषर्षभौ ॥ ४७ ॥

आयास्यतः ससैन्यश्च सुग्रीवो वानरेश्वरः ।
विहायसा क्षणेनैव तीर्त्वा वारिधिमाततम् ॥ ४८ ॥

निर्दहिष्यति रक्षौघांस्त्वत्कृते नात्र संशयः ।
अनुज्ञां देहि मे देवि गच्छामि त्वरयान्वितः ॥ ४९ ॥

द्रष्टुं रामं सह भ्रात्रा त्वरयामि तवान्तिकम् ।
देवि किञ्चिदभिज्ञानं देहि मे येन राघवः ॥ ५० ॥

विश्वसेन्मां प्रयत्नेन ततो गन्ता समुत्सुकः ।
ततः किञ्चिद्विचार्याथ सीता कमललोचना ॥ ५१ ॥

विमुच्य केशपाशान्ते स्थितं चूडामणिं ददौ ।
अनेन विश्वसेद्रामस्त्वां कपीन्द्र सलक्ष्मणः ॥ ५२ ॥

अभिज्ञानार्थमन्यच्च वदामि तव सुव्रत ।
चित्रकूटगिरौ पूर्वमेकदा रहसि स्थितः ।
मदङ्के शिर आधाय निद्राति रघुनन्दनः ॥ ५३ ॥

त्या काळात जर श्रीराम आले नाहीत तर तो दुष्ट रावण मला खाऊन टाकील. म्हणून वानरराज सुग्रीवासहित आणि वानरसैन्यातील मुख्यांसह येथे लवकर येऊन, जर रामांनी युद्धात पुत्र व सैन्य यांसह रावणाचा वध केला आणि जर मला येथून सोडवले, तरच हे वीरा, ते कृत्य त्यांच्या पराक्रमास साजेलसे होईल. माझे म्हणणे श्रीरामांना अशा युक्तीने सांग की, त्यामुळे रावणाला मारून राम मला घेऊन जातील; असा तू प्रयत्न कर. असे करून तू वाणीचे पुण्य प्राप्त करून घे." तेव्हा हनुमानसुद्धा तिला म्हणाला, "हे देवी, मी रामांना भेटलो की तुझ्या म्हणण्याप्रमाणे करीन. तुझ्याबद्दल जे पाहिले तेही सांगेन म्हणजे सैन्यासह सुग्रीव आणि लक्ष्मण यांना घेऊन तसेच स्वतःची शस्त्रे घेऊन राम सत्वर इकडे येतील, आणि स्वतःच्या सामर्थ्याने रावणाचा वध करून, हे देवी, ते तुला अयोध्येला नेतील, यात संशय नाही." तेव्हा जानकी त्याला म्हणाली, "राम हे अमेयात्मा आहेत. वानर सैन्यातील सेनाप्रमुखांसह विस्तृत समुद्र ओलांडून येथे कसे येतील ?" हनूमानाने उत्तर दिले, "ते दोघे पुरुषश्रेष्ठ माझ्या खांद्यावर बसून येतील, तर वानरराज सुग्रीव हा आपल्या सैन्यासह एका क्षणात आकाश मार्गाने विशाल समुद्र पार करून येथे येईल आणि तुझ्यासाठी तो सर्व राक्षस समूहांना जाळून टाकील, यांत संशय नाही. हे देवी, आता मला अनुज्ञा दे म्हणजे श्रीरामांना व लक्ष्मणाला भेटण्यासाठी मी आता त्वरित जाईन. आणि मी त्यांना त्वरेने तुझ्याजवळ घेऊन येण्याचा प्रयत्न करीन. हे देवी, तू मला काही तरी तुझी खूण दे की ज्यामुळे राघवांचा माझ्यावर विश्वास बसेल. प्रयत्नपूर्वक मी त्या खुणेचे रक्षण करीन आणि मोठ्या उत्साहाने रामांजवळ जाईन." त्यानंतर कमलनयन सीतेने थोडा विचार केला. (४१-५१)

तिने आपल्या केशपाशात असणारा चूडामणी बाहेर काढून त्याला दिला व ती त्याला म्हणाली, "हे कपिश्रेष्ठा, लक्ष्मणासह श्रीराम या खुणेमुळे तुझ्यावर विश्वास ठेवतील. (५२)

हे सुव्रता, ओळख पटविण्यासाठी म्हणून आणखी एक गोष्ट मी तुला सांगते. पूर्वी एकदा चित्रकूट पर्वतावर असताना एकांत स्थानी रघुनंदन माझ्या मांडीवर मस्तक ठेवून झोपले होते. (५३)

ऐन्द्रः काकस्तदागत्य नखैस्तुण्डेन चासकृत् ।
मत्पादाङ्गुष्ठमारक्तं विददारामिषाशया ॥ ५४ ॥

ततो रामः प्रबुद्ध्याथ दृष्ट्वा पादं कृतव्रणम् ।
केन भद्रे कृतं चैतद्विप्रियं मे दुरात्मना ॥ ५५ ॥

इत्युक्त्वा पुरतोऽपश्यद्वायसं मां पुनः पुनः ।
अभिद्रवन्तं रक्ताक्तनखतुण्डं चुकोप ह ॥ ५६ ॥

तृणमेकमुपादाय दिव्यास्त्रेणाभियोज्य तत् ।
चिक्षेप लीलया रामो वायसोपरि तज्ज्वलत् ॥ ५७ ॥

अभ्यद्रवद्वायसश्च भीतो लोकान् भ्रमन्पुनः ।
इन्द्रब्रह्मादिभिश्चापि न शक्यो रक्षितुं तदा ॥ ५८ ॥

रामस्य पादयोरेऽपतद्भीत्या दयानिधेः ।
शरणागतमालोक्य रामस्तमिदमब्रवीत् ॥ ५९ ॥

अमोघमेतदस्त्रं मे दत्त्वैकाक्षमितो व्रज ।
सव्यं दत्त्वा गतः काक एवं पौरुषवानपि ॥ ६० ॥

उपेक्षते किमर्थं मामिदानीं सोऽपि राघवः ।
हनूमानपि तामाह श्रुत्वा सीतानुभाषितम् ॥ ६१ ॥

देवि त्वां यदि जानाति स्थितामत्र रघूत्तमः ।
करिष्यति क्षणाद्भस्म लङ्कां राक्षसमण्डिताम् ॥ ६२ ॥

जानकी प्राह तं वत्स कथं त्वं योत्स्यसेऽसुरैः ।
अतिसूक्ष्मवपुः सर्वे वानराश्च भवादृशाः ॥ ६३ ॥

श्रुत्वा तद्वचनं देव्यै पूर्वरूपमदर्शयत् ।
मेरुमन्दरसङ्काशं रक्षोगणविभीषणम् ॥ ६४ ॥

दृष्ट्वा सीता हनूमन्तं महापर्वतसन्निभम् ।
हर्षेण महताविष्टा प्राह तं कपिकुञ्जरम् ॥ ६५ ॥

त्या वेळी इंद्राचा पुत्र (जयंत) कावळ्याच्या रूपाने तेथे आला आणि मांसाच्या लोभाने त्याने माझ्या पायाचा लालबुंद अंगठा चोचीने फोडला. (५४)

त्यानंतर श्रीराम जेव्हा जागे झाले तेव्हा जखमी झालेला माझा पाय पाहून त्यांनी विचारले, " हे कल्याणी, कोणा दुष्टात्म्याने अत्यंत अप्रिय असे हे कर्म केले आहे ? " (५५)

ते असे बोलत होते, तितक्यात ज्याचे तोंड व नखे रक्ताने माखलेली होती, असा तो कावळा पुन्हा माझ्याकडे येत होता, तो त्यांना समोर दिसला. त्याला पाहून श्रीरामांना फार क्रोध आला. (५६)

श्रीरामांनी एक गवताची काडी घेऊन, तिच्यावर दिव्यास्त्राची योजना केली आणि ती ज्वलंत काडी त्यांनी लीलेने त्या कावळ्यावर फेकली. (५७)

तेव्हा घाबरलेला कावळा पळत सुटला आणि तिन्ही लोकात भटकू लागला. परंतु त्या वेळी इंद्र, ब्रह्मदेव इत्यादींसुद्धा त्याचे रक्षण करू शकले नाहीत. (५८)

तेव्हा तो भीत भीत दयानिधान अशा श्रीरामांच्या पाया पडला. तो शरण आला असे पाहून श्रीराम त्याला म्हणाले, 'माझे हे अस्त्र कधीही व्यर्थ जात नाही. तेव्हा तू आपला एक डोळा देऊन निघून जा.' तेव्हा आपला डावा डोळा देऊन तो कावळा तेथून निघून गेला. अशा प्रकारचे सामर्थ्य असूनही राघव आत्ता का बरे माझी उपेक्षा करीत आहेत ?' सीतेचे हे भाषण ऐकल्यावर, हनुमानसुद्धा तिला म्हणाला. (५९-६१)

"हे देवी, तू येथे आहेस, हे जर रघूत्तम रामांना कळले तर ते राक्षसांनी भूषित केलेल्या या लंकेचे क्षणात भस्म करून टाकतील. " (६२)

तेव्हा जानकी त्याला म्हणाली, "वत्सा, अतिशय लहान शरीर असणारा तू कसा बरे असुरांशी लढशील ? इतर सर्व वानरही तुझ्यासारखेच असणार." (६३)

तिचे वचन ऐकल्यावर, हनुमानाने मेरु - मंदर-पर्वताप्रमाणे असणारे आणि राक्षस समूहांना भयभीत करून टाकणारे स्वतःचे पूर्वीचे रूप जानकीला दाखविले. (६४)

एखाद्या प्रचंड पर्वताप्रमाणे विशाल शरीर असणाऱ्या हनुमंताला पाहून सीता अतिशय आनंदाने भरून गेली आणि ती त्या वानरश्रेष्ठाला म्हणाली. (६५)

समर्थोऽसि महासत्त्व द्रक्ष्यन्ति त्वां महाबलम् ।
राक्षस्यस्ते शुभः पन्था गच्छ रामान्तिकं द्रुतम् ॥ ६६ ॥

बुभुक्षितः कपिः प्राह दर्शनात्पारणं मम ।
भविष्यति फलैः सर्वैस्तव दृष्टौ स्थितैर्हि मे ॥ ६७ ॥

तथेत्युक्तः स जानक्या भक्षयित्वा फलं कपिः।
ततः प्रस्थापितोऽगच्छज्जानकीं प्रणिपत्य सः ।
किञ्चिदूरमथो गत्वा स्वात्मन्येवान्वचिन्तयत् ॥ ६८ ॥

कार्यार्थमागतो दूतः स्वामिकार्याविरोधतः ।
अन्यत्किञ्चिदसम्पाद्य गच्छत्यधम एव सः ॥ ६९ ॥

अतोऽहं किञ्चिदन्यच्च कृत्वा दृष्ट्वाथ रावणम् ।
सम्भाष्य च ततो रामदर्शनार्थं व्रजाम्यहम् ॥ ७० ॥

इति निश्चित्य मनसा वृक्षखण्डान्महाबलः ।
उत्पाट्याशोकवनिकां निर्वृक्षामकरोत्क्षणात् ॥ ७१ ॥

सीताश्रयनगं त्यक्त्वा वनं शून्यं चकार सः ।
उत्पाटयन्तं विपिनं दृष्ट्वा राक्षसयोषितः ॥ ७२ ॥

अपृच्छञ् जानकीं कोऽसौ वानराकृतिरुद्धटः ॥ ७३ ॥

जानक्युवाच

भवत्य एव जानन्ति मायां राक्षसनिर्मिताम् ।
नाहमेनं विजानामि दुःखशोकसमाकुला ॥ ७४ ॥

इत्युक्तास्त्वरितं गत्वा राक्षस्यो भयपीडिताः ।
हनूमता कृतं सर्वं रावणाय न्यवेदयन् ॥ ७५ ॥

देव कश्चिन्महासत्त्वो वानराकृतिदेहभृत् ।
सीतया सह सम्भाष्य ह्यशोकवनिकां क्षणात् ।
उत्पाट्य चैत्यप्रासादं बभञ्जामितविक्रमः ॥ ७६ ॥

"हे महाशक्तिसंपन्न मारुती, तू समर्थ आहेस. आता महाबलवान अशा तुला या राक्षसी पाहातील. तू लवकर रामांकडे जा. तुझा मार्ग शुभ होवो." (६६)

त्या वेळी हनुमानाला भूक लागली होती. तो सीतेला म्हणाला, "देवी, तुझे दर्शन घेणे हेच माझे व्रत होते आणि ते पूर्ण झाले आहे. तेव्हा तुझ्या दृष्टीसमोर जी फळे आहेत ती खाऊन मी माझे पारणे फेडीन." (६७)

'ठीक आहे' असे जानकीने म्हटल्यावर, हनुमानाने फळे खाल्ली. नंतर तिने निरोप दिल्यावर जानकीला प्रणाम करून तो निघाला. त्यानंतर काहीसे दूर गेल्यावर तो स्वतःच्याच मनाशी विचार करू लागला. (६८)

'आपल्या स्वामींचे कार्य करण्यासाठी आलेला दूत स्वामी- कार्याला विरोधी होणार नाही असे अन्य काही कार्य न करताच जर परत गेला, तर तो दूत अधम प्रतीचा होय. (६९)

म्हणून मी अन्य काही कार्य करून, त्यानंतर रावणाला भेटून, त्याच्याशी संभाषण करून, मग रामांना भेटण्यासाठी परत जाईन.' (७०)

मनात असा निश्चय करून महाबली हनुमानाने झाडेच्या झाडे उपटून टाकून एका क्षणात ती अशोकवाटिका वृक्ष-रहित करून टाकली. (७१)

सीता ज्या वृक्षाच्या आश्रयाने बसली होती तो वृक्ष सोडून त्याने ते संपूर्ण अशोकवन उध्वस्त केले. वृक्ष उपटून मारुती वन उजाड करीत असल्याचे पाहून, तेथल्या राक्षस स्त्रियांनी जानकीला विचारले, "वानराचा आकार असणारा हा कोण अपार पराक्रमी वीर आहे ?"(७२-७३)

जानकी म्हणाली – "हे बायांनो, राक्षसांनी निर्माण केलेली ही माया तुम्हांलाच माहीत असणार. दुःख व शोक यांनी भरलेल्या मला हा कोण आहे, हे कसे माहीत असणार ?" (७४)

सीतेने असे सांगितल्यावर, भयभीत झालेल्या त्या राक्षस स्त्रिया त्वरित रावणाजवळ गेल्या आणि हनुमंताने केलेली सर्व खोडी त्यांनी रावणाला निवेदन केली. (७५)

(त्या रावणाला सांगू लागल्या,) "महाराज, वानराच्या आकाराप्रमाणे देह धारण करणारा कोणी एक महासामर्थ्यसंपन्न असणारा प्राणी येथे आला आहे. सीतेबरोबर संभाषण करून झाल्यावर, एका क्षणात वृक्ष उपटून त्याने अशोकवनिका उजाड केली आहे, आणि

प्रासादरक्षिणः सर्वान्हत्वा तत्रैव तस्थिवान् ।
तच्छ्रुत्वा तूर्णमुत्थाय वनभङ्गं महाप्रियम् ॥ ७७ ॥

किङ्करान्प्रेषयामास नियुतं राक्षसाधिपः ।
निभग्नचैत्यप्रासादप्रथमान्तरसंस्थितः ॥ ७८ ॥

हनुमान्पर्वताकारो लोहस्तम्भकृतायुधः ।
किञ्चिल्लाङ्गूलचलनो रक्तास्यो भीषणाकृतिः ॥ ७९ ॥

आपतन्तं महासङ्घं राक्षसानां ददर्श सः ।
चकार सिंहनादं च श्रुत्वा ते मुमुहुर्भृशम् ॥ ८० ॥

हनूमन्तमथो दृष्ट्वा राक्षसा भीषणाकृतिम् ।
निर्जघ्नुर्विविधास्त्रौघैः सर्वराक्षसघातिनम् ॥ ८१ ॥

तत उत्थाय हनुमान्मुद्गरेण समन्ततः ।
निष्पिपेष क्षणादेव मशकानिव यूथपः ॥ ८२ ॥

निहतान्किङ्कराञ् श्रुत्वा रावणः क्रोधमूर्च्छितः ।
पञ्च सेनापतींस्तत्र प्रेषयामास दुर्मदान् ॥ ८३ ॥

हनूमानपि तान्सर्वाँल्लोहस्तम्भेन चाहनत् ।
ततः क्रुद्धो मन्त्रिसुतान्प्रेषयामास सप्त सः ॥ ८४ ॥

आगतानपि तान्सर्वान्पूर्ववद्वानरेश्वरः ।
क्षणान्निःशेषतो हत्वा लोहस्तम्भेन मारुतिः ॥ ८५ ॥

पूर्वस्थानमुपाश्रित्य प्रतीक्षन् राक्षसान् स्थितः ।
ततो जगाम बलवान्कुमारोऽक्षः प्रतापवान् ॥ ८६ ॥

तमुत्पपात हनुमान् दृष्ट्वाकाशे समुद्गरः ।
गगनात्त्वरितो मूर्ध्नि मुद्गरेण व्यताडयत् ॥ ८७ ॥

हत्वा तमक्षं निःशेषं बलं सर्वं चकार सः ॥ ८८ ॥

ततः श्रुत्वा कुमारस्य वधं राक्षसपुङ्गवः ।
क्रोधेन महताविष्ट इन्द्रजेतारमब्रवीत् ॥ ८९ ॥

अमर्याद पराक्रमी असणाऱ्या त्याने तेथील देवालयही फोडून टाकले आहे, आणि प्रासादाच्या रक्षणासाठी असणाऱ्या सर्व रक्षकांना ठार करून तो तेथेच बसला आहे." वनाच्या विध्वंसाचा तो अत्यंत अप्रिय समाचार ऐकल्यावर रावण झटक्यात उठला आणि त्या राक्षसांच्या राजाने दहा लाख सेवकांना (मारुतीच्या पारिपत्यासाठी) पाठविले. त्या वेळी इकडे पर्वताप्रमाणे आकार असणारा, एक लोखंडी खांब शस्त्र म्हणून वापरणारा, थोडीशी शेपटी हालविणारा, लाल तोंडाचा, भयानक आकार असणारा हनुमान भग्न केलेल्या मंदिराच्या पुढल्या भागात बसला होता. (७६-७९)

राक्षसांचा प्रचंड समूह आपल्यावर चालून येत आहे, हे त्याने पाहिले. तेव्हा त्याने प्रचंड सिंहनाद केला. तो ऐकून राक्षस मूर्च्छित झाले. (८०)

त्यानंतर सर्व राक्षसांना मारणाऱ्या व भयंकर आकार असणाऱ्या हनुमंताला पाहून राक्षसांनी विविध अस्त्रांनी त्याच्यावर प्रहार केले. (८१)

तेव्हा हनुमान उठला आणि हत्तीच्या कळपाच्या प्रमुखाने ज्या प्रमाणे माश्यांना चिरडून टाकावे, त्या प्रमाणे हनुमानाने आपल्या मुद्गराने सर्व बाजूला असणाऱ्या राक्षसांना एका क्षणात चिरडून टाकले. (८२)

आपले सेवक मारले गेले, हे ऐकल्यावर रावण क्रोधाने बेभान झाला आणि त्याने तेथे आपले पाच मदोन्मत्त सेनापती पाठविले. (८३)

त्या सर्वांनाच हनुमानाने लोखंडी खांबाने मारून टाकले. तेव्हा रागावलेल्या रावणाने मंत्र्यांच्या सात पुत्रांना पाठविले. (८४)

त्या सर्वांना वानरश्रेष्ठ मारुतीने एका क्षणात पूर्वीप्रमाणे आपल्या लोखंडी खांबाने संपूर्णपणे नष्ट करून टाकले आणि मग आपल्या पूर्वीच्या ठिकाणाचा आश्रय घेऊन तो अन्य राक्षस येण्याची वाट पाहात बसला. त्या वेळी बलवान आणि प्रतापी असा राजकुमार अक्ष हा तेथे आला. (८५-८६)

त्याला पाहिल्यावर, मुद्गर घेऊन हनुमानाने आकाशात उड्डाण केले आणि आकाशातूनच त्याने वेगाने अक्षाच्या मस्तकावर मुद्गराचा तडाखा दिला. (८७)

अक्षाचा वध करून मारुतीने त्याच्या सैन्याचाही समूळ नाश केला. (८८)

तेव्हा राजकुमाराचा वध झाला, हे ऐकल्यानंतर राक्षसश्रेष्ठ रावण अतिशय क्रुद्ध झाला आणि तो इंद्रजिताला म्हणाला. (८९)

पुत्र गच्छाम्यहं तत्र यत्रास्ते पुत्रहा रिपुः ।
हत्वा तमथवा बद्ध्वा आनयिष्यामि तेऽन्तिकम्॥ ९० ॥

इन्द्रजित्पितरं प्राह त्यज शोकं महामते ।
मयि स्थिते किमर्थं त्वं भाषसे दुःखितं वचः ॥ ९१ ॥

बद्ध्वानेष्ये द्रुतं तात वानरं ब्रह्मपाशतः ।
इत्युक्त्वा रथमारुह्य राक्षसैर्बहुभिर्वृतः ॥ ९२ ॥

जगाम वायुपुत्रस्य समीपं वीरविक्रमः ।
ततोऽतिगर्जितं श्रुत्वा स्तम्भमुद्यम्य वीर्यवान् ॥ ९३ ॥

उत्पपात नभोदेशं गरुत्मानिव मारुतिः ।
ततो भ्रमन्तं नभसि हनूमन्तं शिलीमुखैः ॥ ९४ ॥

विद्ध्वा तस्य शिरोभागमिषुभिश्चाष्टभिः पुनः ।
हृदयं पादयुगलं षड्भिरेकेन वालधिम् ॥ ९५ ॥

भेदयित्वा ततो घोरं सिंहनादमथाकरोत् ।
ततोऽतिहर्षाद्धनुमान् स्तम्भमुद्यम्य वीर्यवान् ॥ ९६ ॥

जघान सारथिं साश्वं रथं चाचूर्णयत्क्षणात् ।
ततोऽन्यं रथमादाय मेघनादो महाबलः ॥ ९७ ॥

शीघ्रं ब्रह्मास्त्रमादाय बद्ध्वा वानरपुङ्गवम् ।
निनाय निकटं राज्ञो रावणस्य महाबलः ॥ ९८ ॥

यस्य नाम सततं जपन्ति ये-
ऽज्ञानकर्मकृतबन्धनं क्षणात् ।
सद्य एव परिमुच्य तत्पदं
यान्ति कोटिरविभासुरं शिवम् ॥ ९९ ॥

तस्यैव रामस्य पदाम्बुजं सदा
हृत्पद्ममध्ये सुनिधाय मारुतिः ।
सदैव निर्मुक्तसमस्तबन्धनः
किं तस्य पाशैरितरैश्च बन्धनैः ॥ १०० ॥

"हे पुत्रा, माझ्या पुत्राचा वध करणाऱ्या शत्रूजवळ जातो आणि त्याला ठार करून अथवा बांधून मी तुझ्याजवळ आणतो." (९०)

तेव्हा इंद्रजित पित्याला म्हणाला, "हे महाबुद्धिमान तात, तुम्ही शोक टाकून द्या. मी येथे असताना तुम्ही दुःखपूर्ण वचन का बरे बोलत आहात? (९१)

बाबा, त्या वानराला त्वरित ब्रह्मपाशाने बांधून मी घेऊन येतो." असे बोलून तो एका रथावर चढला, आणि अनेक राक्षसांसमवेत तो महापराक्रमी वीर वायुपुत्राजवळ गेला. मग इंद्रजिताने केलेली प्रचंड गर्जना ऐकल्यावर पराक्रमी मारुतीने हाताने लोखंडी खांब उचलून, गरुडाप्रमाणे आकाशात उड्डाण केले. त्यानंतर आकाशात भ्रमण करणाऱ्या हनुमंताला पाहिल्यावर इंद्रजिताने काही बाणांनी त्याच्यावर प्रहार केले. नंतर पुन्हा आठ बाणांनी त्याचा शिरोभाग विद्ध केला. सहा बाणांनी त्याचे हृदय आणि दोन्ही पाय विद्ध केले. तसेच एका बाणाने शेपटीचा भेद करून, इंद्रजिताने भयानक सिंहनाद केला. मग पराक्रमी हनुमानाने अतिशय उत्साहाने खांब उचलून त्या इंद्रजिताच्या सारथ्याचा वध केला आणि एका क्षणात घोड्यांसह रथाचे चूर्ण केले. तेव्हा महाबलवान इंद्रजिताने दुसरा रथ घेऊन त्यावर आरोहण केले आणि सत्वर ब्रह्मास्त्र सोडून त्याने वानरश्रेष्ठाला बांधून रावणाच्याजवळ नेले. (९२-९८)

ज्या श्रीरामांच्या नावाचा सतत जप करणारे भक्तजन क्षणात अज्ञानाने निर्माण केलेल्या कर्मांनी आलेले बंधन तत्काळ तोडून टाकून, कोटिसूर्याप्रमाणे प्रकाशमान असणाऱ्या, कल्याणकारक अशा श्रीरामांच्या स्थानी जातात, त्याच रामांची चरणकमळे सदा आपल्या हृदयामध्ये ठेवल्यामुळे मारुती नेहमीच सर्वच बंधनांतून मुक्त झालेला होता. त्याला ब्रह्मपाशांनी तसेच इतर बंधनांनी काय होणार बरे ? (९९-१००)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थ सर्ग

हनुमान आणि रावण यांचा संवाद आणि लंकादहन

श्रीमहादेव उवाच

यान्तं कपीन्द्रं धृतपाशबन्धनं
विलोकयन्तं नगरं विभीतवत् ।
अताडयन्मुष्टितलैः सुकोपनाः
पौराः समन्तादनुयान्त ईक्षितुम् ॥ १ ॥

ब्रह्मास्त्रमेनं क्षणमात्रसङ्गमं
कृत्वा गतं ब्रह्मवरेण सत्वरम् ।
ज्ञात्वा हनूमानपि फल्गुरज्जुभि-
र्धृतो ययौ कार्यविशेषगौरवात् ॥ २ ॥

सभान्तरस्थस्य च रावणस्य तं
पुरो निधायाह बलारिजित्तदा ।
बद्धो मया ब्रह्मवरेण वानरः
समागतोऽनेन हता महासुराः ॥ ३ ॥

यद्युक्तमत्रार्य विचार्य मन्त्रिभि-
र्विधीयतामेष न लौकिको हरिः ।
ततो विलोक्याह स राक्षसेश्वरः
प्रहस्तमग्रे स्थितमञ्जनाद्रिभम् ॥ ४ ॥

प्रहस्त पृच्छैनमसौ किमागतः
किमत्र कार्यं कुत एव वानरः ।
वनं किमर्थं सकलं विनाशितं
हताः किमर्थं मम राक्षसा बलात् ॥ ५ ॥

ततः प्रहस्तो हनुमन्तमादरात्
पप्रच्छ केन प्रहितोऽसि वानर ।
भयं च ते मास्तु विमोक्ष्यसे मया
सत्यं वदस्वाखिलराजसन्निधौ ॥ ६ ॥

ततोऽतिहर्षात्पवनात्मजो रिपुं
निरीक्ष्य लोकत्रयकण्टकासुरम् ।
वक्तुं प्रचक्रे रघुनाथसत्कथां
क्रमेण रामं मनसा स्मरन्मुहुः ॥ ७ ॥

श्रीमहादेव म्हणाले– हे पार्वती, ब्रह्मपाशात पकडला गेलेला तो कपिश्रेष्ठ निर्भय मनाने परंतु वरवर भ्याल्याप्रमाणे, लंकानगरी पाहात पाहात जात होता, तेव्हा अतिशय रागावलेले आणि त्याला पाहाण्यास सर्व बाजूंनी एकत्र येऊन त्याच्या मागोमाग जाणारे नगरवासी राक्षस त्याला बुक्क्यांनी मारु लागले. (१)

ब्रह्मदेवाने मारुतीला दिलेल्या वरामुळे ब्रह्मास्त्राने त्याच्या देहाला क्षणमात्र स्पर्श केला आणि ते सत्वर निघून गेले, ही गोष्ट हनुमानाला कळली असूनसुद्धा काही विशिष्ट महत्त्वाचे कार्य पार पाडावयाचे असल्यामुळे, हनुमान साध्या दोऱ्यांनी बांधलेल्या स्थितीत जात होता. (२)

राजसभेमध्ये बसलेल्या रावणापुढे त्या हनुमानाला उभे करून, इंद्रजित रावणाला म्हणाला, "ब्रह्मदेवाच्या वराच्या सामर्थ्याने बांधलेला हा वानर पकडून मी येथे आणला आहे. मोठमोठ्या राक्षसांना याने ठार केले आहे. (३)

महाराज, मंत्र्यांबरोबर विचार करून याचे बाबतीत जे योग्य आहे, ते तुम्ही करा. कारण हा वानर सामान्य नाही." त्यानंतर मारुतीकडे पाहिल्यावर, तो राक्षसराज समोर बसलेल्या, काजळाच्या पर्वताप्रमाणे कृष्णवर्ण असणाऱ्या प्रहस्त राक्षसाला म्हणाला. (४)

"अरे प्रहस्ता, या वानराला विचार की हा येथे का आला आहे ? त्याचे येथे काय काम आहे ? हा वानर कोठून आला? याने संपूर्ण अशोकवन का नष्ट करून टाकले ? तसेच माझ्या राक्षसांना याने बळजबरीने का बरे ठार केले ?" (५)

तेव्हा आदरपूर्वक प्रहस्ताने हनुमंताला प्रश्न केला, "अरे वानरा, तुला कोणी इकडे पाठविले आहे ? तू घाबरू नकोस. या राजराजेश्वर रावणाजवळ सत्य सांग, मी तुला सोडवीन." (६)

त्यानंतर तिन्ही लोकांना कंटकभूत असणाऱ्या असूर शत्रूला नीट पाहिल्यानंतर, मनात रामांचे वारंवार स्मरण करून, अतिशय आनंदाने, हनुमानाने श्रीरामांची सुंदर कथा क्रमाने सांगण्यास प्रारंभ केला. (७)

श्रृणु स्फुटं देवगणाद्यमित्र हे
रामस्य दूतोऽहमशेषहृत्स्थितेः ।
यस्याखिलेशस्य हृताधुना त्वया
भार्या स्वनाशाय शुनेव सद्धविः ॥ ८ ॥

स राघवोऽभ्येत्य मतङ्गपर्वतं
सुग्रीवमैत्रीमनलस्य सन्निधौ ।
कृत्वैकबाणेन निहत्य वालिनं
सुग्रीवमेवाधिपतिं चकार तम् ॥ ९ ॥

स वानराणामधिपो महाबली
महाबलैर्वानरयूथकोटिभिः ।
रामेण सार्धं सह लक्ष्मणेन भोः
प्रवर्षणेऽमर्षयुतोऽवतिष्ठते ॥ १० ॥

सञ्चोदितास्तेन महाहरीश्वरा
धरासुतां मार्गयितुं दिशो दश ।
तत्राहमेकः पवनात्मजः कपिः
सीतां विचिन्वञ्छनकैः समागतः ॥ ११ ॥

दृष्टा मया पद्मपलाशलोचना
सीता कपित्वाद्विपिनं विनाशितम् ।
दृष्ट्वा ततोऽहं रभसा समागता-
न्मां हन्तुकामान् धृतचापसायकान् ॥ १२ ॥

मया हतास्ते परिरक्षितं वपुः
प्रियो हि देहोऽखिलदेहिनां प्रभो ।
ब्रह्मास्त्रपाशेन निबध्य मां ततः
समागमन्मेघनिनादनामकः ॥ १३ ॥

स्पृष्ट्वैव मां ब्रह्मवरप्रभावत-
स्त्यक्त्वा गतं सर्वमवैमि रावण ।
तथाप्यहं बद्ध इवागतो हितं
प्रवक्तुकामः करुणासार्द्रधीः ॥ १४ ॥

विचार्य लोकस्य विवेकतो गतिं
न राक्षसीं बुद्धिमुपैहि रावण ।
दैवीं गतिं संसृतिमोक्षहैतुकीं
समाश्रयात्यन्तहिताय देहिनः ॥ १५ ॥

(तो म्हणाला,) "देवादिकांचा शत्रू असणाऱ्या हे रावणा, नीट ऐक. ज्या प्रमाणे एकादा कुत्रा यज्ञातील हवी चोरून नेतो, त्या प्रमाणे तू स्वतःचा नाश करून घेण्यासाठी, ज्या सर्वेश्वर श्रीरामांची भार्या हरण करून आणली आहेस, त्या सर्वांच्या अंतःकरणात स्थित असणाऱ्या श्रीरामांचा मी दूत आहे. (८)

ते श्रीराघव मतंग पर्वतावर आले आणि अग्नीच्या साक्षीने त्यांनी सुग्रीवाशी मैत्री केली. नंतर एका बाणाने वालीचा वध करून, रामांनी सुग्रीवाला वानरांचा अधिपती केले आहे. (९)

अरे रावणा, तो महाबलवान वानरांचा राजा सुग्रीव महाबलवान अशा कोट्यवधी वानरांच्या समूहाबरोबर आणि श्रीराम व लक्ष्मण यांच्यासह क्रोधयुक्त होऊन, सध्या प्रवर्षण नावाच्या पर्वतावर राहात आहे. (१०)

पृथ्वीकन्या सीतेचा शोध घेण्यासाठी त्याने दाही दिशांना मोठमोठे वानरश्रेष्ठ पाठविले आहेत. त्यांच्यापैकी मी एक वानर आहे. मी वायूचा पुत्र आहे. सीतेचा शोध करीत मी हळूहळू येथे आलो आहे. (११)

कमलदलाप्रमाणे नेत्र असणाऱ्या सीतेला मी भेटलो आहे. वानर जातीच्या हूड स्वभावाला अनुसरून मी अशोकवनाचा विध्वंस केला आहे. त्यानंतर मला ठार मारण्यासाठी धनुष्य बाण घेऊन वेगाने येणारे राक्षस जेव्हा मला दिसले, तेव्हा मी त्यांना ठार केले आणि माझ्या शरीराचे रक्षण केले. कारण, हे प्रभो, सर्व प्राण्यांना स्वतःचा देह प्रिय असतो. त्यानंतर मेघनाद नावाच्या राक्षसाने ब्रह्मास्त्राच्या पाशाने मला बांधून येथे आणले आहे. (१२-१३)

हे रावणा, ब्रह्मदेवाने दिलेल्या वराच्या प्रभावामुळे ते ब्रह्मास्त्र मला फक्त स्पर्श करून निघून गेले आहे, हे जरी मला माहीत होते तरीसुद्धा माझी बुद्धी करुणापूर्ण असल्यामुळे, तुला हितकारक गोष्ट सांगण्याच्या इच्छेने, एखाद्या बंद्याप्रमाणे मी येथे आलो आहे. (१४)

हे रावणा, विवेक केल्यामुळे लोकांना चांगली गती मिळते म्हणून तू राक्षसी बुद्धीचा अंगीकार करू नकोस. प्राण्यांचे अतिशय हित करणारी आणि त्यांना संसारातून मुक्त करणारी अशी जी दैवी बुद्धी आहे, तिचा तू आश्रय घे. (१५)

त्वं ब्रह्मणो ह्युत्तमवंशसम्भवः
पौलस्त्यपुत्रोऽसि कुबेरबान्धवः ।
देहात्मबुद्ध्यापि च पश्य राक्षसो
नास्यात्मबुद्ध्या किमु राक्षसो नहि ॥ १६ ॥

तू ब्रह्मदेवांच्या उत्तम वंशात जन्माला आला आहेस. तू पुलस्त्य-पुत्र विश्रवाचा पुत्र असून कुबेराचा बंधू आहेस. हे बघ ! देह म्हणजेच आत्मा, अशा देहात्मबुद्धीने जरी पाहिले तरी तू राक्षस नाहीस, मग देह हा आत्म्यापेक्षा वेगळा आहे, अशा आत्मबुद्धीने पाहिले तर तू राक्षस नाहीसच, हे काय सांगावयास हवे ? (१६)

शरीरबुद्धीन्द्रियदुःखसन्तति-
र्न ते न च त्वं तव निर्विकारतः ।
अज्ञानहेतोश्च तथैव सन्तते-
रसत्त्वमस्याः स्वपतो हि दृश्यवत् ॥ १७ ॥

तू संपूर्णपणे निर्विकार असल्याने शरीर, बुद्धी, इंद्रिये आणि दुःखाचे ओघ हे तुझे गुण नाहीत, तसेच ते म्हणजे तू स्वतः नाहीस. ते सर्व अज्ञानामुळे वाटते. स्वप्नातील दृश्य जसे असत्य असते, तसे हे सर्व पदार्थ असत् आहेत. (१७)

इदं तु सत्यं तव नास्ति विक्रिया
विकारहेतुर्न च तेऽद्वयत्वतः ।
यथा नभः सर्वगतं न लिप्यते
तथा भवान्देहगतोऽपि सूक्ष्मकः ।
देहेन्द्रियप्राणशरीरसङ्गत-
स्त्वात्मेति बुद्ध्याखिलबन्धभाग्भवेत् ॥ १८ ॥

हे सत्य आहे की तुझ्या आत्मरूपात कोणताही विकार होत नाही. कारण आत्मा हा अद्वितीय असल्यामुळे त्याचे ठिकाणी विकारांचे कोणतेही कारण असत नाही. ज्या प्रमाणे आकाश सर्वत्र असले तरी ते कोणत्याही गुणदोषांनी लिप्त होत नाही, त्या प्रमाणे तू देहात राहात असलास, तरी सूक्ष्म असा आत्मा असल्यामुळे तू कशानेही लिप्त होत नाहीस. देह, इंद्रिये, प्राण आणि शरीर यांच्याशी आत्म्याचे मीलन झाले आहे, अशा बुद्धीनेच माणूस सर्व बंधनांत सापडतो. (१८)

चिन्मात्रमेवाहमजोऽहमक्षरो
ह्यानन्दभावोऽहमिति प्रमुच्यते ।
देहोऽप्यनात्मा पृथिवीविकारजो
न प्राण आत्मानिल एष एव सः ॥ १९ ॥

मी फक्त चैतन्य, जन्मरहित, अविनाशी आणि आनंद-स्वरूप आहे. अशा बुद्धीने प्राणी संसारातून मुक्त होऊन जातो. पृथ्वीच्या विकारापासून उत्पन्न झालेला देह हा आत्मा नाही. तसेच प्राण म्हणजेही आत्मा नव्हे, कारण प्राण हा नुसता अचेतन वायूच आहे. (१९)

मनोऽप्यहङ्कारविकार एव नो
न चापि बुद्धिः प्रकृतेर्विकारजा ।
आत्मा चिदानन्दमयोऽविकारवा-
न्देहादिसङ्घाद्व्यतिरिक्त ईश्वरः ॥ २० ॥

अहंकाराचा विकार असणारे मन हेसुद्धा आत्मा नाहीच; त्याच प्रमाणे प्रकृतीच्या विकारांपासून उत्पन्न होणारी बुद्धी हीसुद्धा आत्मा नाही. आत्मा हा तर चिदानंद-स्वरूप, विकाररहित, देह इत्यादी समुदायापेक्षा वेगळा, आणि त्यांचा स्वामी किंवा ईश्वर आहे. (२०)

निरञ्जनो मुक्त उपाधितः सदा
ज्ञात्वैवमात्मानमितो विमुच्यते ।
अतोऽहमात्यन्तिकमोक्षसाधनं
वक्ष्ये शृणुष्वावहितो महामते ॥ २१ ॥

तो आत्मा निरंजन, आणि उपाधीतून सदा मुक्त आहे. अशा प्रकारच्या आत्म्याला जाणल्यावर, प्राणी संसारातून मुक्त होऊन जातो. म्हणून हे महाबुद्धिमाना, मी तुझ्यासाठी आत्यंतिक मोक्षाचे साधन सांगतो, ते तू लक्षपूर्वक ऐक . (२१)

विष्णोर्हि भक्तिः सुविशोधनं धिय-
स्ततो भवेज्ज्ञानमतीव निर्मलम् ।
विशुद्धतत्त्वानुभवो भवेत्ततः
सम्यग्विदित्वा परमं पदं व्रजेत् ॥ २२ ॥

विष्णूची भक्ती ही बुद्धीला अतिशय शुद्ध करणारी आहे; त्यानंतर अतिशय निर्मळ असे आत्मज्ञान होते. त्यानंतर विशुद्ध आत्मतत्त्वाचा अनुभव येईल. अशा प्रकारे योग्य प्रकारे आत्म्याला जाणल्यावर मनुष्य परमपदाप्रत जातो. (२२)

अतो भजस्वाद्यहरिं रमापतिं
रामं पुराणं प्रकृतेः परं विभुम् ।
विसृज्य मौर्ख्यं हृदि शत्रुभावनां
भजस्व रामं शरणागतप्रियम् ।
सीतां पुरस्कृत्य सपुत्रबान्धवो
रामं नमस्कृत्य विमुच्यसे भयात् ॥ २३ ॥

म्हणून प्रकृतीच्या पलीकडे असणाऱ्या, पुराण पुरुष, सर्वव्यापक, आदिनारायण, लक्ष्मीपती रामाची भक्ती कर. तुझ्या हृदयातील शत्रुभावनारूपी मूर्खपणा टाकून देऊन, शरणागत माणसाविषयी प्रेम असणाऱ्या श्रीरामांचा आश्रय घे. सीतेला पुढे करून, पुत्र आणि बांधव यांच्यासह तू रामांना नमस्कार कर म्हणजे तू भयातून सुटशील. (२३)

रामं परात्मानमभावयज्जनो
भक्त्या हृदिस्थं सुखरूपमद्वयम् ।
कथं परं तीरमवाप्नुयाज्जनो
भवाम्बुधेर्दुःखतरङ्गमालिनः ॥ २४ ॥

जो माणूस आपल्या हृदयात असणाऱ्या, अद्वितीय, सुखस्वरूप, परमात्मा अशा रामांचे भक्तीने ध्यान करीत नाही, तो दुःखरूपी तरंगांनी भरलेल्या संसार सागराच्या पलीकडील तीराला कसा बरे पोचेल? (२४)

नो चेत्त्वमज्ञानमयेन वह्निना
ज्वलन्तमात्मानमरक्षितारिवत् ।
नयस्यधोऽधः स्वकृतैश्च पातकै-
र्विमोक्षशङ्का न च ते भविष्यति ॥ २५ ॥

अशा प्रकारे जर तू रामांचे ध्यान केले नाहीस, तर अज्ञानरूपी अग्नीने जळणाऱ्या स्वतःला एखाद्या शत्रूप्रमाणे तू सुरक्षित ठेवू शकणार नाहीस. उलट आपण केलेल्या पापांनी तू स्वतःला अधोगतीला नेत राहशील. मग तुझ्या मोक्षाची कोणतीच शक्यता राहाणार नाही." (२५)

श्रुत्वामृतास्वादसमानभाषितं
तद्वायुसूनोर्दशकन्धरोऽसुरः ।
अमृष्यमाणोऽतिरुषा कपीश्वरं
जगाद रक्तान्तविलोचनो ज्वलन् ॥ २६ ॥

वायुसुताचे अमृताच्या आस्वादाप्रमाणे असणारे ते भाषण रावणाला सहन झाले नाही; म्हणून अतिशय रागाने त्याचे डोळे लाल बुंद झाले. त्याच्या अंगाचा भडका उडाला आणि तो हनुमानाला म्हणाला. (२६)

कथं ममाग्रे विलपस्यभीतवत्
प्लवङ्गमानामधमोऽसि दुष्टधीः ।
क एष रामः कतमो वनेचरो
निहन्मि सुग्रीवयुतं नराधमम् ॥ २७ ॥

"अरे दुष्ट बुद्धी असणाऱ्या वानरा, तू अधम वानर आहेस. बेडरपणे तू माझ्यापुढे कशी बरे फालतू बडबड करीत आहेस ? हा राम तरी असा कोण आहे ? आणि तो वनचर सुग्रीव तरी असा कोण आहे ? सुग्रीवासहित त्या नराधम रामाला मी ठार करीन. (२७)

त्वां चाद्य हत्वा जनकात्मजां ततो
निहन्मि रामं सहलक्ष्मणं ततः ।
सुग्रीवमग्रे बलिनं कपीश्वरं
सवानरं हन्म्यचिरेण वानर ।
श्रुत्वा दशग्रीववचः स मारुति-
र्विवृद्धकोपेन दहन्निवासुरम् ॥ २८ ॥

अरे वानरा, आज प्रथम तुला ठार मारून, नंतर जनककन्या सीतेचा वध करून, त्यानंतर लक्ष्मणासकट रामाला मी ठार करीन आणि मग बलवान वानरराज सुग्रीवाला त्याच्या वानरांसकट लगेच ठार मारून टाकीन." रावणाचे ते बोलणे ऐकल्यावर, आपल्या रागाने जणू त्या रावणाला जाळीत मारुती बोलला. (२८)

न मे समा रावणकोटयोऽधम
रामस्य दासोऽहमपारविक्रमः ।
श्रुत्वातिकोपेन हनूमतो वचो
दशाननो राक्षसमेवमब्रवीत् ॥ २९ ॥

"अरे नीचा, कोट्यवधी रावणसुद्धा माझी बरोबरी करू शकत नाहीत. मी श्रीरामांचा दास आहे आणि माझ्या पराक्रमाला कोणतीच सीमा नाही." हनुमंताचे हे बोलणे ऐकल्यावर, अतिशय रागाने रावणाने जवळच उभ्या असणाऱ्या एक राक्षसाला म्हटले, "अरे, या वानराचे तुकडे

पार्श्वे स्थितं मारय खण्डशः कपिं
पश्यन्तु सर्वेऽसुरमित्रबान्धवाः ।
निवारयामास ततो बिभीषणो
महासुरं सायुधमुद्यतं वधे ।
राजन्वधार्हो न भवेत्कथञ्चन
प्रतापयुक्तैः परराजवानरः ॥ ३० ॥

हतेऽस्मिन्वानरे दूते वार्तां को वा निवेदयेत् ।
रामाय त्वं यमुद्दिश्य वधाय समुपस्थितः ॥ ३१ ॥

अतो वधसमं किञ्चिदन्यच्चिन्तय वानरे ।
सचिह्नो गच्छतु हरिर्यं दृष्ट्वायास्यति द्रुतम् ॥ ३२ ॥

रामः सुग्रीवसहितस्ततो युद्धं भवेत्तव ।
बिभीषणवचः श्रुत्वा रावणोऽप्येतदब्रवीत् ॥ ३३ ॥

वानराणां हि लाङ्गूले महामानो भवेत्किल ।
अतो वस्त्रादिभिः पुच्छं वेष्टयित्वा प्रयत्नतः ॥ ३४ ॥

वह्निना योजयित्वैनं भ्रामयित्वा पुरेऽभितः ।
विसर्जयत पश्यन्तु सर्वे वानरयूथपाः ॥ ३५ ॥

तथेति शणपट्टैश्च वस्त्रैरन्यैरनेकशः ।
तैलाक्तैर्वेष्टयामासुर्लाङ्गूलं मारुतेर्दृढम् ॥ ३६ ॥

पुच्छाग्रे किञ्चिदनलं दीपयित्वाथ राक्षसाः ।
रज्जुभिः सुदृढं बद्ध्वा धृत्वा तं बलिनोऽसुराः ॥ ३७ ॥

समन्ताद् भ्रामयामासुश्चोरोऽयमिति वादिनः ।
तूर्यघोषैर्घोषयन्तस्ताडयन्तो मुहुर्मुहुः ॥ ३८ ॥

हनूमतापि तत्सर्वं सोढं किञ्चिच्चिकीर्षुणा ।
गत्वा तु पश्चिमद्वारसमीपं तत्र मारुतिः ॥ ३९ ॥

सूक्ष्मो बभूव बन्धेभ्यो निःसृतः पुनरप्यसौ ।
बभूव पर्वताकारस्तत उत्प्लुत्य गोपुरम् ॥ ४० ॥

तुकडे करून याचा वध कर आणि हे सर्व असुर, त्यांचे मित्र आणि बांधव यांना पाहू दे." त्या वेळी शस्त्र उगारून मारुतीचा वध करण्यास उद्युक्त झालेल्या त्या प्रचंड राक्षसाचे बिभीषणाने निवारण केले. आणि तो रावणाला म्हणाला, "हे राजन्, दुसऱ्या राजाकडून दूत म्हणून आलेला हा वानर कोणत्याही प्रकाराने ठार करणे योग्य ठरत नाही. (२९-३०)

जर दूत म्हणून आलेल्या या वानराचा वध केला गेला, तर तू ज्यांच्या वधाला तयार झाला आहेस, त्या रामांना सर्व वार्ता कोण बरे निवेदन करील? (३१)

म्हणून या वानराच्या बाबतीत वधासारखीच दुसरी कोणती तरी शिक्षा देण्याचा तू विचार कर. त्या शिक्षेची खूण घेऊन हा वानर परत जाऊ दे, म्हणजे त्याला पाहून सुग्रीवासह राम येथे त्वरित येतील. मग त्यांच्याशी तुझे युद्ध होईल." बिभीषणाचे हे वचन ऐकल्यावर रावणसुद्धा म्हणाला. (३२-३३)

"आपल्या शेपटीचा वानरांना मोठा अभिमान नक्कीच असतो. तेव्हा प्रयत्नपूर्वक याचे शेपूट वस्त्रे इत्यादींनी लपेटून टाका आणि मग त्या शेपटीला आग लावा. नंतर या वानराला आपल्या नगरात सगळीकडे फिरवा आणि त्याला सोडून द्या. तो परत गेल्यावर सर्व वानर समूहांचे प्रमुख त्याची दुर्दशा बघू देत." (३४-३५)

" ठीक आहे" असे म्हणून तागाच्या फडक्यांनी आणि तेलाने भिजलेल्या नाना प्रकारच्या अन्य वस्त्रांनी राक्षसांनी मारुतीचे शेपूट घट्ट बांधून टाकले. (३६)

त्याच्या शेपटीच्या टोकाला थोडासा अग्नी लावला. नंतर त्या बलवान राक्षसांनी मारुतीला दोऱ्यांनी घट्ट बांधून टाकले; त्याला धरून, त्याला वरचेवर बडवून काढीत, आणि वाद्यांच्या घोषात 'हा चोर आहे' असे ओरडत, बलवान राक्षस त्याला लंका नगरीत सगळीकडे फिरवू लागले. (३७-३८)

काही तरी अद्भूत कृत्य करण्याची इच्छा धरून हनुमंताने ते सर्व सहन केले. पुढे नगराच्या पश्चिम द्वाराजवळ येताच तेथे मारुतीने सूक्ष्म रूप धारण केले. तेव्हा तो त्या बंधनांतून मुक्त झाला. मग तो पुनः पर्वताच्या आकाराचा झाला. नंतर त्याने नगराच्या गोपुरावर उडी मारली. तेथे एक खांब उपटून, त्याने एका क्षणात त्या सर्व रक्षकांना ठार केले. मग उरलेल्या कार्याचा विचार

तत्रैकं स्तम्भमादाय हत्वा तान् रक्षिणः क्षणात् ।
विचार्य कार्यशेषं स प्रासादाग्राद् गृहाद् गृहम् ॥ ४१ ॥

उत्प्लुत्योत्प्लुत्य सन्दीप्तपुच्छेन महता कपिः ।
ददाह लङ्कामखिलां साट्टप्रासादतोरणाम् ॥ ४२ ॥

हा तात पुत्र नाथेति क्रन्दमानाः समन्ततः ।
व्याप्ताः प्रासादशिखरेऽप्यारूढा दैत्ययोषितः ॥ ४३ ॥

देवता इव दृश्यन्ते पतन्त्यः पावकेऽखिलाः ।
बिभीषणगृहं त्यक्त्वा सर्वं भस्मीकृतं पुरम् ॥ ४४ ॥

तत उत्प्लुत्य जलधौ हनूमान्मारुतात्मजः ।
लाङ्गूलं मज्जयित्वान्तः स्वस्थचित्तो बभूव सः ॥ ४५ ॥

वायोः प्रियसखित्वाच्च सीतया प्रार्थितोऽनलः ।
न ददाह हरेः पुच्छं बभूवात्यन्तशीतलः ॥ ४६ ॥

यन्नामसंस्मरणधूतसमस्तपापा-
स्तापत्रयानलमपीह तरन्ति सद्यः ।
तस्यैव किं रघुवरस्य विशिष्टदूतः
सन्तप्यते कथमसौ प्रकृतानलेन ॥ ४७ ॥

करून, एका प्रासादावरून दुसऱ्या प्रासादावर, एका घरावरून दुसऱ्या घरावर सतत उड्या मारीत मारीत, आपल्या पेटलेल्या प्रचंड शेपटीने त्या हनुमानाने प्रासाद,तोरणे आणि वेशी या सर्वांसह संपूर्ण लंका नगरीला आग लावली. (३९-४२)

प्रासादांच्या माथ्यावर चढलेल्या, आणि 'अहो बाबा, अरे पोरा, अहो नाथ' असा आक्रोश करीत आगीत पडणाऱ्या त्या सर्व दैत्य स्त्रियांसुद्धा देवतांप्रमाणे दिसत होत्या. बिभीषणाचे घर सोडून मारुतीने सर्व लंकानगर भस्मसात करून टाकले. (४३-४४)

त्यानंतर हनुमानाने समुद्रात उडी घेतली आणि त्यात आपली शेपूट विझवून तो स्वस्थचित्त झाला. (४५)

वायू हा प्रिय मित्र असल्यामुळे आणि सीतेने प्रार्थना केल्यामुळे, अग्नीने हनुमानाची शेपूट जाळली नाही. उलट तो अग्नी त्याला अत्यंत शीतल झाला. (४६)

ज्यांच्या नामस्मरणाने मनुष्यांची सर्व पापे धुऊन जातात आणि ते ताबडतोब या जगात त्रिविध तापरूपी अग्नी पार करून जातात, त्याच रघुनाथांचा विशेष दूत असणारा तो हनुमान सामान्य अग्नीकडून कसा बरे जाळला जाईल ? (४७)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुन्दरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पंचम सर्ग

हनुमान् सीतेचा निरोप घेतो व श्रीरामचंद्रांना तिचा संदेश सांगतो

श्रीमहादेव उवाच

ततः सीतां नमस्कृत्य हनूमानब्रवीद्वचः ।
आज्ञापयतु मां देवि भवती राममन्निधिम् ॥ १ ॥

गच्छामि रामस्त्वां द्रष्टुमागमिष्यति सानुजः ।
इत्युक्त्वा त्रिःपरिक्रम्य जानकीं मारुतात्मजः ॥ २ ॥

प्रणम्य प्रस्थितो गन्तुमिदं वचनमब्रवीत् ।
देवि गच्छामि भद्रं ते तूर्णं द्रक्ष्यसि राघवम् ॥ ३ ॥

श्रीमहादेव म्हणाले– हे पार्वती, नंतर सीतेजवळ जाऊन व नमस्कार करून हनुमान तिला म्हणाला, "हे देवी, तू मला आज्ञा दे. आता मी श्रीरामांजवळ जाईन. धाकट्या भावासह श्रीराम तुला भेटण्यास लौकरच येथे येतील." असे बोलून, जानकीला तीन प्रदक्षिणा करून, पवनसुताने जानकीला पुनः प्रणाम केला आणि जाताना तो परत एकदा असे बोलला, "हे देवी, मी आता जात आहे. तुझे कल्याण होवो. दहा हजार वानरांच्या कोटी समूहांसह असणाऱ्या सुग्रीवासकट श्रीराम आणि लक्ष्मण तुला लौकरच येथे

लक्ष्मणं च ससुग्रीवं वानरायुतकोटिभिः ।
ततः प्राह हनूमन्तं जानकी दुःखकर्शिता ॥ ४ ॥

त्वां दृष्ट्वा विस्मृतं दुःखमिदानीं त्वं गमिष्यसि ।
इतः परं कथं वर्ते रामवार्ताश्रुतिं विना ॥ ५ ॥

मारुतिरुवाच

यद्येवं देवि मे स्कन्धमारोह क्षणमात्रतः ।
रामेण योजयिष्यामि मन्यसे यदि जानकि ॥ ६ ॥

सीतोवाच

रामः सागरमाशोष्य बद्ध्वा वा शरपञ्जरैः ।
आगत्य वानरैः सार्धं हत्वा रावणमाहवे ॥ ७ ॥

मां नयेद्यदि रामस्य कीर्तिर्भवति शाश्वती ।
अतो गच्छ कथं चापि प्राणान्सन्धारयाम्यहम् ॥ ८ ॥

इति प्रस्थापितो वीरः सीतया प्रणिपत्य ताम् ।
जगाम पर्वतस्याग्रे गन्तुं पारं महोदधेः ॥ ९ ॥

तत्र गत्वा महासत्त्वः पादाभ्यां पीडयन् गिरिम् ।
जगाम वायुवेगेन पर्वतश्च महीतलम् ॥ १० ॥

गतो महीसमानत्वं त्रिंशद्योजनमुच्छ्रितः ।
मारुतिर्गगनान्तःस्थो महाशब्दं चकार सः ॥ ११ ॥

तं श्रुत्वा वानराः सर्वे ज्ञात्वा मारुतिमागतम् ।
हर्षेण महताविष्टाः शब्दं चक्रुर्महास्वनम् ॥ १२ ॥

शब्देनैव विजानीमः कृतकार्यः समागतः ।
हनूमानेव पश्यध्वं वानरा वानरर्षभम् ॥ १३ ॥

एवं ब्रुवत्सु वीरेषु वानरेषु स मारुतिः ।
अवतीर्य गिरेर्मूर्ध्नि वानरानिदमब्रवीत् ॥ १४ ॥

दृष्टा सीता मया लङ्का धर्षिता च सकानना ।
सम्भाषितो दशग्रीवस्ततोऽहं पुनरागतः ॥ १५ ॥

दिसतील." तेव्हा दुःखाने कृश झालेली जानकी हनुमंताला म्हणाली. (१-४)

"तुला भेटल्यावर मी माझे दुःख विसरले होते. आता तू जात आहेस. यापुढे रामांची वार्ता ऐकल्याशिवाय मी कशी बरे राहू?" (५)

मारुती म्हणाला– "हे देवी, असे जर असेल, आणि तुला मान्य असेल तर तू माझ्या खांद्यावर आरूढ हो. मी एका क्षणात तुझी श्रीरामांशी भेट घडवून आणतो." (६)

सीता म्हणाली – "सागराला शुष्क करून किंवा त्याला बाणांच्या पिंजऱ्यात बद्ध करून, वानरांचे सह येथे येऊन आणि युद्धात रावणाचा वध करून, जर राम मला परत नेतील तर श्रीरामांची शाश्वत कीर्ती होईल. तेव्हा तू आता जा. ते येईपर्यंत मी कसे तरी प्राण धारण करीन." (७-८)

अशा प्रकारे सीतेने जाण्यास निरोप दिल्यावर तो वीर तिला प्रणाम करून, महासागर पार करून जाण्यासाठी पर्वताच्या शिखरावर गेला. (९)

तेथे गेल्यावर महासामर्थ्यसंपन्न मारुतीने आपल्या पायांनी त्या पर्वताला खाली दाबले व तो वायुवेगाने निघाला. त्या वेळी मारुतीने दाबल्यामुळे तीस योजने उंच असणारा तो पर्वत जमिनीत घुसून सपाट झाला. इकडे आकाशामधून जाणाऱ्या त्या मारुतीने प्रचंड आवाज केला. (१०-११)

तो आवाज ऐकून, 'मारुती येत आहे' हे कळल्यामुळे सर्व वानर मोठ्या आनंदाने भरून गेले आणि ते प्रचंड आवाज करू लागले. (१२)

(ते म्हणू लागले,) "या आवाजावरूनच आपणास कळत आहे की हनुमान आपली कामगिरी पूर्ण करूनच परत येत आहे. हे वानरांनो, पाहा, पाहा, हा वानरश्रेष्ठ हनुमान पाहा." (१३)

ते वानरवीर असे बोलत असतानाच, मारुती पर्वताच्या शिखरावर उतरला आणि वानरांना म्हणाला. (१४)

"मी सीतेला भेटलो, मी उपवनांसह लंकेचा विध्वंस केला. रावणाबरोबर संभाषण करून, मी परत आलो आहे. (१५)

इदानीमेव गच्छामो राममुग्रीवसन्निधिम् ।
इत्युक्ता वानराः सर्वे हर्षेणालिङ्ग्य मारुतिम् ॥ १६ ॥

केचिच्चुचुम्बुर्लाङ्गूलं ननृतुः केचिदुत्सुकाः ।
हनूमता समेतास्ते जग्मुः प्रस्रवणं गिरिम् ॥ १७ ॥

गच्छन्तो ददृशुर्वीरा वनं सुग्रीवरक्षितम् ।
मधुसंज्ञं तदा प्राहुरङ्गदं वानरर्षभाः ॥ १८ ॥

क्षुधिताः स्मो वयं वीर देह्यनुज्ञां महामते ।
भक्षयामः फलान्यद्य पिबामोऽमृतवन्मधु ॥ १९ ॥

सन्तुष्टा राघवं द्रष्टुं गच्छामोऽद्यैव सानुजम् ॥ २० ॥

अङ्गद उवाच

हनूमान्कृतकार्योऽयं पिब्रतैतत्प्रसादतः ।
जक्षध्वं फलमूलानि त्वरितं हरिसत्तमाः ॥ २१ ॥

ततः प्रविश्य हरयः पातुमारेभिरे मधु ।
रक्षिणस्ताननादृत्य दधिवक्त्रेण नोदितान् ॥ २२ ॥

पिबतस्ताडयामासुर्वानरान्वानरर्षभाः ।
ततस्तान्मुष्टिभिः पादैश्चूर्णयित्वा पपुर्मधु ॥ २३ ॥

ततो दधिमुखः क्रुद्धः सुग्रीवस्य स मातुलः ।
जगाम रक्षिभिः सार्धं यत्र राजा कपीश्वरः ॥ २४ ॥

गत्वा तमब्रवीद्देव चिरकालाभिरक्षितम् ।
नष्टं मधुवनं तेऽद्य कुमारेण हनूमता ॥ २५ ॥

श्रुत्वा दधिमुखेनोक्तं सुग्रीवो हृष्टमानसः ।
दृष्ट्वागतो न सन्देहः सीतां पवननन्दनः ॥ २६ ॥

नो चेन्मधुवनं द्रष्टुं समर्थः को भवेन्मम ।
तत्रापि वायुपुत्रेण कृतं कार्यं न संशयः ॥ २७ ॥

आत्ता, लगेच आपण श्रीराम व सुग्रीव यांच्याजवळ जाऊया." हनुमंताने असे म्हटल्यावर, सर्व वानरांनी आनंदाने मारुतीला आलिंगन दिले. (१६)

काही वानरांनी त्याच्या शेपटीचे चुंबन घेतले. तर इतर वानर अतिशय उत्साहाने नाचू लागले. मग हनुमंताला बरोबर घेऊन ते प्रस्रवण पर्वताकडे गेले. (१७)

वानर जेव्हा जात होते, तेव्हा सुग्रीवाने रक्षण केलेले मधू नावाचे वन त्या वीरांनी वाटेत पाहिले; त्यानंतर ते श्रेष्ठ वानर अंगदाला म्हणाले. (१८)

"हे वीरा, आम्ही भुकेलेले आहोत. हे महाबुद्धिमान हनुमंता, आम्हांला अनुज्ञा दे. म्हणजे आज आम्ही या मधु वनातील फळे खाऊन अमृताप्रमाणे असणारा मध आम्ही पिऊ. (१९)

अशा प्रकारे संतुष्ट होऊन आपण कनिष्ठ बंधूसह असणाऱ्या रामांना भेटण्यास जाऊ." (२०)

अंगद म्हणाला–"हे श्रेष्ठ वानरांनो, या हनुमानाने आपले कार्य पूर्ण केले आहे. त्याच्या कृपेमुळे तुम्ही त्वरेने फळे आणि मुळे खा आणि मधू प्या." (२१)

नंतर त्या वनात प्रवेश करून आणि दधिमुखाने पाठविलेल्या त्या वनरक्षकांना न जुमानता, वानरांनी मध पिण्यास प्रारंभ केला. (२२)

तेथील वनरक्षक वानर मध पिणाऱ्या वानरांना मारू लागले. तेव्हा त्या श्रेष्ठ वानरांनी त्या वनरक्षकांना बुक्यांनी आणि लाथांनी खूप बडविले आणि ते पुनः मध पिऊ लागले. (२३)

तेव्हा सुग्रीवाचा मामा असणारा तो दधिमुख रागावला आणि वनरक्षक वानरांसह वानरराज सुग्रीवाकडे गेला. (२४)

तेथे जाऊन तो त्या सुग्रीवाला म्हणाला, "हे राजन, तू चिरकाळ ज्या मधुवनाचे रक्षण केले होतेस, त्या तुझ्या मधुवनाची आज युवराज अंगद व हनुमान यांनी नासाडी केली आहे." (२५)

दधिमुखाने सांगितलेली वार्ता ऐकून सुग्रीवाचे मन आनंदित झाले. तो म्हणाला, "पवनसुत हनुमान सीतेला भेटून आला आहे, यात शंका नाही. (२६)

नाहीतर माझ्या मधुवनाकडे दृष्टी पाहण्यास कोण धजावेल बरे ? तसेच ते कार्य वायुसुत हनुमानानेच केले असणार यात संशय नाही." (२७)

श्रुत्वा सुग्रीववचनं हृष्टो रामस्तमब्रवीत् ।
किमुच्यते त्वया राजन्वचः सीताकथान्वितम् ॥ २८ ॥

सुग्रीवस्त्वब्रवीद्वाक्यं देव दृष्टावनीसुता ।
हनूमत्प्रमुखाः सर्वे प्रविष्टा मधुकाननम् ॥ २९ ॥

भक्षयन्ति स्म सकलं ताडयन्ति स्म रक्षिणः ।
अकृत्वा देवकार्यं ते द्रष्टुं मधुवनं मम ॥ ३० ॥

न समर्थास्ततो देवी दृष्टा सीतेति निश्चितम् ।
रक्षिणो वो भयं मास्तु गत्वा ब्रूत ममाज्ञया ॥ ३१ ॥

वानरानङ्गदमुखानानयध्वं ममान्तिकम् ।
श्रुत्वा सुग्रीववचनं गत्वा ते वायुवेगतः ॥ ३२ ॥

हनूमत्प्रमुखानूचुर्गच्छतेश्वरशासनात् ।
द्रष्टुमिच्छति सुग्रीवः सरामो लक्ष्मणान्वितः ॥ ३३ ॥

युष्मानतीव हृष्टास्ते त्वरयन्ति महाबलाः ।
तथेत्यम्बरमासाद्य ययुस्ते वानरोत्तमाः ॥३४॥

हनूमन्तं पुरस्कृत्य युवराजं तथाङ्गदम् ।
रामसुग्रीवयोरग्रे निपेतुर्भुवि सत्वरम् ॥ ३५ ॥

हनूमान् राघवं प्राह दृष्टा सीता निरामया ।
साष्टाङ्गं प्रणिपत्याग्रे रामं पद्माङ्करीश्वरम् ॥ ३६ ॥

कुशलं प्राह राजेन्द्र जानकी त्वां शुचान्विता ।
अशोकवनिकामध्ये शिंशपामूलमाश्रिता ॥ ३७ ॥

राक्षसीभिः परिवृता निराहारा कृशा प्रभो ।
हा राम राम रामेति शोचन्ती मलिनाम्बरा ॥ ३८ ॥

एकवेणी मया दृष्टा शनैराश्वासिता शुभा ।
वृक्षशाखान्तरे स्थित्वा सूक्ष्मरूपेण ते कथाम् ॥ ३९ ॥

जन्मारभ्य तवात्यर्थं दण्डकागमनं तथा ।
दशाननेन हरणं जानक्या रहिते त्वयि ॥ ४० ॥

सुग्रीवाचे वचन ऐकल्यावर आनंदाने श्रीराम त्याला म्हणाले, "हे राजा, तू सीतेबद्दल काय बोललास बरे ?" (२८)

तेव्हा सुग्रीव म्हणाला, "हे देवा, असे दिसते की भूमिकन्या सीतेचा शोध लागला आहे; कारण हनुमानादी सर्व वानर माझ्या मधुवनात शिरले आहेत, तेथील सर्व फळे खात आहेत आणि वनरक्षकांना बडवीत आहेत. देवा, तुमचे कार्य केल्याशिवाय माझ्या मधुवनाकडे पाहण्याससुद्धा ते धजावणार नाहीत. तेव्हा देवी सीता सापडली आहे, हे निश्चित आहे. हे वनरक्षकांनो, तुम्ही भिऊ नका. परत तेथे जाऊन तुम्ही माझी आज्ञा त्या वानरांना सांगा, आणि त्यांना माझ्याजवळ घेऊन या." सुग्रीवाचे हे वचन ऐकल्यावर, ते वनरक्षक वायुवेगाने गेले आणि हनुमान इत्यादी प्रमुख वानरांना म्हणाले, "सुग्रीव राजाच्या आज्ञेनुसार तुम्ही सत्वर निघा. श्रीराम आणि लक्ष्मण यांना व सुग्रीवाला तुम्हांला भेटण्याची इच्छा आहे. हे महाबलवान वीरांनो, त्या तिघांना अतिशय आनंद झाला आहे. तुम्हांला त्वरा करून येण्यास सांगितले आहे." "ठीक आहे" असे म्हणून त्या श्रेष्ठ वानरांनी आकाशात उड्डाण केले आणि ते जाण्यास निघाले. (२९-३४)

त्यानंतर हनुमंत आणि युवराज अंगद यांना पुढे करून सर्व वानरांनी पटकन श्रीराम आणि सुग्रीव यांच्यापुढे जमिनीवर लोटांगण घातले. (३५)

हनुमान राघवांना म्हणाला, "मी सीतेला भेटलो आहे. ती कुशल आहे." आणि त्याने राघवांना आणि नंतर वानरराज सुग्रीवाला साष्टांग नमस्कार केला. (३६)

"हे राजेंद्रा, शोकमग्न जानकीने तुम्हांला आपले कुशल सांगण्यास मला सांगितले आहे. ती अशोकवाटिकेमध्ये एका अशोक वृक्षाखाली बसलेली आहे. हे प्रभो, ती राक्षसींनी वेढलेली असून निराहार असल्याने कृश झाली आहे. 'हा राम, राम, राम' असा ती सारखा शोक करीत आहे. तिची वस्त्रे मलिन आहेत. तिने एकच वेणी घातली होती. ती मला दिसली. तिचे मी हळूहळू सांत्वन केले. सूक्ष्म रूपाने वृक्षाच्या फांदीवरील पानांमध्ये दडून मी तुमची कथा तिला सांगितली. तुमच्या जन्मापासून प्रारंभ करून मी म्हटले, तुम्ही दंडकारण्यात आलात, तुम्ही आश्रमात नसताना रावणाने जानकीचे

सुग्रीवेण यथा मैत्री कृत्वा वालिनिबर्हणम् ।
मार्गणार्थं च वैदेह्याः सुग्रीवेण विसर्जिताः ॥ ४१ ॥

महाबला महासत्त्वा हरयो जितकाशिनः ।
गताः सर्वत्र सर्वे वै तत्रैकोऽहमिहागतः ॥ ४२ ॥

अहं सुग्रीवसचिवो दासोऽहं राघवस्य हि ।
दृष्टा यज्जानकी भाग्यात्प्रयासः फलितोऽद्य मे ॥ ४३ ॥

इत्युदीरितमाकर्ण्य सीता विस्फारितेक्षणा ।
केन वा कर्णपीयूषं श्रावितं मे शुभाक्षरम् ॥ ४४ ॥

यदि सत्यं तदायातु मद्दर्शनपथं तु सः ।
ततोऽहं वानराकारः सूक्ष्मरूपेण जानकीम् ॥ ४५ ॥

प्रणम्य प्राञ्जलिर्भूत्वा दूरादेव स्थितः प्रभो ।
पृष्टोऽहं सीतया कस्त्वमित्यादि बहुविस्तरम् ॥ ४६ ॥

मया सर्वं क्रमेणैव विज्ञापितमरिन्दम ।
पश्चान्मयार्पितं देव्यै भवद्दत्ताङ्गुलीयकम् ॥ ४७ ॥

तेन मामतिविश्वस्ता वचनं चेदमब्रवीत् ।
यथा दृष्टास्मि हनुमन्पीड्यमाना दिवानिशम् ॥ ४८ ॥

राक्षसीनां तर्जनैस्तत्सर्वं कथय राघवे ।
मयोक्तं देवि रामोऽपि त्वच्चिन्तापरिनिष्ठितः ॥ ४९ ॥

परिशोचत्यहोरात्रं त्वद्वार्तां नाधिगम्य सः ।
इदानीमेव गत्वाहं स्थितिं रामाय ते ब्रुवे ॥ ५० ॥

रामः श्रवणमात्रेण सुग्रीवेण सलक्ष्मणः ।
वानरानीकपैः सार्धमागमिष्यति तेऽन्तिकम् ॥ ५१ ॥

रावणं सकुलं हत्वा नेष्यति त्वां स्वकं पुरम् ।
अभिज्ञां देहि मे देवि यथा मां विश्वसेद्विभुः ॥ ५२ ॥

इत्युक्ता सा शिरोरत्नं चूडापाशे स्थितं प्रियम् ।
दत्त्वा काकेन यद्वृत्तं चित्रकूटगिरौ पुरा ॥ ५३ ॥

हरण केले; तुम्ही सुग्रीवाशी मैत्री केली, वालीचा वध केला. नंतर वैदेहीचा शोध करण्यास सुग्रीवाने वानरांना पाठविले. महाबली, महापराक्रमी, विजयशाली वानर सर्वत्र गेले; त्यांपैकी एकटा मी येथे आलो आहे. मी सुग्रीवाचा सचिव असून श्रीराघवांचा दास आहे, भाग्यामुळे मला जानकी दिसली; त्यामुळे माझा प्रयास आज सफल झाला आहे. (३७-४३)

माझे असे वचन ऐकल्यावर सीतेने आपले डोळे उघडले आणि ती म्हणाली, 'माझ्या कानांना अमृताप्रमाणे असणारे हे शुभ वचन मला कुणी ऐकवले बरे ? (४४)

हे जर सर्व सत्य असेल तर असे बोलणाऱ्याला मला पाहू दे.' हे प्रभो, तेव्हा सूक्ष्मरूपाने वानराच्या रूपात मी तिला प्रणाम केला आणि हात जोडून मी तिच्यापुढे दूरच उभा राहिलो. तेव्हा 'तू कोण ?' इत्यादी पुष्कळ गोष्टी तिने मला विचारल्या. (४५-४६)

हे अरिदमना, मी सर्व गोष्टी तिला क्रमाने सांगितल्या. त्यानंतर तुम्ही दिलेली अंगठी मी देवी सीतेला अर्पण केली. (४७)

त्यामुळे तिचा माझ्यावर अतिशय विश्वास बसला. मग ती मला असे म्हणाली "हे हनुमंता, राक्षसींकडून होणाऱ्या रात्रंदिवसाच्या छळाने मी पीडित झाले आहे, हे तू पाहिले आहेस; ते सर्व तू राघवांना सांग.' तेव्हा मी म्हटले, 'हे देवी, श्रीरामसुद्धा तुझी कोणतीच वार्ता न कळल्यामुळे चिंताग्रस्त होऊन रात्रंदिवस शोक करीत आहेत. तेव्हा मी आत्ताच जाऊन, त्यांना तुझी अवस्था सांगतो. (४८-५०)

ती वार्ता ऐकताच श्रीराम हे सुग्रीव, लक्ष्मण आणि वानर- सेनापती यांच्यासह तुझ्याकडे येतील. (५१)

आणि कुळासकट रावणाचा वध करून ते तुला स्वतःच्या नगरीला नेतील. तेव्हा हे देवी, मला अशी एकादी खूण दे की जिच्यामुळे प्रभू श्रीरामांचा माझ्यावर विश्वास बसेल.' (५२)

मी तिला असे म्हटल्यावर, आपल्या केशपाशातील आवडता चूडामणी तिने मला दिला. तसेच पूर्वी चित्रकूट पर्वतावर जी कावळ्याची कथा घडली होती, तीसुद्धा तिने मला सांगितली. नंतर अश्रुपूर्ण नेत्रांनी ती मला म्हणाली, 'राघवांना माझे कुशल सांग आणि

तदप्याहाश्रुपूर्णाक्षी कुशलं ब्रूहि राघवम् ।
लक्ष्मणं ब्रूहि मे किञ्चिदुरुक्तं भाषितं पुरा ॥ ५४ ॥

तत्क्षमस्वाज्ञभावेन भाषितं कुलनन्दन ।
तारयेन्मां यथा रामस्तथा कुरु कृपान्वितः ॥ ५५ ॥

इत्युक्त्वा रुदती सीता दुःखेन महतावृता ।
मयाप्याश्वासिता राम वदता सर्वमेव ते ॥ ५६ ॥

ततः प्रस्थापितो राम त्वत्समीपमिहागतः ।
तदागमनवेलायामशोकवनिकां प्रियाम् ॥ ५७ ॥

उत्पाट्य राक्षसांस्तत्र बहून्हत्वा क्षणादहम् ।
रावणस्य सुतं हत्वा रावणेनाभिभाष्य च ॥ ५८ ॥

लङ्कामशेषतो दग्ध्वा पुनरप्यागमं क्षणात् ।
श्रुत्वा हनूमतो वाक्यं रामोऽत्यन्तप्रहृष्टधीः ॥ ५९ ॥

हनूमंस्ते कृतं कार्यं देवैरपि सुदुष्करम् ।
उपकारं न पश्यामि तव प्रत्युपकारिणः ॥ ६० ॥

इदानीं ते प्रयच्छामि सर्वस्वं मम मारुते ।
इत्यालिङ्ग्य समाकृष्य गाढं वानरपुङ्गवम् ॥ ६१ ॥

सार्द्रनेत्रो रघुश्रेष्ठः परां प्रीतिमवाप सः ।
हनूमन्तमुवाचेदं राघवो भक्तवत्सलः ॥ ६२ ॥

परिस्फुटो हि मे लोके दुर्लभः परमात्मनः ।
अतस्त्वं मम भक्तोऽसि प्रियोऽसि हरिपुङ्गव ॥ ६३ ॥

यत्पादपद्मयुगलं तुलसीदलाद्यैः
सम्पूज्य विष्णुपदवीमतुलां प्रयान्ति ।
तेनैव किं पुनरसौ परिरब्धमूर्ती
रामेण वायुतनयः कृतपुण्यपुञ्जः ॥ ६४ ॥

लक्ष्मणाला सांग की हे कुलनंदना, मी तुला जे काही वाईट बोलले ते गैरसमजाने बोलले होते, त्याबद्दल तू मला क्षमा कर. माझ्यावर दयाळू होऊन राम मला नेतील, असे तू कर.' (५३-५५)

असे बोलून अतिशय दुःखाने व्याकूळ झालेली सीता रडू लागली. तेव्हा तुमचा सर्व वृत्तांत तिला सांगून मीसुद्धा तिचे सांत्वन केले. (५६)

नंतर तिचा निरोप घेऊन मी हे श्रीरामा, तुमच्या जवळ येथे येण्यास निघालो, त्या वेळी रावणाला प्रिय असणाऱ्या अशोक वाटिकेचा विध्वंस करून टाकला आणि एका क्षणात तेथील पुष्कळ राक्षसांना ठार केले. रावणाच्या एका पुत्राला मी मारले. रावणाशी संभाषण केले आणि लंकेचे संपूर्ण दहन करून मी क्षणात पुनः इकडे आलो आहे." हनुमंताचे हे वचन ऐकून रामांचे मन अतिशय आनंदित झाले. (५७-५९)

श्रीराम हनुमंताला म्हणाले, "हे हनुमाना, देवांनासुद्धा अतिशय दुष्कर असणारे कार्य तू केले आहेस. तुझे उपकार कसे फेडू, हे मला कळत नाही. (६०)

हे मारुती, आता मी तुला माझे सर्वस्व देत आहे." असे बोलून त्याला जवळ घेऊन श्रीरामांनी त्या वानरश्रेष्ठाला गाढ आलिंगन दिले. (६१)

रघुश्रेष्ठ श्रीरामांच्या डोळ्यांत पाणी आले. त्यांना हनुमानाविषयी फार प्रेम वाटले. मग भक्तवत्सल राघव हनुमानाला म्हणाले. (६२)

'हे वानरश्रेष्ठा, परमात्मा असणाऱ्या माझे आलिंगन मिळणे हे या जगात फार दुर्लभ आहे. तुला ते मिळाले म्हणून तू माझा भक्त आहेस आणि मला प्रिय आहेस." (६३)

हे पार्वती, ज्यांच्या चरणकमल युगलांची तुलसीदल इत्यादींनी पूजा करून, भक्त लोक अनुपम अशा विष्णुपदाची प्राप्ती करून घेतात, त्याच श्रीरामांनी ज्याला दृढ आलिंगन दिले, अशा त्या अनेक पुण्य कर्मांची राशी असणाऱ्या पवनतनयाबद्दल जास्त काय सांगावे ? (६४)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुन्दरकाण्डे पंचमः सर्गः ॥ ५ ॥

सुन्दरकाण्ड समाप्त

ॐ

अध्यात्मरामायण

युद्धकाण्ड

प्रथम सर्ग

वानरसेनेचे प्रस्थान

श्रीमहादेव उवाच

यथावद्भाषितं वाक्यं श्रुत्वा रामो हनूमतः ।
उवाचानन्तरं वाक्यं हर्षेण महतावृतः ॥ १ ॥

कार्यं कृतं हनुमता देवैरपि सुदुष्करम् ।
मनसापि यदन्येन स्मर्तुं शक्यं न भूतले ॥ २ ॥

शतयोजनविस्तीर्णं लङ्घयेत्कः पयोनिधिम् ।
लङ्कां च राक्षसैर्गुप्तां को वा धर्षयितुं क्षमः ॥ ३ ॥

भृत्यकार्यं हनुमता कृतं सर्वमशेषतः ।
सुग्रीवस्येदृशो लोके न भूतो न भविष्यति ॥ ४ ॥

अहं च रघुवंशश्च लक्ष्मणश्च कपीश्वरः ।
जानक्या दर्शनेनाद्य रक्षिताः स्मो हनूमता ॥ ५ ॥

सर्वथा सुकृतं कार्यं जानक्याः परिमार्गणम् ।
समुद्रं मनसा स्मृत्वा सीदतीव मनो मम ॥ ६ ॥

कथं नक्रझषाकीर्णं समुद्रं शतयोजनम् ।
लङ्घयित्वा रिपुं हन्यां कथं द्रक्ष्यामि जानकीम् ॥ ७ ॥

श्रुत्वा तु रामवचनं सुग्रीवः प्राह राघवम् ।
समुद्रं लङ्घयिष्यामो महानक्रझषाकुलम् ॥ ८ ॥

लङ्कां च विधमिष्यामो हनिष्यामोऽद्य रावणम् ।
चिन्तां त्यज रघुश्रेष्ठ चिन्ता कार्यविनाशिनी ॥ ९ ॥

श्रीमहादेव म्हणाले– हे पार्वती, हनुमंताने सीतेविषयी जे पाहिले होते ते जसेच्या तसे सांगितले. ते ऐकल्यावर, अतिशय आनंदाने श्रीराम बोलले. (१)

"हनुमंताने जे कार्य केलेले आहे ते करणे हे देवांनाही दुष्कर आहे आणि त्याचे मनानेसुद्धा स्मरण करणे हे या भूतलावरील अन्य कुणालाही शक्य नाही. (२)

शंभर योजने विस्तृत असणारा समुद्र उल्लंघून जाईल असा दुसरा कोण आहे बरे ? तसेच राक्षसांकडून रक्षिली गेलेली लंका उध्वस्त करण्यास दुसरा कोण बरे समर्थ आहे ? (३)

सेवक म्हणून हनुमंताने सुग्रीवाचे सर्व कार्य पूर्णपणे केले आहे. हनुमानासमान असा कोणी या जगात नाही आणि पुढे होणारही नाही. (४)

जानकीची भेट घेऊन या हनुमंताने आज नक्कीच मी, माझा रघुवंश, लक्ष्मण आणि वानरराज सुग्रीव यांचे रक्षण केले आहे. (५)

जानकीचा शोध करण्याचे कार्य आता चांगल्याप्रकारे पार पडले आहे. तथापि समुद्राची आठवण मनात आल्यावर, माझे मन जणू खचून जात आहे. (६)

मगर आणि सुसरी यांनी भरलेला आणि शंभर योजने विस्तीर्ण असलेला समुद्र उल्लंघून जाऊन मी शत्रूला कसा मारू ? आणि जानकीला कसा भेटू ?" (७)

श्रीरामांचे वचन ऐकल्यावर सुग्रीव राघवांना म्हणाला, "प्रचंड नक्र आणि मगरी यांनी भरलेला समुद्र आपण नक्कीच उल्लंघन करून जाऊ . (८)

तसेच आपण लंकेचा विध्वंस करू आणि लगेच रावणाचाही वध करू. हे रघुश्रेष्ठा, चिंता सोडा. कारण चिंता ही कार्याचा नाश करणारी असते. (९)

एतान्पश्य महासत्त्वान् शूरान्वानरपुङ्गवान् ।
त्वत्प्रियार्थं समुद्युक्तान्प्रवेष्टुमपि पावकम् ॥ १० ॥

समुद्रतरणे बुद्धिं कुरुष्व प्रथमं ततः ।
दृष्ट्वा लङ्कां दशग्रीवो हत इत्येव मन्महे ॥ ११ ॥

नहि पश्याम्यहं कश्चित्त्रिषु लोकेषु राघव ।
गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ १२ ॥

सर्वथा नो जयो राम भविष्यति न संशयः ।
निमित्तानि च पश्यामि तथाभूतानि सर्वशः ॥ १३ ॥

सुग्रीववचनं श्रुत्वा भक्तिवीर्यसमन्वितम् ।
अङ्गीकृत्याब्रवीद्रामो हनूमन्तं पुरःस्थितम् ॥ १४ ॥

येन केन प्रकारेण लङ्घयामो महार्णवम् ।
लङ्कास्वरूपं मे ब्रूहि दुःसाध्यं देवदानवैः ॥ १५ ॥

ज्ञात्वा तस्य प्रतीकारं करिष्यामि कपीश्वर ।
श्रुत्वा रामस्य वचनं हनूमान्विनयान्वितः ॥ १६ ॥

उवाच प्राञ्जलिर्देव यथा दृष्टं ब्रवीमि ते ।
लङ्का दिव्या पुरी देव त्रिकूटशिखरे स्थिता ॥ १७ ॥

स्वर्णप्राकारसहिता स्वर्णाट्टालकसंयुता ।
परिखाभिः परिवृता पूर्णाभिर्निर्मलोदकैः ॥ १८ ॥

नानोपवनशोभाढ्या दिव्यवापीभिरावृता ।
गृहैर्विचित्रशोभाढ्यैर्मणिस्तम्भमयैः शुभैः ॥ १९ ॥

पश्चिमद्वारमासाद्य गजवाहाः सहस्रशः ।
उत्तरे द्वारि तिष्ठन्ति साश्ववाहाः सपत्तयः ॥ २० ॥

तिष्ठन्त्यर्बुदसङ्ख्याकाः प्राच्यामपि तथैव च ।
रक्षिणो राक्षसा वीरा द्वारं दक्षिणमाश्रिताः ॥ २१ ॥

मध्यकक्षेऽप्यसङ्ख्याता गजाश्वरथपत्तयः ।
रक्षयन्ति सदा लङ्कां नानास्त्रकुशलाः प्रभो ॥ २२ ॥

हे श्रीरामा, हे महापराक्रमी, शूर, वानरश्रेष्ठ पाहा. तुमचे प्रिय करण्यासाठी ते अग्नीतसुद्धा प्रवेश करण्यास तयार आहेत. (१०)

म्हणून प्रथम समुद्र कसा पार करावयाचा याचा विचार करा. मग लंका पाहिल्यावर दशानन रावण मेलाच असे आम्ही समजतो. (११)

हे राघवा, धनुष्य घेऊन युद्धास सज्ज झाल्यावर तुमच्यापुढे रणांगणात उभा ठाकेल असा कोणीही त्रैलोक्यातसुद्धा मला दिसत नाही. (१२)

हे रामा, आपला संपूर्ण जय होणार यात काहीही संशय नाही. आपला विजय सुचविणारी तशा प्रकारची शुभ चिन्हे मला सगळीकडे दिसत आहेत." (१३)

भक्ती आणि सामर्थ्य यांनी भरलेले ते सुग्रीवाचे वचन ऐकल्यावर, त्याचा स्वीकार करून, पुढे उभ्या असलेल्या हनुमंताला श्रीराम म्हणाले. (१४)

"अरे मारुती, आपण कोणत्याही प्रकाराने हा महासागर उल्लंघून जाऊच. पण तत्पूर्वी देव आणि दानव यांनाही प्रवेश करण्यास कठीण असणाऱ्या लंकेचे स्वरूप तू मला सांग. (१५)

ते कळल्यावर, हे कपिश्रेष्ठा, त्याचा उपाय मी शोधीन." रामांचे वचन ऐकल्यावर, हनुमान विनयपूर्वक आणि हात जोडून रामांना म्हणाला, "हे देवा, जसे मी पाहिले आहे तसे तुम्हांला सांगतो. हे देवा, ती दिव्य लंकापुरी त्रिकूट पर्वताच्या शिखरावर वसलेली आहे. (१६-१७)

तिला सोन्याचे तट आहेत. सोन्याचे बुरुज आहेत. स्वच्छ पाण्याने भरलेल्या खंदकांनी ती सर्व बाजूंनी वेढलेली आहे. (१८)

नाना उपवनांनी ती शोभासंपन्न आहे. तिच्यामध्ये अनेक दिव्य वापी आहेत. चित्रविचित्र शोभेने समृद्ध, मणिस्तंभयुक्त आणि सुंदर घरे त्या लंकेत आहेत. (१९)

तिच्या पश्चिम द्वाराला लागून हजारो गजवाहक, उत्तरद्वाराजवळ पायदळ सैनेसह घोडेस्वार, तसेच पूर्वेकडील दाराशी दहा कोटी रक्षक वीर आणि दक्षिणेकडील दारातही तितकेच रक्षकवीर आहेत. (२०-२१)

हे प्रभो, (लंकेच्या) मध्यभागी, असंख्य गज, अश्व, रथ आणि पायदळ असून अनेक शस्त्रास्त्रांत कुशल असलेले सैनिक लंकेचे सदा रक्षण करतात. (२२)

सङ्क्रमैर्विविधैर्लङ्घ्या शतघ्नीभिश्च संयुता ।
एवं स्थितेऽपि देवेश शृणु मे तत्र चेष्टितम् ॥ २३ ॥

दशाननबलौघस्य चतुर्थांशो मया हतः ।
दग्ध्वा लङ्कां पुरीं स्वर्णप्रासादो धर्षितो मया ॥ २४ ॥

शतघ्न्यः सङ्क्रमाश्चैव नाशिता मे रघूत्तम ।
देव त्वद्दर्शनादेव लङ्का भस्मीकृता भवेत् ॥ २५ ॥

प्रस्थानं कुरु देवेश गच्छामो लवणाम्बुधेः ।
तीरं सह महावीरैर्वानरौघैः समन्ततः ॥ २६ ॥

श्रुत्वा हनूमतो वाक्यमुवाच रघुनन्दनः ।
सुग्रीव सैनिकान्सर्वान्प्रस्थानायाभिनोदय ॥ २७ ॥

इदानीमेव विजयो मुहूर्तः परिवर्तते ।
अस्मिन्मुहूर्ते गत्वाहं लङ्कां राक्षसषड्कुलाम् ॥ २८ ॥

सप्राकारां सुदुर्धर्षां नाशयामि सरावणाम् ।
आनेष्यामि च सीतां मे दक्षिणाक्षि स्फुरत्यधः ॥ २९ ॥

प्रयातु वाहिनी सर्वा वानराणां तरस्विनाम् ।
रक्षन्तु यूथपाः सेनामग्रे पृष्ठे च पार्श्वयोः ॥ ३० ॥

हनूमन्तमथारुह्य गच्छाम्यग्रेऽङ्गदं ततः ।
आरुह्य लक्ष्मणो यातु सुग्रीव त्वं मया सह ॥ ३१ ॥

गजो गवाक्षो गवयो मैन्दो द्विविद एव च ।
नलो नीलः सुषेणश्च जाम्बवांश्च तथापरे ॥ ३२ ॥

सर्वे गच्छन्तु सर्वत्र सेनायाः शत्रुघातिनः ।
इत्याज्ञाप्य हरीन् रामः प्रतस्थे सहलक्ष्मणः ॥ ३३ ॥

सुग्रीवसहितो हर्षात्सेनामध्यगतो विभुः ।
वारणेन्द्रनिभाः सर्वे वानराः कामरूपिणः ॥ ३४ ॥

क्ष्वेलन्तः परिगर्जन्तो जग्मुस्ते दक्षिणां दिशम् ।
भक्षयन्तो ययुः सर्वे फलानि च मधूनि च ॥ ३५ ॥

लंकेमध्ये जाण्याचे मार्ग नाना प्रकारच्या पुलांनी तसेच तोफांनी युक्त आहेत. परंतु हे देवेश्वरा, असे सर्व असतानासुद्धा मी तेथे काय केले, ते तुम्ही ऐका. (२३)

रावणाच्या सैन्याचा एक चतुर्थांश भाग मी ठार केला आहे. लंका नगरी जाळून, मी रावणाचा सोन्याचा प्रासाद उध्वस्त केला आहे. (२४)

हे रघूत्तमा, तोफा आणि पूल मी नष्ट केले आहेत. हे देवा, मला वाटते तुमची दृष्टी पडताच उरलेली लंका जळून जाईल. (२५)

हे देवेश्वरा, जाण्यासाठी प्रस्थान ठेवा. थोर वीर असणाऱ्या वानरांच्या समूहासह आपण सर्व बाजूंनी समुद्राच्या तीरावर जाऊ या." (२६)

हनुमानाचे वचन ऐकल्यावर रघुनंदन म्हणाले, "अरे सुग्रीवा, सर्व सैनिकांना कूच करण्याची आज्ञा दे. कारण आत्ताच विजय (नावाचा) मुहूर्त आहे. याच मुहूर्तावर, राक्षसांनी भरलेल्या, तटबंदी असणाऱ्या, अतिशय दुर्गम अशा लंकेत जाऊन, रावणासकट तिचा मी नाश करीन आणि सीतेला परत आणीन. या वेळी माझा उजवा डोळा खालच्या बाजूने लवत आहे. (२७-२९)

वेगवान आणि बलिष्ठ वानरांची संपूर्ण सेना कूच करू दे. जे गटाधिकारी असतील त्यांनी आपल्या आपल्या गटाचे मागे, पुढे व दोन्ही बाजूंनी रक्षण करावे. (३०)

हनुमंताच्या खांद्यावर आरोहण करून मी सर्वात पुढे जाईन, नंतर माझ्यामागे अंगदाच्या खांद्यावर चढून लक्ष्मण येऊ दे. हे सुग्रीवा, तू मात्र माझ्याबरोबर चल. (३१)

गज, गवाक्ष, गवय, मैंद तसेच द्विविद, नल, नील, सुषेण, जांबवान् तसेच शत्रूचा वध करणारे इतर सर्व वानर आणि सेनेचे अधिपती हे सैन्याच्या सर्व बाजूंनी जाऊ देत." वानरांना अशी आज्ञा करून श्रीराम लक्ष्मणासह निघाले. (३२-३३)

सुग्रीवासह प्रभू राम हे आनंदाने सेनेच्या मध्यभागी चालत होते. गजराजाप्रमाणे असणारे आणि इच्छेप्रमाणे रूप धारण करणारे, आणि उड्या मारीत गर्जना करीत असणारे ते सर्व वानर दक्षिण दिशेने निघाले. वाटेत फळे खात आणि मध पीत ते सर्व जात होते. (३४-३५)

ब्रुवन्तो राघवस्याग्रे हनिष्यामोऽद्य रावणम् ।
एवं ते वानरश्रेष्ठा गच्छन्त्यतुलविक्रमाः ॥ ३६ ॥

हरिभ्यामुह्यमानौ तौ शुशुभाते रघूत्तमौ ।
नक्षत्रैः सेवितौ यद्वच्चन्द्रसूर्याविवाम्बरे ॥ ३७ ॥

आवृत्य पृथिवीं कृत्स्नां जगाम महती चमूः ।
प्रस्फोटयन्तः पुच्छाग्रानुद्वहन्तश्च पादपान् ॥ ३८ ॥

शैलानारोहयन्तश्च जग्मुर्मारुतवेगतः ।
असङ्ख्याताश्च सर्वत्र वानराः परिपूरिताः ॥ ३९ ॥

हृष्टास्ते जग्मुरत्यर्थं रामेण परिपालिताः ।
गता चमूर्दिवारात्रं क्वचिन्नासज्जत क्षणम् ॥ ४० ॥

काननानि विचित्राणि पश्यन्मलयसह्ययोः ।
ते सह्यं समतिक्रम्य मलयं च तथा गिरिम् ॥ ४१ ॥

आययुश्चानुपूर्व्येण समुद्रं भीमनिःस्वनम् ।
अवतीर्य हनूमन्तं रामः सुग्रीवसंयुतः ॥ ४२ ॥

सलिलाभ्याशमासाद्य रामो वचनमब्रवीत् ।
आगताः स्मो वयं सर्वे समुद्रं मकरालयम् ॥ ४३ ॥

इतो गन्तुमशक्यं नो निरुपायेन वानराः ।
अत्र सेनानिवेशोऽस्तु मन्त्रयामोऽस्य तारणे ॥ ४४ ॥

श्रुत्वा रामस्य वचनं सुग्रीवः सागरान्तिके ।
सेनां न्यवेशयत्क्षिप्रं रक्षितां कपिकुञ्जरैः ॥ ४५ ॥

ते पश्यन्तो विषेदुस्तं सागरं भीमदर्शनम् ।
महोन्नततरङ्गाढ्यं भीमनक्रभयङ्करम् ॥ ४६ ॥

अगाधं गगनाकारं सागरं वीक्ष्य दुःखिताः ।
तरिष्यामः कथं घोरं सागरं वरुणालयम् ॥ ४७ ॥

"श्रीरामांच्या देखतच आज आम्ही रावणाला मारतो ." असे बोलत ते अतुल पराक्रमी वानरश्रेष्ठ जात होते. (३६)

हनुमान आणि अंगद यांच्या खांद्यावरून जाणारे ते दोन रघूत्तम श्रीराम आणि लक्ष्मण हे आकाशात नक्षत्रांकडून सेवा केल्या जाणाऱ्या चंद्रसूर्याप्रमाणे शोभत होते. (३७)

संपूर्ण पृथ्वीला झाकून टाकून ती प्रचंड सेना चालली होती. काही वानर आपल्या शेपटीची टोके आपटीत होते. काही वृक्ष उपटून हातात घेऊन जात होते. काही पर्वतावर चढले होते. अशा प्रकारे ते वानर वायुवेगाने जात होते. पृथ्वीवर सर्वत्र असंख्य वानर भरून गेले होते. (३८-३९)

श्रीरामांनी रक्षिलेले ते वानर अतिशय आनंदाने जात होते. ती सर्व वानर सेना रात्रंदिवस चालत होती. एक क्षणभरही ती कुठे थांबली नाही. (४०)

मलय आणि सह्य या पर्वतावरील विचित्र अरण्ये पाहात श्रीराम सेनेसह चालत होते. नंतर सह्य आणि मलय पर्वतांना ओलांडून, ते सर्व जण भयंकर गर्जना करणाऱ्या समुद्राजवळ येऊन पोचले. त्यानंतर हनुमंताच्या खांद्यावरून उतरून श्रीराम सुग्रीवासह सागराच्या पाण्याजवळ गेले आणि म्हणाले, "मगरींचे वसतिस्थान असणाऱ्या या समुद्राजवळ आपण सर्वजण येऊन पोचलेलो आहोत. (४१-४३)

हे वानरांनो, आता काही तरी उपाय शोधल्याशिवाय यापुढे जाणे आपणांस अशक्य आहे. तेव्हा येथेच सैन्याची छावणी करूया. आणि समुद्र कसा तरून जावयाचा याचा विचार करूया." (४४)

रामांचे वचन ऐकल्यावर सुग्रीवाने सागराजवळच त्वरित सैन्याची छावणी ठोकली. मोठमोठे वानर तिचे रक्षण करू लागले. (४५)

भयंकर दिसणारा, अतिशय उंच अशा लाटा येत असलेला आणि भयानक सुसरी इत्यादींनी भयंकर वाटणारा तो सागर पाहून सर्व जण विषण्ण झाले. (४६)

आकाशाप्रमाणे अनंत व अगाध असा सागर पाहून ते दुःखी कष्टी झाले, ते विचार करू लागले की 'वरुणाचे निवासस्थान असणारा हा भयानक समुद्र आपण कसा बरे तरून जाणार ? (४७)

हन्तव्योऽस्माभिरद्यैव रावणो राक्षसाधमः ।
इति चिन्ताकुलाः सर्वे रामपार्श्वे व्यवस्थिताः ॥४८॥

रामः सीतामनुस्मृत्य दुःखेन महतावृतः ।
विलप्य जानकीं सीतां बहुधा कार्यमानुषः ॥ ४९ ॥

अद्वितीयश्चिदात्मैकः परमात्मा सनातनः ।
यस्तु जानाति रामस्य स्वरूपं तत्त्वतो जनः ॥ ५० ॥

तं न स्पृशति दुःखादि किमुतानन्दमव्ययम् ।
दुःखहर्षभयक्रोधलोभमोहमदादयः ॥ ५१ ॥

अज्ञानलिङ्गान्येतानि कुतः सन्ति चिदात्मनि ।
देहाभिमानिनो दुःखं न देहस्य चिदात्मनः ॥ ५२ ॥

सम्प्रसादे द्वयाभावात्सुखमात्रं हि दृश्यते ।
बुद्ध्याद्यभावात्संशुद्धे दुःखं तत्र न दृश्यते ।
अतो दुःखादिकं सर्वं बुद्धेरेव न संशयः ॥ ५३ ॥

रामः परात्मा पुरुषः पुराणो
नित्योदितो नित्यसुखो निरीहः ।
तथापि मायागुणसङ्गतोऽसौ
सुखीव दुःखीव विभाव्यतेऽबुधैः ॥ ५४ ॥

आणि त्या राक्षसाधम रावणाला तर आजच ठार करावयाचे आहे.' अशा चिंतेने व्याकूळ झालेले सर्वजण श्रीरामांच्या बाजूला बसले होते. (४८)

सीतेची आठवण काढून श्रीराम अतिशय दुःखी झाले होते. तसेच विशिष्ट कार्य करण्यासाठी त्यांनी मनुष्याचे रूप धारण केले असल्यामुळे, ते जनककन्या सीतेसाठी नाना प्रकारे शोक करू लागले. (४९)

खरे म्हणजे श्रीराम हे अद्वितीय, चैतन्य-स्वरूप, एकमेव, सनातन, परमात्मा आहेत. जो माणूस रामांचे हे स्वरूप तत्त्वतः खरेखुरे जाणतो, त्याला दुःख इत्यादींचा स्पर्श होतच नाही. मग आनंदस्वरूप, अविनाशी रामांना दुःख इत्यादींचा स्पर्श कसा होईल बरे ? (कारण) दुःख,हर्ष, भय, क्रोध, लोभ, मोह, मद इत्यादी सर्व अज्ञानाची चिन्हे आहेत; ती ज्ञानस्वरूप रामांच्या ठिकाणी कशी बरे असतील ? देहाचा अभिमान बाळगणाऱ्यालाच देहाचे दुःख होते; ते दुःख चिदात्म्याला मुळीच होत नाही. (५०-५२)

समाधीच्या स्थितीत (आत्मसाक्षात्कार झाला असताना,) द्वैताचा अभाव होत असल्याने, तेथे केवळ सुखच दिसून येते. त्या आत्मसाक्षात्काराच्या स्थितीत बुद्धी इत्यादींचा अभाव असल्यामुळे, दुःख कधीही दिसून येत नाही, म्हणून दुःख इत्यादी सर्व काही बुद्धीचेच गुणधर्म आहेत, यात संशय राहात नाही. (५३)

श्रीराम हे पुराणपुरुष, परमात्मा, नित्य प्रकाशमान, नित्य सुखस्वरूपी आणि कामनारहित आहेत. तथापि मायेच्या गुणांशी संग झाल्यामुळे ते सुखी अगर दुःखी आहेत, असे अज्ञानी माणसांना वाटत असते. (५४)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीय सर्ग

रावणाकडून बिभीषणाचा धिक्कार

श्रीमहादेव उवाच

लङ्कायां रावणो दृष्ट्वा कृतं कर्म हनूमता ।
दुष्करं दैवतैर्वापि ह्रिया किञ्चिदवाङ्मुखः ॥ १ ॥

आहूय मन्त्रिणः सर्वानिदं वचनमब्रवीत् ।
हनूमता कृतं कर्म भवद्भिर्दृष्टमेव तत् ॥ २ ॥

श्रीमहादेव म्हणाले– हे पार्वती, तिकडे लंकेमध्ये हनुमानाने देवतांनासुद्धा दुष्कर असणारे कर्म केले आहे हे पाहून, रावणाने आपल्या सर्व मंत्र्यांना बोलावले आणि लज्जेने आपले मस्तक किंचित खाली वाकवून तो त्यांना म्हणाला, "हनुमानाने केलेले सर्व कर्म तुम्ही पाहिलेले आहेच. (१-२)

प्रविश्य लङ्कां दुर्धर्षां दृष्ट्वा सीतां दुरासदाम् ।
हत्वा च राक्षसान्वीरानक्षं मन्दोदरीसुतम् ॥ ३ ॥

दग्ध्वा लङ्कामशेषेण लङ्घयित्वा च सागरम् ।
युष्मान्सर्वाननिक्रम्य स्वस्थोऽगात्पुनरेव सः ॥ ४ ॥

किं कर्तव्यमितोऽस्माभिर्यूयं मन्त्रविशारदाः ।
मन्त्रयध्वं प्रयत्नेन यत्कृतं मे हितं भवेत् ॥ ५ ॥

रावणस्य वचः श्रुत्वा राक्षसास्तमथाब्रुवन् ।
देव शङ्का कुतो रामात्तव लोकजितो रणे ॥ ६ ॥

इन्द्रस्तु बद्ध्वा निक्षिप्तः पुत्रेण तव पत्तने ।
जित्वा कुबेरमानीय पुष्पकं भुज्यते त्वया ॥ ७ ॥

यमो जितः कालदण्डाद्भयं नाभूत्तव प्रभो ।
वरुणो हुङ्कृतेनैव जितः सर्वेऽपि राक्षसाः ॥ ८ ॥

मयो महासुरो भीत्या कन्यां दत्त्वा स्वयं तव ।
त्वद्वशे वर्ततेऽद्यापि किमुतान्ये महासुराः ॥ ९ ॥

हनूमद्धर्षणं यत्तु तदवज्ञाकृतं च नः ।
वानरोऽयं किमस्माकमस्मिन्पौरुषदर्शने ॥ १० ॥

इत्युपेक्षितमस्माभिर्धर्षणं तेन किं भवेत् ।
वयं प्रमत्ताः किं तेन वञ्चिताः स्मो हनूमता ॥ ११ ॥

जानीमो यदि तं सर्वे कथं जीवन् गमिष्यति ।
आज्ञापय जगत्कृत्स्नमवानरममानुषम् ॥ १२ ॥

कृत्वायास्यामहे सर्वे प्रत्येकं वा नियोजय ।
कुम्भकर्णस्तदा प्राह रावणं राक्षसेश्वरम् ॥ १३ ॥

आरब्धं यत्त्वया कर्म स्वात्मनाशाय केवलम् ।
न दृष्टोऽसि तदा भाग्यात्त्वं रामेण महात्मना ॥ १४ ॥

प्रवेश करणे सुद्धा अवघड आहे अशा लंकेत प्रवेश करून, जी दृष्टीस पडणे कठीण अशा सीतेला भेटून, मंदोदरीचा पुत्र अक्ष व राक्षस वीर यांनाही ठार करून, लंकेला संपूर्णपणे जाळून टाकून, सागर ओलांडून आणि तुम्हा सर्वांना तुच्छ ठरवून, तो हनुमान सुखरूप परत गेला आहे. (३-४)

तुम्ही सर्वजण विचार करण्यात तरबेज आहात. तेव्हा आता यापुढे आपण काय करावयास हवे आणि जे केले असता माझे हित होईल, त्या गोष्टीचा तुम्ही काळजीपूर्वक विचार करा." (५)

रावणाचे वचन ऐकल्यानंतर ते राक्षस मंत्री त्याला म्हणाले, "महाराज, युद्धात सर्व लोकांना जिंकणाऱ्या तुम्हांला रामापासून कसली भीती आहे ? (६)

तुमच्या इंद्रजित नामक पुत्राने इंद्रालासुद्धा बांधून आपल्या राजधानीच्या नगरात टाकले होते आणि तुम्ही स्वत: कुबेराला जिंकून, त्याचे पुष्पक विमान आणून, त्याचा उपभोग घेत आहात. (७)

हे प्रभो, तुम्ही यमाला जिंकले आहे. त्यामुळे कालदंडाची भीतीसुद्धा तुम्हांला नाही. तसेच केवळ हुंकार टाकून तुम्ही वरुणाला तसेच इतर सर्व राक्षसांना जिंकले आहे. मय या महा असुराने तुम्हांला भिऊन स्वत:च तुम्हांला आपली कन्या दिली आणि तो अद्यापिही तुम्हांला वश होऊन राहिला आहे. मग अन्य महान असुरांचे ते काय? हनुमानाने जो काही आपल्याला त्रास दिला तो केवळ आपण त्याची उपेक्षा केल्यामुळे ' हा तर साधा वानर आहे. त्याला आमचा पराक्रम दाखवून काय उपयोग ?' असा विचार करून आम्ही त्याची उपेक्षा केली होती. नाही तर तो आमची अवज्ञा कशी काय करू शकला असता ? आम्ही निष्काळजी राहिलो. तेव्हा आम्हांला हनुमंताने फसविले. त्याला काय महत्त्व द्यायचे ? तो असे काही करील हे आम्हा सर्वांना कळले असते तर तो जिवंतपणी कसा जाऊ शकला असता ? तुम्ही आम्हांला आज्ञा करा. संपूर्ण जग वानररहित आणि मानवरहित करून आम्ही सर्वजण परत येऊ. अथवा आम्हांपैकी कोणाही एकाकडे हे कार्य सोपवा." त्या वेळी राक्षसराज रावणाला कुंभकर्ण म्हणाला, "अरे रावणा, जे कार्य तू सुरू केले आहेस, ते केवळ तुझ्या नाशालाच कारणीभूत होणार आहे. (सीतेला हरण करण्याच्या वेळी) केवळ तुझे नशीब म्हणून महात्म्या रामाची दृष्टी तुझ्यावर पडली नाही. (१०-१४)

यदि पश्यति रामस्त्वां जीवन्नायासि रावण ।
रामो न मानुषो देवः साक्षान्नारायणोऽव्ययः ॥ १५ ॥

सीता भगवती लक्ष्मी रामपत्नी यशस्विनी ।
राक्षसानां विनाशाय त्वयानीता सुमध्यमा ॥ १६ ॥

विषपिण्डमिवागीर्य महामीनो यथा तथा ।
आनीता जानकी पश्चात्त्वया किं वा भविष्यति ॥ १७ ॥

यद्यप्यनुचितं कर्म त्वया कृतमजानता ।
सर्वं समं करिष्यामि स्वस्थचित्तो भव प्रभो ॥ १८ ॥

कुम्भकर्णवचः श्रुत्वा वाक्यमिद्रजिदब्रवीत् ।
देहि देव ममानुज्ञां हत्वा रामं सलक्ष्मणम् ।
सुग्रीवं वानरांश्चैव पुनर्यास्यामि तेऽन्तिकम् ॥ १९ ॥

तत्रागतो भागवतप्रधानो
बिभीषणो बुद्धिमतां वरिष्ठः ।
श्रीरामपादद्वय एकतानः
प्रणम्य देवारिमुपोपविष्टः ॥ २० ॥
विलोक्य कुम्भश्रवणादिदैत्या-
न्मत्तप्रमत्तानतिविस्मयेन ।
विलोक्य कामातुरमप्रमत्तो
दशाननं प्राह विशुद्धबुद्धिः ॥ २१ ॥
न कुम्भकर्णेन्द्रजितौ च राजं-
स्तथा महापार्श्वमहोदरौ तौ ।
निकुम्भकुम्भौ च तथातिकायः
स्थातुं न शक्ता युधि राघवस्य ॥ २२ ॥
सीताभिधानेन महाग्रहेण
ग्रस्तोऽसि राजन् न च ते विमोक्षः ।
तामेव सत्कृत्य महाधनेन
दत्त्वाभिरामाय सुखी भव त्वम् ॥ २३ ॥
शरव्रा रामस्य शिताः शिलीमुखा
लङ्कामभिव्याप्य शिरांसि रक्षसाम् ।
छिन्दन्ति तावद्रघुनायकस्य भो-
स्तां जानकीं त्वं प्रतिदातुमर्हसि ॥ २४ ॥

हे रावणा, जर त्यावेळी रामाने तुला पाहिले असते तर तू जिवंत परत आला नसतास. राम हा सामान्य मनुष्य नाही, तर तो साक्षात् अविनाशी नारायण देव आहे. (१५)

रामाची यशस्विनी पत्नी सीता ही साक्षात भगवती लक्ष्मी आहे. आम्हा राक्षसांचा नाश करण्यासाठीच तू त्या सुंदर स्त्रीला पळवून आणले आहेस. (१६)

ज्या प्रमाणे एखादा मोठा मासा विषाचा गोळा गिळतो आणि मरतो त्या प्रमाणे तू जानकीला पळवून आणले आहेस. तर आणखी काय होणार ? (१७)

जरी तू नकळत अनुचित कर्म केले आहेस तरी मी सर्व काही ठीक करीन. हे राजा, तू स्वस्थ राहा." (१८)

कुंभकर्णाचे वचन ऐकल्यावर इंद्रजित म्हणाला, "महाराज, मला आज्ञा द्या. लक्ष्मणासह राम, सुग्रीव आणि सर्व वानर या सर्वांचा वध करून मी पुन्हा तुमच्याजवळ येईन." (१९)

तितक्यात भगवद्-भक्तांत अग्रगण्य, बुद्धिमंतांमध्ये श्रेष्ठ, असा बिभीषण तेथे आला. श्रीरामांच्या पायांशी त्याच्या मनाची वृत्ती एकतान झाली होती. तो देवशत्रू रावणाला नमस्कार करून बसला. (२०)

उन्मत्त अशा कुंभकर्ण इत्यादी दैत्यांकडे अतिशय आश्चर्याने पाहून आणि कामातुर रावणाकडे दृष्टी टाकून, सावध असणारा व निर्मळ बुद्धी असणारा तो बिभीषण शांतपणे रावणाला म्हणाला. (२१)

"हे राजन, कुंभकर्ण, इंद्रजित, महापार्श्व, महोदर, निकुंभ, कुंभ तसाच अतिकाय यांपैकी कोणीही युद्धामध्ये रामांच्यापुढे उभे राहण्यास समर्थ नाही. (२२)

हे राजा, सीता नावाच्या महाग्रहाने तुला ग्रासले आहे; त्यातून तुझी सुटका होणार नाही. म्हणून त्या सीतेचाच सत्कार करून आणि विपुल धन देऊन, तू तिला रामांना परत देऊन सुखी हो. (२३)

लंकेला व्यापून, सर्व राक्षसांची मस्तके रामांच्या तीक्ष्ण बाणांनी जोपर्यंत तोडली जात नाहीत, तोपर्यंतच अरे रावणा, तू त्या रघुनायकाला ती जानकी परत करावीस, हेच योग्य आहे. (२४)

यावन्नगाभाः कपयो महाबला
हरीन्द्रतुल्या नखदंष्ट्रयोधिनः ।
लङ्कां समाक्रम्य विनाशयन्ति ते
तावद् द्रुतं देहि रघूत्तमाय ताम् ॥ २५ ॥

जीवन्न रामेण विमोक्ष्यसे त्वं
गुप्तः सुरेन्द्रैरपि शङ्करेण ।
न देवराजाङ्कगतो न मृत्योः
पातालालोकानपि सम्प्रविष्टः ॥२६॥

शुभं हितं पवित्रं च बिभीषणवचः खलः ।
प्रतिजग्राह नैवासौ म्रियमाण इवौषधम् ॥ २७ ॥

कालेन नोदितो दैत्यो बिभीषणमथाब्रवीत् ।
महत्तभोगैः पुष्टाङ्गो मत्समीपे वसन्नपि ॥ २८ ॥

प्रतीपमाचरत्येष ममैव हितकारिणः ।
मित्रभावेन शत्रुर्मे जातो नास्त्यत्र संशयः ॥ २९ ॥

अनार्येण कृतघ्नेन सङ्गतिर्मे न युज्यते ।
विनाशमभिकाङ्क्षन्ति ज्ञातीनां ज्ञातयः सदा ॥ ३० ॥

योऽन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेकं निशाचरः ।
हन्मि तस्मिन् क्षणे एव धिक् त्वां रक्षःकुलाधमम् ॥ ३१ ॥

रावणेनैवमुक्तः सन्परुषं स बिभीषणः ।
उत्पपात सभामध्याद्गदापाणिर्महाबलः ॥ ३२ ॥

चतुर्भिर्मन्त्रिभिः सार्धं गगनस्थोऽब्रवीद्वचः ।
क्रोधेन महताविष्टो रावणं दशकन्धरम् ।
मा विनाशमुपैहि त्वं प्रियवादिनमेव माम् ॥ ३३ ॥

धिक्करोषि तथापि त्वं ज्येष्ठो भ्राता पितुः समः ।
कालो राघवरूपेण जातो दशरथालये ॥ ३४ ॥

काली सीताभिधानेन जाता जनकनन्दिनी ।
तावुभावागतावत्र भूमेर्भारापनुत्तये ॥ ३५ ॥

पर्वताग्रमाणे असणाऱ्या, महाबलवान श्रेष्ठ सिंहासारख्या पराक्रमी, नखे व दाढा यांनी युद्ध करणाऱ्या त्या वानरांनी लंकेवर आक्रमण करून जोपर्यंत ती नष्ट करून टाकलेली नाही, तोपर्यंतच तू रघूत्तम श्रीरामांना सीता सत्वर परत देऊन टाक. (२५)

(तू असे केले नाहीस तर) अगदी देवदेवांनीसुद्धा तुझे रक्षण केले किंवा शंकराने रक्षण केले, किंवा तू देवराज इंद्राच्या किंवा यमाच्या मांडीवर जाऊन बसलास, अथवा पाताळामध्ये जरी तू प्रवेश करून बसलास, तरी तू श्रीरामांच्या हातून जिवंत सुटणार नाहीस." (२६)

ज्या प्रमाणे मरायला टेकलेला माणूस औषध घेत नाही, त्या प्रमाणे त्या दुष्ट रावणाने बिभीषणाचे कल्याणकारक, हितकारक आणि पवित्र असे म्हणणे मानले नाही. (२७)

काळाकडून प्रेरणा मिळालेला तो दैत्य रावण नंतर बिभीषणाला म्हणाला, "पाहा, मी दिलेल्या भोगांनी शरीर पुष्ट झालेला हा बिभीषण माझ्याजवळ राहात असून सुद्धा तो माझ्याविरुद्ध आचरण करीत आहे. मित्ररूपाने हा माझा शत्रू झाला आहे, यात संशय नाही. (२८-२९)

या नीच आणि कृतघ्न बिभीषणाशी माझी संगत असणे योग्य नाही. प्रायः असे दिसून येते की नातेवाईकच नातेवाईकांच्या नाशाची इच्छा करीत असतात. (३०)

दुसऱ्या कुणी राक्षसाने जर अशा प्रकारचे एक वाक्य उच्चारले तर मी त्याला त्याच क्षणात ठार करीन. हे राक्षस कुळातील अधमा, तुझा धिक्कार असो." (३१)

अशा प्रकारे रावणाने कठोर वचन उच्चारल्यानंतर तो महाबळी बिभीषण हातात गदा घेऊन, त्या राजसभेमधून एकदम वर उडाला. (३२)

आणि आपल्या चार मंत्र्यांसह आकाशातच स्थिर होऊन आणि अतिशय क्रोधाने तो रावणाला म्हणाला, "अरे रावणा, तू स्वतःच्या नाशाप्रत जाऊ नकोस. तुझ्या कल्याणाची गोष्ट सांगणाऱ्याचा तू धिक्कार करीत आहेस. ठीक आहे. ज्येष्ठ भाऊ हा पित्यासमान असतो. (म्हणून मी काही वाईट बोलत नाही.) तुझा साक्षात काळ राघवांच्या रूपाने दशरथाच्या घरी जन्माला आला आहे. (३३-३४)

आणि महाशक्ती काली ही सीता या नावाने जनकाची कन्या म्हणून जन्माला आली आहे. भूमीचा भार दूर करण्यासाठी ते दोघे येथे आले आहेत. (३५)

तेनैव प्रेरितस्त्वं तु न शृणोषि हितं मम ।
श्रीरामः प्रकृतेः साक्षात्परस्तात्सर्वदा स्थितः ॥ ३६ ॥

बहिरन्तश्च भूतानां समः सर्वत्र संस्थितः ।
नामरूपादिभेदेन तत्तन्मय इवामलः ॥ ३७ ॥

यथा नानाप्रकारेषु वृक्षेष्वेको महानलः ।
तत्तदाकृतिभेदेन भिद्यतेऽज्ञानचक्षुषाम् ॥ ३८ ॥

पञ्चकोशादिभेदेन तत्तन्मय इवाबभौ ।
नीलपीतादियोगेन निर्मलः स्फटिको यथा ॥ ३९ ॥

स एव नित्यमुक्तोऽपि स्वमायागुणबिम्बितः ।
कालः प्रधानं पुरुषोऽव्यक्तं चेति चतुर्विधः ॥ ४० ॥

प्रधानपुरुषाभ्यां स जगत्कृत्स्नं सृजत्यजः ।
कालरूपेण कलनां जगतः कुरुतेऽव्ययः ॥ ४१ ॥

कालरूपी स भगवान् रामरूपेण मायया ॥ ४२ ॥

ब्रह्मणा प्रार्थितो देवस्त्वद्वधार्थमिहागतः ।
तदन्यथा कथं कुर्यात्सत्यसंकल्प ईश्वरः ॥ ४३ ॥

हनिष्यति त्वां रामस्तु सपुत्रबलवाहनम् ।
हन्यमानं न शक्नोमि द्रष्टुं रामेण रावण ॥ ४४ ॥

त्वां राक्षसकुलं कृत्स्नं ततो गच्छामि राघवम् ।
मयि याते सुखी भूत्वा रमस्व भवने चिरम् ॥ ४५ ॥

विभीषणो रावणवाक्यतः क्षणा-
द्विसृज्य सर्वं सपरिच्छदं गृहम् ।
जगाम रामस्य पदारविन्दयोः
सेवाभिकाङ्क्षी परिपूर्णमानसः ॥ ४६ ॥

त्या कालरूपी रामांनीच प्रेरणा दिल्यामुळे तू माझे हितकारक वचन ऐकत नाहीस. श्रीराम हे साक्षात परमात्मा असून ते सर्वदा प्रकृतीच्या पलीकडे असतात. (३६)

ते प्राण्यांच्या आत-बाहेर सर्वत्र समरूपाने स्थित असतात. जरी ते मूलतः निर्मळ आहेत, तरी नाम आणि रूप यांच्या भेदामुळे ते जणू नामरूपात्मक आहेत, असे दिसतात. (३७)

ज्या प्रमाणे अज्ञानी माणसांच्या दृष्टीने नाना प्रकारच्या वृक्षांमध्ये असणारा एकच महान अग्नी हा त्या त्या वृक्षाच्या आकारभेदाने भिन्न आहे असे वाटते, किंवा निर्मळ असणारा स्फटिक मणी हा नील, पीत, इत्यादी प्रकारच्या वस्तूंच्या सान्निध्याने त्या त्या रंगाचा भासतो, त्या प्रमाणे (अन्नमय, प्राणमय, मनोमय, विज्ञानमय आणि आनंदमय अशा) पांच कोशांच्या भेदामुळे आत्मा हा त्या त्या कोशाच्या स्वरूपात आहे असे भासते. (३८-३९)

ते परमात्मा राम जरी नित्य मुक्त आहेत तरी स्वतःच्या मायेच्या गुणांमध्ये प्रतिबिंबित झाल्यावर ते काल, प्रधान, पुरुष, आणि अव्यक्त अशा चार प्रकारचे होतात, असे भासते. (४०)

ते परमात्मा स्वतः जन्मरहित असूनही प्रधान (प्रकृती) आणि पुरुष यांच्या द्वारा तो संपूर्ण जग निर्माण करतात. तसेच ते स्वतः अविनाशी असूनही काळाच्या रूपाने जगाचा संहार करतात. (४१)

ब्रह्मदेवाच्या प्रार्थनेमुळे काळरूपी ते भगवान रामांच्या रूपाने स्वतःच्या मायेसह तुझ्या वधासाठी येथे आले आहेत. ईश्वर हा सत्यसंकल्प असतो. तेव्हा ते आपली प्रतिज्ञा कशी बरे मोडतील ? (४२-४३)

म्हणून श्रीराम हे तुला तुझे पुत्र, सैन्य आणि वाहने यांच्या सकट ठार करतील. हे रावणा, रामांकडून सर्व राक्षस कुळासह तुला ठार केलेले मी पाहू शकणार नाही. म्हणून मी आत्ताच राघवांकडे जात आहे. मी गेल्यावर तू सुखी होऊन पुष्कळ काळ भोगांत रममाण होऊन आपल्या महालात राहा." (४४-४५)

अशा प्रकारे रावणाच्या बोलण्यामुळे आपल्या घरादाराचा त्याग करून, बिभीषण एका क्षणातच रामांच्या चरणकमळांची सेवा करण्याच्या इच्छेने प्रसन्न मनाने रामांकडे जाण्यास निघाला. (४६)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीय सर्ग

बिभीषणाची शरणागती, समुद्राचा त्रास आणि सेतू बांधण्याचा प्रारंभ

श्रीमहादेव उवाच

बिभीषणो महाभागश्चतुर्भिर्मन्त्रिभिः सह ।
आगत्य गगने रामसम्मुखे समवस्थितः ॥ १ ॥

उच्चैरुवाच भोः स्वामिन् राम राजीवलोचन ।
रावणस्यानुजोऽहं ते दारहर्तुर्बिभीषणः ॥ २ ॥

नाम्ना भ्रात्रा निरस्तोऽहं त्वामेव शरणं गतः ।
हितमुक्तं मया देव तस्य चाविदितात्मनः ॥ ३ ॥

सीतां रामाय वैदेहीं प्रेषयेति पुनः पुनः ।
उक्तोऽपि न शृणोत्येव कालपाशवशं गतः ॥ ४ ॥

हन्तुं मां खड्गमादाय प्राद्रवद्राक्षसाधमः ।
ततोऽचिरेण सचिवैश्चतुर्भिः सहितो भयात् ॥ ५ ॥

त्वामेव भवमोक्षाय मुमुक्षुः शरणं गतः ।
बिभीषणवचः श्रुत्वा सुग्रीवो वाक्यमब्रवीत् ॥ ६ ॥

विश्वासार्हो न ते राम मायावी राक्षसाधमः ।
सीताहर्तुर्विशेषेण रावणस्यानुजो बली ॥ ७ ॥

मन्त्रिभिः सायुधैरस्मान् विवरे निहनिष्यति ।
तदाज्ञापय मे देव वानरैर्हन्यतामयम् ॥ ८ ॥

ममैवं भाति ते राम बुद्ध्या किं निश्चितं वद ।
श्रुत्वा सुग्रीववचनं रामः सस्मितमब्रवीत् ॥ ९ ॥

यदीच्छामि कपिश्रेष्ठ लोकान्सर्वान्सहेश्वरान् ।
निमिषार्धेन संहन्यां सृजामि निमिषार्धतः ॥ १० ॥

अतो मयाभयं दत्तं शीघ्रमानय राक्षसम् ॥ ११ ॥

श्रीमहादेव म्हणाले– हे पार्वती, त्यानंतर महाभाग्यवंत बिभीषण हा चार मंत्र्यांसह श्रीरामांजवळ येऊन आकाशातच त्यांच्यासमोर उपस्थित झाला. (१)

आणि तो मोठ्यांदा म्हणाला, "हे कमलनयन, स्वामी, रामा, तुमच्या पत्नीचे हरण करणाऱ्या रावणाचा धाकटा भाऊ मी बिभीषण आहे. भावाने मला हाकलून दिले आहे. म्हणून मी तुम्हांलाच शरण आलो आहे. हे देवा, स्वत:ला न ओळखणाऱ्या रावणाला मी त्याच्या हिताची गोष्ट सांगितली . (२-३)

'वैदेही सीतेला रामांकडे पाठव.' असे मी त्याला पुनः पुनः सांगितले. तरी काळाच्या पाशात सापडलेला तो माझे काही ऐकतच नाही. (४)

मला ठार करण्यासाठी तो अधम राक्षस खड्ग घेऊन धावून आला. तेव्हा भिऊन मी लगेच चार मंत्र्यांसह, त्याच्या आणि संसाराच्या पाशातून सुटण्याच्या इच्छेने तुम्हांलाच शरण आलो आहे." बिभीषणाचे हे वचन ऐकल्यावर सुग्रीव असे बोलला. (५-६)

"हे श्रीराम, हा मायावी अधम राक्षस विश्वास ठेवण्यास पात्र नाही. कारण सीतेचे हरण करणाऱ्या रावणाचा हा धाकटा भाऊ असून बलवानही दिसत आहे. (७)

सशस्त्र अशा मंत्र्यांसह आलेला हा बिभीषण आपणास केव्हाही एकांत स्थानी ठार करील. तेव्हा हे देवा मला आज्ञा करा. वानरांकडून याला मी ठार मारतो. (८)

हे रामा, मला तर असे वाटते की, आता तुमच्या मनात काय आहे ते तुम्ही मला अवश्य सांगा." सुग्रीवाचे वचन ऐकल्यावर श्रीराम स्मित करून म्हणाले. (९)

"हे कपिश्रेष्ठा, मला वाटले तर मी अर्ध्या निमिषात लोकपालांसह सर्व लोकांचा संहार करून टाकीन आणि अर्ध्या क्षणात मी सर्वांना पुनः उत्पन्न करू शकेन. (१०)

म्हणून तू चिंता करू नकोस. मी या बिभीषणाला आता अभय दिले आहे. तू शीघ्र या राक्षसाला घेऊन ये. (११)

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ १२ ॥

'मी तुझाच आहे', असे एकदाच म्हणून व मला शरण येऊन जो अभय मागतो, त्या सर्व प्राण्यांना मी अभय देतो, असे माझे व्रत आहे.'' (१२)

रामस्य वचनं श्रुत्वा सुग्रीवो हृष्टमानसः ।
बिभीषणमथानाय्य दर्शयामास राघवम् ॥ १३ ॥

श्रीरामांचे वचन ऐकल्यावर, आनंदित झालेल्या सुग्रीवाने बिभीषणाला आणले आणि त्याची रामांशी भेट घडविली. (१३)

बिभीषणस्तु साष्टाङ्गं प्रणिपत्य रघूत्तमम् ।
हर्षगद्गदया वाचा भक्त्या च परयान्वितः ॥ १४ ॥

बिभीषणाने रघूत्तमांना साष्टांग नमस्कार केला. तो परम भक्तीने भरून गेला होता. नंतर श्यामवर्ण, विशाल डोळे असणाऱ्या, प्रसन्न मुखकमल असणाऱ्या, धनुष्य व बाण धारण करणाऱ्या, लक्ष्मणासहित असणाऱ्या व शांत अशा रामांपुढे हात जोडून उभे राहून, हर्षाने गद्गद झालेल्या वाणीने बिभीषणाने त्यांची स्तुती करण्यास प्रारंभ केला. (१४-१६)

रामं श्यामं विशालाक्षं प्रसन्नमुखपंकजम् ।
धनुर्बाणधरं शान्तं लक्ष्मणेन समन्वितम् ॥ १५ ॥

कृताञ्जलिपुटो भूत्वा स्तोतुं समुपचक्रमे ॥ १६ ॥

बिभीषण उवाच

नमस्ते राम राजेन्द्र नमः सीतामनोरम ।
नमस्ते चण्डकोदण्ड नमस्ते भक्तवत्सल ॥ १७ ॥

बिभीषण म्हणाला – "हे राजेंद्रा, सीतेचे मन रमविणाऱ्या, प्रचंड धनुष्य धारण करणाऱ्या, हे भक्तवत्सल रामा, तुम्हांला नमस्कार असो. (१७)

नमोऽनन्ताय शान्ताय रामायामिततेजसे ।
सुग्रीवमित्राय च ते रघूणां पतये नमः ॥ १८ ॥

अनंत, शांत, अमर्याद तेज असणाऱ्या श्रीरामांना नमस्कार असो. सुग्रीवाचा मित्र आणि रघुकुळाचा स्वामी अशा हे रामा, तुम्हांला नमस्कार असो. (१८)

जगदुत्पत्तिनाशानां कारणाय महात्मने ।
त्रैलोक्यगुरवेऽनादिगृहस्थाय नमो नमः ॥ १९ ॥

जगाची उत्पत्ती व नाश यांचे कारण असणाऱ्या, त्रैलोक्याचा गुरू असणाऱ्या, अनादी काळापासून गृहस्थाश्रमी असणाऱ्या,* अशा महात्म्या रामांना पुनः पुनः नमस्कार असो. (१९)

त्वमादिर्जगतां राम त्वमेव स्थितिकारणम् ।
त्वमेव निधनस्थानं स्वेच्छाचारस्त्वमेव हि ॥ २० ॥

हे श्रीरामा, तुम्ही सर्व जगांचे आदिकारण आहात. तुम्हीच त्यांच्या स्थितीचे कारण आहात. तुम्हीच शेवटी त्यांच्या नाशाचे स्थान आहात. तसेच तुम्हीच स्वतःच्या इच्छेप्रमाणे आचार करणारे आहात. (२०)

चराचराणां भूतानां बहिरन्तश्च राघव ।
व्याप्यव्यापकरूपेण भवान् भाति जगन्मयः ॥ २१ ॥

हे राघवा, स्थावर व जंगम सर्व प्राण्यांच्या आत व बाहेर, व्याप्य आणि व्यापक या रूपाने तुम्हीच असून, तुम्हीच जगन्मय आहात, असे वाटते. (२१)

त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः ।
गतागतं प्रपद्यन्ते पापपुण्यवशात्सदा ॥ २२ ॥

तुमच्या मायेमुळे ज्यांचे ज्ञान हरण केले गेले आहे आणि ज्यांची बुद्धी नष्ट झाली आहे व ज्यांचे मन विपरीत प्रवृत्ति-मार्गाकडे लागले आहे, असे लोक आपल्या पाप-पुण्यांना वश होऊन सतत या संसारात येरझाऱ्या करीत असतात. (२२)

तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ।
यावन्न ज्ञायते ज्ञानं चेतसानन्यगामिना ॥ २३ ॥

जोपर्यंत अनन्यगामी चित्ताने तुम्हा परमात्म्याला जाणले जात नाही, तोपर्यंत शिंपेवर भासणाऱ्या रुप्याप्रमाणे हे जग सत्य भासते. (२३)

* प्रकृतिरूपी पत्नीशी भगवंताचा अनादी संबंध आहे. म्हणून तो अनादी असा गृहस्थाश्रमी आहे.

त्वदज्ञानात्सदा युक्ताः पुत्रदारगृहादिषु ।
रमन्ते विषयान्सर्वानन्ते दुःखप्रदान्विभो ॥ २४ ॥

त्वमिन्द्रोऽग्निर्यमो रक्षो वरुणश्च तथानिलः ।
कुबेरश्च तथा रुद्रस्त्वमेव पुरुषोत्तम ॥२५॥

त्वमणोरप्यणीयांश्च स्थूलात् स्थूलतरः प्रभो ।
त्वं पिता सर्वलोकानां माता धाता त्वमेव हि ॥ २६ ॥

आदिमध्यान्तरहितः परिपूर्णोऽच्युतोऽव्ययः ।
त्वं पाणिपादरहितश्चक्षुःश्रोत्रविवर्जितः ॥ २७ ॥

श्रोता द्रष्टा ग्रहीता च जवनस्त्वं खरान्तक ।
कोशेभ्यो व्यतिरिक्तस्त्वं निर्गुणो निरुपाश्रयः ॥ २८ ॥

निर्विकल्पो निर्विकारो निराकारो निरीश्वरः ।
षड्भावरहितोऽनादिः पुरुषः प्रकृतेः परः ॥ २९ ॥

मायया गृह्यमाणस्त्वं मनुष्य इव भाव्यसे ।
ज्ञात्वा त्वां निर्गुणमजं वैष्णवा मोक्षगामिनः ॥ ३० ॥

अहं त्वत्पादसद्भक्तिनिःश्रेणीं प्राप्य राघव ।
इच्छामि ज्ञानयोगाख्यं सौधमारोढुमीश्वर ॥ ३१ ॥

नमः सीतापते राम नमः कारुणिकोत्तम ।
रावणारे नमस्तुभ्यं त्राहि मां भवसागरात् ॥ ३२ ॥

ततः प्रसन्नः प्रोवाच श्रीरामो भक्तवत्सलः ।
वरं वृणीष्व भद्रं ते वाञ्छितं वरदोऽस्म्यहम् ॥ ३३ ॥

विभीषण उवाच

धन्योऽस्मि कृतकृत्योऽस्मि कृतकार्योऽस्मि राघव ।
त्वत्पाददर्शनादेव विमुक्तोऽस्मि न संशयः ॥ ३४ ॥

हे विभू, तुमचे ज्ञान न झाल्यामुळे प्राणी पुत्र, पत्नी, गृह इत्यादींच्या ठिकाणी आसक्त होऊन, शेवटी दुःख देणाऱ्या सर्व विषयांत सतत रमून जातात. (२४)

हे पुरुषोत्तमा, तुम्हीच इंद्र, अग्नी, यम, निर्ऋती, वरुण तसेच वायू आहात. तसेच तुम्हीच कुबेर आणि रुद्र आहात. (२५)

हे प्रभो, तुम्हीच अणूपेक्षा अणू व स्थूलापेक्षा अधिक स्थूल आहात. तुम्हीच सर्व लोकांचे पिता व माता आहात. तुम्हीच सर्व लोकांचे पोषण करणारे आहात. (२६)

तुम्ही आदी, मध्य व अंत यांनी रहित आहात. तुम्ही परिपूर्ण, अच्युत आणि अव्यय आहात. तुम्ही हात-पाय रहित आहात. तसेच तुम्ही डोळे व कान यांनी रहित आहात. (२७)

खर राक्षसाचा नाश करणाऱ्या हे रामा, तुम्ही श्रोता, द्रष्टा व ग्रहण करणारे असून, तुम्ही वेगवान आहात. तुम्ही अन्नमय, प्राणमय, मनोमय, विज्ञानमय व आनंदमय अशा पाच कोशांपेक्षा वेगळे असून, तुम्ही निर्गुण आणि आश्रयरहित आहात. (२८)

तुम्ही निर्विकल्प, निर्विकार, निराकार असून तुम्ही निरीश्वर (=प्रेरक ईश्वर नसणारे) आहात. (उत्पत्ती, वृद्धी, परिणाम, भय, जीर्णता आणि नाश या) सहा विकारांनी रहित, अनादी आणि प्रकृतीच्या पलीकडील पुरुष तुम्ही आहात. (२९)

मायेच्या योगाने धारण केलेल्या रूपात तुम्ही मनुष्य असल्यासारखे दिसता. पण तुम्ही निर्गुण, अज आहात, असे जाणून विष्णूचे भक्त मोक्षाप्रत जातात. (३०)

हे राघवा, तुमच्या चरणांची उत्तम भक्तिरूप शिडी प्राप्त करून घेऊन, हे ईश्वरा, ज्ञानयोग नाव असणाऱ्या प्रासादावर चढून जाण्याची माझी इच्छा आहे. (३१)

हे सीतापते, हे श्रेष्ठ करुणावंता, हे रावणाच्या शत्रो, तुम्हांला नमस्कार असो. तुम्ही संसारसागरातून माझे रक्षण करा." (३२)

(बिभीषणाने केलेली स्तुती ऐकल्यानंतर) भक्तवत्सल श्रीराम प्रसन्न होऊन म्हणाले, "हे बिभीषणा, तुझे कल्याण होवो. तू कोणताही वर माग. तुझ्या इच्छेप्रमाणे मी तुला वर देईन." (३३)

बिभीषण म्हणाला– "हे राघवा, तुमच्या पायांच्या दर्शनानेच मी धन्य झालो आहे. कृतकार्य झालो आहे, कृतकृत्य झालो आहे आणि मी मुक्त झालो आहे, यात संशय नाही. (३४)

नास्ति मत्सदृशो धन्यो नास्ति मत्सदृशः शुचिः ।
नास्ति मत्सदृशो लोके राम त्वन्मूर्तिदर्शनात् ॥ ३५ ॥

हे रामा, तुमचे दर्शन झाल्यामुळे, माझासारखा धन्य, शुद्ध आणि भाग्यवान या जगात अन्य कुणीही नाही. (३५)

कर्मबन्धविनाशाय त्वज्ज्ञानं भक्तिलक्षणम् ।
त्वद्ध्यानं परमार्थं च देहि मे रघुनन्दन ॥ ३६ ॥

हे रघुनन्दना, माझ्या कर्मबंधनाचा नाश होण्यासाठी, भक्तिस्वरूप असे तुमचे ज्ञान आणि तुमच्या परमार्थ स्वरूपाचा साक्षात्कार घडविणारे तुमचे ध्यान तुम्ही मला द्या. (३६)

न याचे राम राजेन्द्र सुखं विषयसम्भवम् ।
त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे ॥ ३७ ॥

हे राजेंद्रा रामा, विषयांपासून निर्माण होणारे सुख मी तुमच्याकडे मागत नाही. तुमच्या चरणकमळांच्या ठिकाणी माझी भक्ती जडून राहो, अशी माझी मागणी आहे." (३७)

ओमित्युक्त्वा पुनः प्रीतो रामः प्रोवाच राक्षसम् ।
शृणु वक्ष्यामि ते भद्रं रहस्यं मम निश्चितम् ॥ ३८ ॥

"ठीक आहे" असे म्हणून संतुष्ट झालेले श्रीराम पुनः बिभीषणाला म्हणाले, "तुझे कल्याण होवो. आता मी तुला माझे रहस्य स्पष्टपणे सांगतो, ते ऐक. (३८)

मद्भक्तानां प्रशान्तानां योगिनां वीतरागिणाम् ।
हृदये सीतया नित्यं वसाम्यत्र न संशयः ॥ ३९ ॥

अतिशय शांत, भक्तियोगी आणि आसक्ती रहित असणाऱ्या अशा माझ्या भक्तांच्या हृदयांत मी सीतेसह सदा राहातो, या बाबतीत संशय नाही. (३९)

तस्मात्त्वं सर्वदा शान्तः सर्वकल्मषवर्जितः ।
मां ध्यात्वा मोक्ष्यसे नित्यं घोरसंसारसागरात् ॥ ४० ॥

तेव्हा सर्व काळी शांत आणि सर्व पापांनी रहित होऊन तू माझे नित्य ध्यान केलेस तर तू या भयंकर संसार-सागरातून मुक्त होशील. (४०)

स्तोत्रमेतत्पठेद्यस्तु लिखेद्यः शृणुयादपि ।
मत्प्रीतये ममाभीष्टं सारूप्यं समवाप्नुयात् ॥ ४१ ॥

शिवाय मला प्रसन्न करण्यासाठी जो कोणी तू केलेले हे स्तोत्र वाचेल, लिहील अगर ऐकेल, तो मला प्रिय असणारे सारूप्य प्राप्त करून घेईल." (४१)

इत्युक्त्वा लक्ष्मणं प्राह श्रीरामो भक्तभक्तिमान् ।
पश्यत्विदानीमेवैष मम सन्दर्शने फलम् ॥ ४२ ॥

असे सांगून आपल्या भक्तांवर प्रेम करणारे श्रीराम लक्ष्मणाला म्हणाले, "माझ्या दर्शनाने मिळणारे फळ हा बिभीषण आत्ताच पाहू दे. (४२)

लङ्काराज्येऽभिषेक्ष्यामि जलमानय सागरात् ।
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ ४३ ॥

यावन्मम कथा लोके तावद्राज्यं करोत्वसौ ।
इत्युक्त्वा लक्ष्मणेनाम्बु ह्यानाय्य कलशेन तम् ॥ ४४ ॥

आत्ताच मी याला लंकेच्या राज्यावर अभिषेक करतो. लक्ष्मणा, तू समुद्रातून पाणी घेऊन ये. जोपर्यंत चंद्र, सूर्य आणि पृथ्वी हे राहतील तसेच जोपर्यंत माझी कथा या जगात टिकून राहील, तोपर्यंत हा बिभीषण लंकेचे राज्य करो." असे म्हणून लक्ष्मणाकडून कलशातून पाणी आणवून घेऊन, त्या लक्ष्मीपती रामांनी बिभीषणाच्या मंत्र्यांकडून आणि विशेषतः लक्ष्मणाकडून, बिभीषणाला लंकेवरील राज्याच्या आधिपत्यासाठी अभिषेक करविला. (४३-४५)

लङ्काराज्याधिपत्यार्थमभिषेकं रमापतिः ।
कारयामास सचिवैर्लक्ष्मणेन विशेषतः ॥ ४५ ॥

साधु साध्विति ते सर्वे वानरास्तुष्टुवुर्भृशम् ।
सुग्रीवोऽपि परिष्वज्य बिभीषणमथाब्रवीत् ॥ ४६ ॥

"छान ! छान! " असे म्हणून त्या सर्व वानरांनी आनंदाने प्रशंसा केली. नंतर सुग्रीवानेसुद्धा बिभीषणाला आलिंगन देऊन म्हटले. (४६)

बिभीषण वयं सर्वे रामस्य परमात्मनः ।
किङ्करास्तत्र मुख्यस्त्वं भक्त्या रामपरिग्रहात् ।
रावणस्य विनाशे त्वं साहाय्यं कर्तुमर्हसि ॥ ४७ ॥

बिभीषण उवाच

अहं कियान्सहायत्वे रामस्य परमात्मनः ।
किं तु दास्यं करिष्येऽहं भक्त्या शक्त्या ह्यमायया ॥ ४८ ॥

दशग्रीवेण सन्दिष्टः शुको नाम महासुरः ।
संस्थितो ह्याम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ॥ ४९ ॥

त्वामाह रावणो राजा भ्रातरं राक्षसाधिपः ।
महाकुलप्रसूतस्त्वं राजासि वनचारिणाम् ॥ ५० ॥

मम भ्रातृसमानस्त्वं तव नास्त्यर्थविप्लवः ।
अहं यदहरं भार्यां राजपुत्रस्य किं तव ॥ ५१ ॥

किष्किन्धां याहि हरिभिर्लङ्का शक्या न दैवतैः ।
प्राप्तुं किं मानवैरल्पसत्त्वैर्वानरयूथपैः ॥ ५२ ॥

तं प्रापयन्तं वचनं तूर्णमुत्प्लुत्य वानराः ।
प्रापद्यन्त तदा क्षिप्रं निहन्तुं दृढमुष्टिभिः ॥ ५३ ॥

वानरैर्हन्यमानस्तु शुको राममथाब्रवीत् ।
न दूतान् घ्नन्ति राजेन्द्र वानरान्वारय प्रभो ॥ ५४ ॥

रामः श्रुत्वा तदा वाक्यं शुकस्य परिदेवितम् ।
मा वधिष्टेति रामस्तान्वारयामास वानरान् ॥ ५५ ॥

पुनरम्बरमासाद्य शुकः सुग्रीवमब्रवीत् ।
ब्रूहि राजन्दशग्रीवं किं वक्ष्यामि व्रजाम्यहम् ॥ ५६ ॥

सुग्रीव उवाच

यथा वाली मम भ्राता तथा त्वं राक्षसाधम ।
हन्तव्यस्त्वं मया यत्नात्सपुत्रबलवाहनः ॥ ५७ ॥

"अरे बिभीषणा, आम्ही सर्व जण परमात्म्या रामांचे सेवक आहोत. तू आता भक्तीने रामांचा आश्रय घेतल्यामुळे , आम्हा सर्वांमध्ये तू आता मुख्य झाला आहेस. तेव्हा रावणाचा नाश करण्यासाठी तू साहाय्य करावेस." (४७)

बिभीषण म्हणाला– "परमात्म्या रामांना मी काय साहाय्य करणार ? तथापि भक्तीने, माझ्या शक्तीप्रमाणे आणि निष्कपटपणाने मी रामांची सेवा मात्र करीन." (४८)

इतक्यात रावणाने निरोप देऊन पाठविलेला शुक नावाचा महान असुर तेथे येऊन आकाशातून, सुग्रीवाला म्हणाला. (४९)

"राक्षसांचा अधिपती राजा रावण हा भावाप्रमाणे असणाऱ्या तुला सांगत आहे की, 'तू महान कुळात जन्मलेला आहेस आणि वनचर वानरांचा तू राजा आहेस. (५०)

तू मला भावाप्रमाणे आहेस. तुझ्या कोणत्याही गोष्टीचा नाश माझ्याकडून आत्तापर्यंत झालेला नाही. जर आता मी एखाद्या राजपुत्राच्या पत्नीचे हरण केले असेल, तर त्याच्याशी तुझा काय संबंध आहे ? (५१)

तेव्हा तू आपल्या वानरांसह किष्किंधेला परत जा. देवतांनासुद्धा लंका जिंकता येणे शक्य झाले नाही मग अल्प सामर्थ्य असणारे मानव आणि वानरसमूहांचे नायक यांची गोष्ट ती काय ? " (५२)

शुक संदेश सांगत होता, तोच वानर उड्या मारत त्याच्यावर जोराने मुष्टीचे प्रहार करण्यासाठी, चट्दिशी त्याच्याजवळ पोचले. (५३)

तेव्हा वानरांच्या बुक्क्या खात शुक रामांना म्हणाला, "हे राजेंद्रा, शहाणे लोक दूतांना ठार करीत नाहीत. हे प्रभो, तू या वानरांचे निवारण कर." (५४)

त्या वेळी शुकाचे दुःखपूर्ण शब्द ऐकल्यावर, "त्याला ठार करू नका." असे म्हणून रामांनी वानरांचे निवारण केले. (५५)

तेव्हा पुनः आकाशात जाऊन शुक सुग्रीवाला म्हणाला, "हे राजा, रावणाला तुझा काय संदेश देऊ, ते मला सांग. मी आता जात आहे." (५६)

सुग्रीव म्हणाला– "तू रावणाला असे सांग की जसा वाली हा माझा भाऊ, तसा हे अधम राक्षसा, तू माझा भाऊ आहेस. तथापि वालीप्रमाणेच पुत्र, सैन्य आणि वाहने यांच्यासह तू माझ्याकडून ठार मारला जाण्यास योग्य आहेस. (५७)

ब्रूहि मे रामचन्द्रस्य भार्यां हत्वा क्व यास्यसि ।
ततो रामाज्ञया धृत्वा शुकं बद्ध्वान्वरक्षयत् ॥ ५८ ॥

शार्दूलोऽपि ततः पूर्वं दृष्ट्वा कपिबलं महत् ।
यथावत्कथयामास रावणाय स राक्षसः ॥ ५९ ॥

दीर्घचिन्तापरो भूत्वा निःश्वसन्नास मन्दिरे ।
ततः समुद्रमावेक्ष्य रामो रक्तान्तलोचनः ॥ ६० ॥

पश्य लक्ष्मण दुष्टोऽसौ वारिधिर्मामुपागतम् ।
नाभिनन्दति दुष्टात्मा दर्शनार्थं ममानघ ॥ ६१ ॥

जानाति मानुषोऽयं मे किं करिष्यति वानरैः ।
अद्य पश्य महाबाहो शोषयिष्यामि वारिधिम् ॥ ६२ ॥

पादेनैव गमिष्यन्ति वानरा विगतज्वराः ।
इत्युक्त्वा क्रोधताम्राक्ष आरोपितधनुर्धरः ॥ ६३ ॥

तूणीराद्बाणमादाय कालाग्निसदृशप्रभम् ।
सन्धाय चापमाकृष्य रामो वाक्यमथाब्रवीत् ॥ ६४ ॥

पश्यन्तु सर्वभूतानि रामस्य शरविक्रमम् ।
इदानीं भस्मसात्कुर्यां समुद्रं सरितां पतिम् ॥ ६५ ॥

एवं ब्रुवति रामे तु सशैलवनकानना ।
चचाल वसुधा द्यौश्च दिशश्च तमसावृताः ॥ ६६ ॥

चुक्षुभे सागरो वेलां भयाद्योजनमत्यगात् ।
तिमिनक्रझषा मीनाः प्रतप्ताः परितस्रसुः ॥ ६७ ॥

एतस्मिन्नन्तरे साक्षात्सागरो दिव्यरूपधृक् ।
दिव्याभरणसम्पन्नः स्वभासा भासयन् दिशः ॥ ६८ ॥

स्वान्तःस्थदिव्यरत्नानि कराभ्यां परिगृह्य सः ।
पादयोः पुरतः क्षिप्त्वा रामस्योपायनं बहु ॥ ६९ ॥

दण्डवत्प्रणिपत्याह रामं रक्तान्तलोचनम् ।
त्राहि त्राहि जगन्नाथ राम त्रैलोक्यरक्षक ॥ ७० ॥

रामचंद्रांच्या पत्नीचे हरण करून तू आता कुठे जाशील, ते मला सांग." असे बोलल्यानंतर रामांच्या आज्ञेने शुकाला धरून आणि बांधून टाकून, त्याला वानरांच्या संरक्षणाखाली ठेवले. (५८)

शुक राक्षस येण्यापूर्वीच शार्दूल नावाच्या राक्षसाने सुद्धा वानरांचे प्रचंड सैन्य पाहिले होते आणि त्या राक्षसाने परत लंकेत जाऊन ते रावणाला सांगितले होते. (५९)

ते ऐकल्यावर अतिशय चिंतेत पडलेलेला रावण मोठ्मोठे निःश्वास टाकीत आपल्या महालात बसला होता. त्याच वेळी इकडे समुद्राकडे पाहिल्यावर रामांचे डोळे रागाने लाल झाले . (६०)

(श्रीराम क्रोधाने लक्ष्मणाला म्हणाले,) "लक्ष्मणा, पाहा, पाहा, हा समुद्र किती दुष्ट आहे. मी याच्या तीरावर आलो आहे. परंतु लक्ष्मणा, हा दुष्ट मनाचा समुद्र माझ्या दर्शनासाठी आला नाही आणि त्याने माझे अभिनंदनही केलेले नाही. (६१)

'हा राम एक मानव आहे. तेव्हा वानरांच्या साहाय्याने हा आपले काय वाईट करणार ?' असे त्याला वाटत आहे. हे महाबाहो लक्ष्मणा, बघ, आज मी या समुद्राला कोरडा करून टाकतो. (६२)

म्हणजे वानर सहजपणे विनायास पायी पायीच समुद्र पार करून जातील." असे बोलून रामांनी क्रोधाने डोळे लाल केले आणि धनुष्यावर दोरी चढविली. कालाग्नीप्रमाणे तेज असणारा एक बाण भात्यातून काढून घेऊन तो त्यांनी धनुष्याला जोडला आणि नंतर धनुष्याची प्रत्यंचा खेचून ते म्हणाले. "रामाच्या बाणाचा पराक्रम सर्व प्राणी बघू देत. नद्यांचा पती असणाऱ्या समुद्राला मी आता भस्मसात करून टाकतो." रामांनी असे म्हणताच पर्वत, वने आणि अरण्ये यांच्यासह पृथ्वी हलू लागली आणि आकाश व दिशा हे अंधाराने भरून गेले. सागर खवळला आणि भीतीने आपला किनारा ओलांडून तो एक योजन पुढे आला. मोठे मत्स्य, मगरी, सुसरी, मासे हे संत्रस्त होऊन भयभीत झाले. तितक्यात दिव्य अलंकारांनी संपन्न, दिव्य रूप धारण केलेला, स्वतःच्या तेजाने दिशांना प्रकाशित करणारा असा साक्षात सागर रामांकडे आला आणि आपल्या ठिकाणी असणारी दिव्य रत्ने दोन्ही हातात घेऊन, नाना प्रकारचा नजराणा म्हणून त्याने ती रामांच्या पायांपुढे ठेवली. ज्याचे डोळे रागाने लाल झालेले होते अशा रामांना दंडवत प्रणाम करून तो म्हणाला, "हे जगन्नाथा, हे त्रैलोक्यरक्षका, हे रामा, माझे रक्षण करा. (६८-७०)

जडोऽहं राम ते सृष्टः सृजता निखिलं जगत् ।
स्वभावमन्यथा कर्तुं कः शक्तो देवनिर्मितम् ॥ ७१ ॥

स्थूलानि पञ्चभूतानि जडान्येव स्वभावतः ।
सृष्टानि भवतैतानि त्वदाज्ञां लङ्घयन्ति न ॥ ७२ ॥

तामसादहमो राम भूतानि प्रभवन्ति हि ।
कारणानुगमात्तेषां जडत्वं तामसं स्वतः ॥ ७३ ॥

निर्गुणस्त्वं निराकारो यदा मायागुणान्प्रभो ।
लीलयाङ्गीकरोषि त्वं तदा वैराजनामवान् ॥ ७४ ॥

गुणात्मनो विराजश्च सत्त्वादेवा बभूविरे ।
रजोगुणात्प्रजेशाद्या मन्योर्भूतपतिस्तव ॥ ७५ ॥

त्वामहं मायया छन्नं लीलया मानुषाकृतिम् ॥ ७६ ॥

जडबुद्धिर्जडो मूर्खः कथं जानामि निर्गुणम् ।
दण्ड एव हि मूर्खाणां सन्मार्गप्रापकः प्रभो ॥ ७७ ॥

भूतानाममरश्रेष्ठ पशूनां लगुडो यथा ।
शरणं ते व्रजामीश शरण्यं भक्तवत्सल ।
अभयं देहि मे राम लङ्कामार्गं ददामि ते ॥ ७८ ॥

श्रीराम उवाच

अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यताम् ।
लक्ष्यं दर्शय मे शीघ्रं बाणस्यामोघपातिनः ॥ ७९ ॥

रामस्य वचनं श्रुत्वा करे दृष्ट्वा महाशरम् ।
महोदधिर्महातेजा राघवं वाक्यमब्रवीत् ॥ ८० ॥

रामोत्तरप्रदेशे तु द्रुमकुल्य इति श्रुतः ।
प्रदेशस्तत्र बहवः पापात्मानो दिवानिशम् ॥ ८१ ॥

बाधन्ते मां रघुश्रेष्ठ तत्र ते पात्यतां शरः ।
रामेण सृष्टो बाणस्तु क्षणादाभीरमण्डलम् ॥ ८२ ॥

हत्वा पुनः समागत्य तूणीरे पूर्ववत्स्थितः ।
ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः ॥ ८३ ॥

हे रामा, संपूर्ण जग निर्माण करताना, तुम्ही मला (जल) जड स्वरूपात निर्माण केले आहे आणि देवाने निर्माण केलेला स्वभाव बदलून टाकण्यास कोण बरे समर्थ आहे? (७१)

पाच स्थूल भूते ही स्वभावतःच जड आहेत. ती तुम्हीच उत्पन्न केली आहेत. तुमच्या आज्ञेचे उल्लंघन ती करीत नाहीत. (७२)

हे रामा, तामस अहंकारापासूनच ही जड भूते निर्माण होत असतात. कारणाला अनुसरून, त्या भूतांच्या ठिकाणी तमोरूप जडत्व स्वतःसिद्ध असते. (७३)

हे प्रभो, निर्गुण आणि निराकार असणारे तुम्ही जेव्हा लीलेने मायेच्या गुणांचा अंगीकार करता, तेव्हा तुमचे नाव वैराज असते. (७४)

त्या गुणयुक्त विराटातील सत्त्वगुणापासून देव उत्पन्न झाले, रजोगुणापासून प्रजापती इत्यादी उद्‌भूत झाले आणि तुमच्या तमोगुणात्मक क्रोधापासून भूतपती रुद्र निर्माण झाला आहे. (७५)

मायेने झाकला जाऊन लीलेने मनुष्यरूप धारण करणाऱ्या तुमच्या निर्गुण स्वरूपाला जड बुद्धी, अचेतन आणि मूर्ख असणारा मी कसा बरे जाणू शकेन ? हे प्रभो, ज्या प्रमाणे पशूंना योग्य मार्गावर आणण्यासाठी लाठी उपयोगी पडते, त्या प्रमाणे हे देवश्रेष्ठा, माझ्यासारख्या मूर्ख प्राण्यांना सन्मार्गावर नेणारा दंडच आहे. हे भक्तवत्सला, ईश्वरा, शरणगतांचे रक्षण करणाऱ्या तुम्हांला मी शरण आलो आहे. हे रामा, तुम्ही मला अभय द्या. मी तुम्हांला लंकेत जाण्यासाठी मार्ग देतो. " (७६-७८)

श्रीराम म्हणाले – "माझा हा महान बाण अमोघ आहे. तेव्हा तो कोणत्या ठिकाणी सोडावा ? व्यर्थ न जाणाऱ्या बाणाला हे समुद्रा, तू चटदिशी एखादे लक्ष्य दाखव." (७९)

रामांचे वचन ऐकून आणि रामांच्या हातातील तो प्रचंड बाण पाहून तो महातेजस्वी महासागर राघवांना बोलला. (८०)

"हे रामा, माझ्या उत्तर प्रदेशी द्रुमकुल्य नावाचा एक प्रसिद्ध प्रदेश आहे. तेथे पापी मनाचे अनेक लोक राहातात. ते रात्रंदिवस मला त्रास देत असतात. हे रघुश्रेष्ठा, तेथे तुमचा बाण टाका." त्यानंतर रामांनी सोडलेला तो बाण एका क्षणात आभीर मंडळाचा वध करून, पुनः परत आला आणि पूर्वीप्रमाणे तो भात्यात येऊन राहिला. त्यानंतर सागर विनयपूर्वक रघुश्रेष्ठांना म्हणाला. (८१-८३)

नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्मणः ।
सुतो धीमान् समर्थोऽस्मिन् कार्ये लब्धवरो हरिः ॥ ८४ ॥

कीर्तिं जानन्तु ते लोकाः सर्वलोकमलापहाम् ।
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् ॥ ८५ ॥

ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः ।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने ॥ ८६ ॥

ततोऽतिहृष्टः प्लवगेन्द्रयूथपै-
र्महानगेन्द्रप्रतिमैर्युतो नलः ।
बबन्ध सेतुं शतयोजनायतं
सुविस्तृतं पर्वतपादपैर्दृढम् ॥ ८७ ॥

"विश्वकर्म्याच्या नल नावाच्या पुत्राने माझ्या पाण्यात सेतू तयार करावा. वर प्राप्त झाल्यामुळे तो बुद्धिमान वानर हे काम करण्यास समर्थ आहे. (८४)

तसे केल्यावर सर्व लोकांच्या पापाचे हरण करणारी तुमची कीर्ती सर्व लोकांना कळून येईल." असे सांगून, राघवांना नमस्कार करून, सागर अंतर्धान पावला. (८५)

त्यानंतर सुग्रीव आणि लक्ष्मण यांच्यासह रामांनी वानरांच्या मदतीने सेतू बांधण्याची आज्ञा नलाला दिली. (८६)

अतिशय आनंदित झालेल्या नलाने तेव्हा प्रचंड पर्वताप्रमाणे महान शरीर असणाऱ्या श्रेष्ठ वानरांच्या आणि वानर यूथपतींच्या साहाय्याने, पर्वत आणि वृक्ष यांचा वापर करून, शंभर योजने लांब, अतिविस्तृत आणि बळकट असा सेतू बांधला. (८७)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थ सर्ग

समुद्रतरण, लंका निरीक्षण, आणि रावण व शुक यांचा संवाद

श्रीमहादेव उवाच

सेतुमारभमाणस्तु तत्र रामेश्वरं शिवम् ।
संस्थाप्य पूजयित्वाह रामो लोकहिताय च ॥ १ ॥

प्रणमेत्सेतुबन्धं यो दृष्ट्वा रामेश्वरं शिवम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते मदनुग्रहात् ॥ २ ॥

सेतुबन्धे नरः स्नात्वा दृष्ट्वा रामेश्वरं हरम् ।
सङ्कल्पनियतो भूत्वा गत्वा वाराणसीं नरः ॥ ३ ॥

आनीय गङ्गासलिलं रामेशमभिषिच्य च ।
समुद्रे क्षिपतद्द्वारो ब्रह्म प्राप्नोत्यसंशयम् ॥ ४ ॥

कृतानि प्रथमेनाह्ना योजनानि चतुर्दश ।
द्वितीयेन तथा चाह्ना योजनानि तु विंशतिः ॥ ५ ॥

तृतीयेन तथा चाह्ना योजनान्येकविंशतिः ।
चतुर्थेन तथा चाह्ना द्वाविंशतिरिति श्रुतम् ॥ ६ ॥

श्रीमहादेव म्हणाले–हे पार्वती, सेतू बांधण्याचा आरंभ करताना, रामेश्वर नावाच्या शिवलिंगाची स्थापना करून व त्याची पूजा करून, लोकांच्या हितासाठी राम म्हणाले. (१)

"रामेश्वर शिवाचे दर्शन घेऊन जो कोणी माणूस सेतुबंधाला प्रणाम करेल, तो माझ्या कृपेने ब्रह्महत्या इत्यादी पापांतून मुक्त होऊन जाईल. (२)

सेतुबंधाच्या ठिकाणी स्नान करून, रामेश्वर महादेवाचे दर्शन घेऊन, मग नियत संकल्प करून, वाराणसीला जाऊन, तेथून गंगा नदीचे पाणी आणून, त्या पाण्याने रामेश्वराला अभिषेक करून व उरलेले पाणी पात्रासह जो कोणी समुद्रामध्ये सोडील, तो निःसंशयपणे ब्रह्म प्राप्त करून घेईल." (३-४)

सेतू बांधताना नलाने पहिल्या दिवशी चौदा योजने, दुसऱ्या दिवशी वीस योजने, तिसऱ्या दिवशी एकवीस योजने, चौथ्या दिवशी बावीस योजने लांब सेतू बांधला, असे ऐकिवात आहे. (५-६)

पञ्चमेन त्रयोविंशद्योजनानि समन्ततः ।
बबन्ध सागरे सेतुं नलो वानरसत्तमः ॥ ७ ॥

तैनेव जग्मुः कपयो योजनानां शतं द्रुतम् ।
असङ्ख्याताः सुवेलाद्रिं रुरुधुः प्लवगोत्तमाः ॥ ८ ॥

आरुह्य मारुतिं रामो लक्ष्मणोऽप्यङ्गदं तथा ।
दिदृक्षू राघवो लङ्कामारुरोहाचलं महत् ॥ ९ ॥

दृष्ट्वा लङ्कां सुविस्तीर्णां नानाचित्रध्वजाकुलाम् ।
चित्रप्रासादसम्बाधां स्वर्णप्राकारतोरणाम् ॥ १० ॥

परिखाभिः शतघ्नीभिः सङ्क्रमैश्च विराजिताम् ।
प्रासादोपरि विस्तीर्णप्रदेशे दशकन्धरः ॥ ११ ॥

मन्त्रिभिः सहितो वीरैः किरीटदशकोज्ज्वलः ।
नीलाद्रिशिखराकारः कालमेघसमप्रभः ॥ १२ ॥

रत्नदण्डैः सितच्छत्रैरनेकैः परिशोभितः ।
एतस्मिन्नन्तरे बद्धो मुक्तो रामेण वै शुकः ॥ १३ ॥

वानरैस्ताडितः सम्यग् दशाननमुपागतः ।
प्रहसन् रावणः प्राह पीडितः किं परैः शुक ॥ १४ ॥

रावणस्य वचः श्रुत्वा शुको वचनमब्रवीत् ।
सागरस्योत्तरे तीरेऽब्रवं ते वचनं यथा ।
तत उत्प्लुत्य कपयो गृहीत्वा मां क्षणात्ततः ॥ १५ ॥

मुष्टिभिर्नखदन्तैश्च हन्तुं लोमुं प्रचक्रमुः ।
ततो मां राम रक्षेति क्रोशन्तं रघुपुङ्गवः ॥ १६ ॥

विसृज्यतामिति प्राह विसृष्टोऽहं कपीश्वरैः ।
ततोऽहमागतो भीत्या दृष्ट्वा तद्वानरं बलम् ॥ १७ ॥

राक्षसानां बलौघस्य वानरेन्द्रबलस्य च ।
नैतयोर्विद्यते सन्धिर्देववदानवयोरिव ॥ १८ ॥

पाचवे दिवशी नलाने तेवीस योजने सेतू बांधला. अशा प्रकारे त्या समुद्रात सगळीकडे वानरश्रेष्ठ नलाने सेतू बांधला. (७)

आणि त्या सेतूवरूनच असंख्य वानर त्वरेने शंभर योजने विस्तीर्ण असलेला सागर ओलांडून पलीकडे गेले आणि मग तेथे वानरश्रेष्ठांनी सुवेल (त्रिकूट) पर्वताला वेढा घातला. (८)

लंका पाहाण्याच्या इच्छेने श्रीराम मारुतीच्या खांद्यावर चढले आणि लक्ष्मण अंगदाच्या खांद्यावर चढला अशा प्रकारे ते दोघेही त्या महान पर्वतावर चढले. (९)

मग अतिशय विस्तीर्ण, नाना प्रकारच्या चित्रविचित्र ध्वजांनी भरलेली, एकमेकाजवळ असणाऱ्या चित्रविचित्र प्रासादांनी युक्त, सोन्याचे प्राकार आणि तोरणे असणारी, तसेच खंदक तोफा आणि पूल यांनी शोभायमान असणारी लंका त्यांनी पाहिली. राज-प्रासादाच्या वरील विस्तीर्ण भागावर वीर मंत्र्यांसह रावण बसलेला होता. दहा किरीटांनी तो तेजःपुंज दिसत होता. नील पर्वताच्या शिखराप्रमाणे त्याचा आकार होता. काळ्या मेघाप्रमाणे त्याची अंगकांती होती. रत्नजडित दंड असणाऱ्या अनेक पांढऱ्या छत्रांनी तो अतिशय शोभत होता. इतक्यात वानरांनी शुकाला भरपूर मारून बांधले होते. त्याला रामांनी मुक्त केले, तो रावणाजवळ आला. त्याला पाहून रावण हसत हसत म्हणाला, अरे शुका, तुला शत्रूंनी फार त्रास दिला काय?" (१०-१४)

रावणाचे वचन ऐकल्यावर शुक म्हणाला, "सागराच्या उत्तर तीरावर जाऊन, मी तुमचा संदेश जसाच्या तसा सांगितला; तेव्हा एका क्षणात वानरांनी उंच उड्या मारल्या आणि मला पकडले आणि मग बुक्क्यांनी, नखांनी व दातांनी ते मला त्रास देऊ लागले. शेवटी मला ठार मारू लागले. "हे रामा, माझे रक्षण कर" असे मी ओरडू लागलो. तेव्हा "सोडा रे त्याला" असे राम म्हणाले. मग वानरश्रेष्ठांनी मला सोडले. ते वानर सैन्य पाहून भिऊन मी येथे आलो. (१५-१७)

ज्या प्रमाणे देव-दानवांत संधी होणे शक्य नाही त्याप्रमाणे राक्षस-सेना व वानर-सेना यामध्ये संधी होणे शक्य नाही, असे मला वाटते. (१८)

पुरप्राकारमायान्ति क्षिप्रमेकतरं कुरु ।
सीतां वास्मै प्रयच्छाशु युद्धं वा दीयतां प्रभो ॥ १९ ॥

मामाह रामस्त्वं ब्रूहि रावणं मद्वचः शुक ।
यद्बलं च समाश्रित्य सीतां मे हृतवानसि ॥ २० ॥

तद्दर्शय यथाकामं ससैन्यः सहबान्धवः ।
श्वःकाले नगरीं लङ्कां सप्राकारां सतोरणाम् ॥ २१ ॥

राक्षसं च बलं पश्य शरैर्विध्वंसितं मया ।
घोररोषमहं मोक्ष्ये बलं धारय रावण ॥ २२ ॥

इत्युक्त्वोपरराम अथ रामः कमललोचनः ।
एकस्थानगता यत्र चत्वारः पुरुषर्षभाः ॥ २३ ॥

श्रीरामो लक्ष्मणश्चैव सुग्रीवश्च बिभीषणः ।
एत एव समर्थास्ते लङ्कां नाशयितुं प्रभो ॥ २४ ॥

उत्पाट्य भस्मीकरणे सर्वे तिष्ठन्तु वानराः ।
तस्य यादृग् बलं दृष्टं रूपं प्रहरणानि च ॥ २५ ॥

वधिष्यति पुरं सर्वमेकस्तिष्ठन्तु ते त्रयः ।
पश्य वानरसेनां तामसङ्ख्यातां प्रपूरिताम् ॥ २६ ॥

गर्जन्ति वानरास्तत्र पश्य पर्वतसन्निभाः ।
न शक्यास्ते गणयितुं प्राधान्येन ब्रवीमि ते ॥ २७ ॥

एष योऽभिमुखो लङ्कां नदंस्तिष्ठति वानरः ।
यूथपानां सहस्राणां शतेन परिवारितः ॥ २८ ॥

सुग्रीवसेनाधिपतिर्नीलो नामाग्निनन्दनः ।
एष पर्वतशृङ्गाभः पद्मकिञ्ज्ल्कसन्निभः ॥ २९ ॥

स्फोटयत्यभिसंरब्धो लाङ्गूलं च पुनः पुनः ।
युवराजोऽङ्गदो नाम वालिपुत्रोऽतिवीर्यवान् ॥ ३० ॥

तेव्हा हे प्रभो, लौकरच ते वानर आपल्या नगरीच्या तटावर येतील, आता तुम्ही दोनपैकी कोणतीही एक गोष्ट लगेच करा. एक सीता तरी त्या रामांना सत्वर देऊन टाका अथवा रामांबरोबर युद्धाला तयार व्हा. (१९)

राम मला म्हणाले, 'अरे शुका, तू रावणाला माझा निरोप सांग की ज्या सामर्थ्याचा आधार घेऊन, तू माझ्या सीतेचे अपहरण केले आहेस, ते सामर्थ्य आता तू तुझ्या इच्छेप्रमाणे सर्व सैन्य आणि सर्व बंधू यांच्यासह मला दाखव. उद्याच्या उद्याच प्राकार व तोरणे यांचेसह लंकापुरी आणि तुझे राक्षस सैन्य मी बाणांनी नष्ट केलेले तू पाहशील. अरे रावणा, मी माझ्या भयंकर क्रोधाचा तुझ्यावर प्रयोग करीन. तेव्हा तू आपले सामर्थ्य राखून ठेव.' (२०-२२)

असे बोलून ते कमलनयन राम गप्प बसले. हे प्रभो, लंकेचा नाश करण्यास सर्व वानर तूर्त बाजूला राहू देत (कारण त्यांना फारसे महत्त्व नाही). श्रीराम, लक्ष्मण, सुग्रीव आणि बिभीषण हे चार पुरुषश्रेष्ठ एकाच स्थानी आले आहेत.ते चौघे लंकेला मुळासकट उपटून टाकून तिला भस्मसात् करण्यास अगदी समर्थ आहेत किंबहुना त्या रामांचे जे बळ, रूप आणि शस्त्रे मी पाहिली आहेत. त्यावरून कळून येते की ते लक्ष्मण, सुग्रीव आणि बिभीषण हे तिघेही जरी बाजूला राहिले तरी एकटे श्रीराम तुझे सर्व नगर नष्ट करून टाकतील. असंख्य वानरांनी भरलेली आणि सगळीकडे पसरलेली ही वानरांची सेना पाहा. (२३-२६)

पर्वताप्रमाणे आकार असणारे वानर तेथे गर्जना करीत आहेत, ते पाहा. त्या वानरांची मोजदाद करणेही शक्य नाही. तथापि त्यातील काही मुख्य वानरांबद्दल मी तुम्हांला सांगतो ऐक. (२७)

हा जो वानर लंकेकडे तोंड करून गर्जना करीत उभा आहे आणि जो शेकडो, हजारो वानर-सेनापतींच्या समवेत आहे, तो नील नावाचा अग्नीचा पुत्र असून, तो सुग्रीव सेनेचा मुख्य सेनापती आहे. आणि हा जो पर्वताच्या शिखराप्रमाणे विशाल देह असणारा, कमळाच्या केसरांप्रमाणे तेज असणारा, आणि जो रागाने वारंवार आपली शेपटी आपटत आहे, तो अतिशय सामर्थ्य-संपन्न असा अंगद नावाचा वालीचा पुत्र असून तो युवराज आहे. (२८-३०)

येन दृष्टा जनकजा रामस्यातीववल्लभा ।
हनूमानेष विख्यातो हतो येन तवात्मजः ॥ ३१ ॥

श्वेतो रजतसङ्काशो महाबुद्धिपराक्रमः ।
तूर्णं सुग्रीवमागम्य पुनर्गच्छति वानरः ॥ ३२ ॥

यस्त्वेष सिंहसङ्काशः पश्यत्यतुलविक्रमः ।
रम्भो नाम महासत्त्वो लङ्कां नाशयितुं क्षमः ॥ ३३ ॥

एष पश्यति वै लङ्कां दिधक्षन्निव वानरः ।
शरभो नाम राजेन्द्र कोटियूथपनायकः ॥ ३४ ॥

पनसश्च महावीर्यो मैन्दश्च द्विविदस्तथा ।
नलश्च सेतुकर्तासौ विश्वकर्मसुतो बली ॥ ३५ ॥

वानराणां वर्णने वा सङ्ख्याने वा क ईश्वरः ।
शूराः सर्वे महाकायाः सर्वे युद्धाभिकाङ्क्षिणः ॥ ३६ ॥

शक्ताः सर्वे चूर्णयितुं लङ्कां रक्षोगणैः सह ।
एतेषां बलसङ्ख्यानं प्रत्येकं वच्मि ते शृणु ॥ ३७ ॥

एषां कोटिसहस्राणि नव पञ्च च सप्त च ।
तथा शङ्खसहस्राणि तथार्बुदशतानि च ॥ ३८ ॥

सुग्रीवसचिवानां ते बलमेतत्प्रकीर्तितम् ।
अन्येषां तु बलं नाहं वक्तुं शक्तोऽस्मि रावण ॥ ३९ ॥

रामो न मानुषः साक्षादादिनारायणः परः ।
सीता साक्षाज्जगद्धेतुश्चिच्छक्तिर्जगदात्मिका ॥ ४० ॥

ताभ्यामेव समुत्पन्नं जगत्स्थावरजङ्गमम् ।
तस्माद्रामश्च सीता च जगतस्तस्थुषश्च तौ ॥ ४१ ॥

पितरौ पृथिवीपाल तयोर्वैरी कथं भवेत् ।
अजानता त्वयानीता जगन्मातैव जानकी ॥ ४२ ॥

रामांना अतिशय प्रिय असणाऱ्या जनककन्या सीतेला ज्याने भेट दिली आणि ज्याने तुमच्या पुत्राला ठार केले तो हा प्रसिद्ध हनुमान आहे. (३१)

चांदीप्रमाणे शुभ्र वर्णाचा, महान बुद्धी व महान् पराक्रम असणारा असा जो सुग्रीवाकडे त्वरित जाऊन पुनः परत जात आहे, आणि जो सिंहाप्रमाणे अतुलनीय पराक्रम करणारा वानर इकडे पाहात आहे, तो रंभ नावाचा महासामर्थ्य असणारा वानर आहे. तो एकटाच लंकेचा नाश करण्यास समर्थ आहे. (३२-३३)

हे राजेंद्रा, लंकेला जणू जाळून टाकण्याच्या इच्छेने जो लंकेकडे पाहात आहे, तो शरभ नावाचा वानर कोटी वानर-सेनापतींचा नायक आहे. (३४)

महापराक्रमी पनस, मैंद, तसेच द्विविद आणि सेतू बांधणारा, बलवान असा विश्वकर्म्याचा पुत्र नल, असे अन्य मुख्य वानर आहेत. (३५)

या सर्व वानरांचे वर्णन करण्यास अथवा त्यांची गणती करण्यास कोण समर्थ आहे ? हे सर्व वानर शूर आणि धिप्पाड असून ते सर्वच युद्ध करण्यासाठी उत्सुक झालेले आहेत. (३६)

सर्व राक्षस-समूहांसह लंकेचा चुराडा करण्यास ते समर्थ आहेत. यांतील प्रत्येकाच्या हाताखाली असणाऱ्या सैन्याची संख्या मी तुला सांगतो ती तू ऐक. (३७)

प्रत्येकाच्या नियंत्रणाखाली एकवीस हजार कोटी, हजारो शंख[१], आणि शेकडो अर्बुद[२] सैन्य आहे. (३८)

हे रावणा, हे मी तुला सुग्रीवाच्या मंत्र्यांचे सैन्य सांगितले आहे. याखेरीज इतरांचे सैन्य किती आहे, हे मी सांगू शकत नाही. (३९)

श्रीराम हे सामान्य माणूस नाहीत. ते साक्षात आदिनारायण परमात्मा आहेत आणि सीता ही जगाचे साक्षात कारण असणारी जगद्-रूपिणी चिच्छक्ती आहे. (४०)

त्या दोघांचेपासूनच हे स्थावर जंगम विश्व उत्पन्न झाले आहे. म्हणून राम आणि सीता हे दोघे या जगाचे माता पिता आहेत. हे पृथिवी-पते, त्यांचा शत्रू असा कोण व कसा असू शकेल ? अजाणतेपणाने ज्या सीतेला तू पळवून आणले आहेस, ती जानकी जगन्माता आहे. (४१-४२)

---

१. एकावर तेरा शून्य देऊन होणारी संख्या म्हणजे शंख.

२. एक अर्बुद म्हणजे दहा कोटी.

क्षणनाशिनि संसारे शरीरे क्षणभङ्गुरे ।
पञ्चभूतात्मके राजंश्चतुर्विंशतितत्त्वके ॥ ४३ ॥

मलमांसास्थिदुर्गन्धभूयिष्ठेऽहंङ्कृतालये ।
कैवास्था व्यतिरिक्तस्य काये तव जडात्मके ॥ ४४ ॥

यत्कृते ब्रह्महत्यादिपातकानि कृतानि ते ।
भोगभोक्ता तु यो देहः स देहोऽत्र पतिष्यति ॥ ४५ ॥

पुण्यपापे समायातो जीवेन सुखदुःखयोः ।
कारणे देहयोगादिनात्मनः कुरुतोऽनिशम् ॥ ४६ ॥

यावद्देहोऽस्मि कर्तास्मीत्यात्माहंकुरुतेऽवशः ।
अध्यासात्तावदेव स्याज्जन्मनाशादिसम्भवः ॥ ४७ ॥

तस्मात्त्वं त्यज देहादावभिमानं महामते ।
आत्मातिनिर्मलः शुद्धो विज्ञानात्माचलोऽव्ययः ॥ ४८ ॥

स्वाज्ञानवशतो बन्धं प्रतिपद्य विमुह्यति ।
तस्मात्त्वं शुद्धभावेन ज्ञात्वात्मानं सदा स्मर ॥ ४९ ॥

विरतिं भज सर्वत्र पुत्रदारगृहादिषु ।
निरयेष्वपि भोगः स्याच्छ्वशूकरतनावपि ॥ ५० ॥

देहं लब्ध्वा विवेकाढ्यं द्विजत्वं च विशेषतः ।
तत्रापि भारते वर्षे कर्मभूमौ सुदुर्लभम् ॥ ५१ ॥

को विद्वानात्मसात्कृत्वा देहं भोगानुगो भवेत् ।
अतस्त्वं ब्राह्मणो भूत्वा पौलस्त्यतनयश्च सन् ॥ ५२ ॥

अज्ञानीव सदा भोगाननुधावसि किं मुधा ।
इतः परं वा त्यक्त्वा त्वं सर्वसङ्गं समाश्रय ॥ ५३ ॥

राममेव परात्मानं भक्तिभावेन सर्वदा ।
सीतां समर्प्य रामाय तत्पादानुचरो भव ॥ ५४ ॥

हे राजन्, क्षणोक्षणी नष्ट होणाऱ्या या संसारात, शरीर हे क्षणभंगुर, पाच भूतांनी बनलेले आणि चोवीस [३] तत्त्वांचा समूह असणारे आहे. मल, मांस, अस्थी व दुर्गंधी पदार्थ यांचाच जास्त भरणा असणाऱ्या, अहंकाराचे आश्रय-स्थान, अचेतन आणि तुझ्या आत्म्यापेक्षा वेगळे असणाऱ्या अशा या शरीराची तू कसली आस्था बाळगीत आहेस ? (४३-४४)

ज्या देहासाठी तू ब्रह्महत्त्या इत्यादी पातके केली आहेस आणि जो देह भोग भोगणारा आहे, तो देह मरणोत्तर येथेच पडणार आहे. (४५)

सुख- दुःखांची कारणे असणारी पुण्य-पापे तर जीवाबरोबर येतात आणि देहाशी संबंध असल्यामुळे ही पुण्य-पापे रात्रंदिवस जीवात्म्याला सुख-दुःखे देत असतात. (४६)

जोपर्यंत अज्ञानामुळे उत्पन्न होणाऱ्या अध्यासामुळे 'मी देह आहे, मी कर्ता आहे' असा अभिमान आत्मा करतो, तोपर्यंत अध्यासामुळे त्याला जन्म, मरण, इत्यादी असहायपणे भोगावे लागतात. (४७)

म्हणून हे बुद्धिमान रावणा, तू देह इत्यादी वरील अभिमान सोडून दे. मुळात आत्मा हा अतिशय निर्मळ, शुद्ध, विज्ञान-स्वरूप, निश्चल आणि निर्विकार आहे. (४८)

परंतु आपल्या अज्ञानामुळे तो आत्मा जन्म-मरणादी बंधनांत पडून मोहित होतो. म्हणून तू शुद्ध भावाने आत्म्याला जाणून नेहमी त्याचे स्मरण ठेव. (४९)

पुत्र, पत्नी, घरदार इत्यादी सर्वांविषयी वैराग्य धारण कर. कारण कुत्रा, डुक्कर इत्यादी योनींमध्येसुद्धा तसेच नरकांतसुद्धा भोग हे मिळत असतातच. (५०)

खरे म्हणजे हा देह प्राप्त झाल्यावर, विशेषतः विवेकाने युक्त असे द्विजत्व प्राप्त झाल्यावर, तसेच कर्मभूमी असणाऱ्या या भारत वर्षात अतिशय दुर्लभ असा जन्म प्राप्त झाला असता, कोणता शहाणा माणूस देहाला आत्मा मानून भोगांच्या मागे लागेल ? तेव्हा तू स्वतः ब्राह्मण असून आणि त्यातही पुलस्त्यनंदन विश्रवा ऋषींचा पुत्र असतानासुद्धा, एखाद्या अज्ञानी माणसाप्रमाणे तू सदा भोगांच्या मागे फुकटच का लागला आहेस? यापुढे तरी सर्व आसक्तीचा त्याग करून,अत्यंत भक्तीने नेहमी परमात्म्या रामांचा आश्रय घे. त्यांना सीता अर्पण करून त्यांच्या पायांची सेवा करणारा सेवक बन. (५१-५४)

३. प्रकृती, बुद्धी, अहंकार, अकरा इंद्रिये, पाच भूते आणि त्यांचे पाच विषय या सर्वांना मिळून चोवीस तत्त्वे असे म्हटले जाते.

विमुक्तः सर्वपापेभ्यो विष्णुलोकं प्रयास्यसि ।
नो चेद्गमिष्यसेऽधोऽधः पुनरावृत्तिवर्जितः ।
अङ्गीकुरुष्व मद्वाक्यं हितमेव वदामि ते ॥ ५५ ॥

असे जर तू केलेस तर तू सर्व पापांतून मुक्त होऊन विष्णु-लोकाला जाशील आणि असे जर तू केले नाहीस तर तुला पुन्हा असे दुर्लभ मानव-शरीर मिळू शकणार नाही. तू उत्तरोत्तर अधोलोकांप्रत जाशील. मग तेथून पुनः वर येणे तुला शक्य होणार नाही. मी तुला हिताची गोष्ट सांगत आहे. या माझ्या बोलण्याचा तू स्वीकार कर. (५५)

सत्सङ्गतिं कुरु भजस्व हरिं शरण्यं
श्रीराघवं मरकतोपलकान्तिकान्तम् ।
सीतासमेतमनिशं धृतचापबाणं
सुग्रीवलक्ष्मणबिभीषणसेविताङ्घ्रिम् ॥ ५६ ॥

अरे रावणा, तू सतत सत्संगती कर. जे शरणागतांचे रक्षण करतात, मरकत-मण्याप्रमाणे ज्यांची अंगकांती सुंदर आहे, ज्यांच्या समवेत सीता आहे, जे धनुष्य व बाण धारण करतात, तसेच सुग्रीव, लक्ष्मण आणि बिभीषण हे ज्यांची चरणसेवा करतात, अशा त्या विष्णु-रूप श्रीराघवांची तू रात्रंदिवस भक्ती कर." (५६)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पंचम सर्ग

शुकाचे पूर्वचरित्र, माल्यवानाने रावणाला समजावणे आणि वानर व राक्षस यांचे युद्ध

श्रीमहादेव उवाच

श्रुत्वा शुकमुखोद्गीतं वाक्यमज्ञाननाशनम् ।
रावणः क्रोधताम्राक्षो दहन्निव तमब्रवीत् ॥ १ ॥

श्रीमहादेव म्हणाले– हे पार्वती, शुकाच्या मुखातून बाहेर पडलेले, अज्ञानाचा नाश करणारे ते वचन ऐकल्यावर, क्रोधाने जणू जळणारा आणि रागाने डोळे लाल झालेला रावण शुकाला म्हणाला. (१)

अनुजीव्य सुदुर्बुद्धे गुरुवद्भाषसे कथम् ।
शासिताहं त्रिजगतां त्वं मां शिक्षन्न लज्जसे ॥ २ ॥

"अतिशय दुष्ट बुद्धी असणाऱ्या हे शुका, माझ्या तुकड्यांवर वाढलेला तू माझा सेवक असून, एखाद्या गुरूप्रमाणे माझ्याशी कसे बोलतोस ? मी तिन्ही लोकांचे शासन करणारा आहे. मला उपदेश करताना तुला लाज कशी वाटत नाही ? (२)

इदानीमेव हन्मि त्वां किन्तु पूर्वकृतं तव ।
स्मरामि तेन रक्षामि त्वां यद्यपि वधोचितम् ॥ ३ ॥

खरे म्हणजे आत्ताच मी तुझा वध केला असता. तथापि तू पूर्वी माझ्यासाठी जे काही चांगले केले आहेस ते माझ्या लक्षात आहे. म्हणून जरी तू वध करण्यास योग्य आहेस, तरी मी तुला जीवदान देत आहे. (३)

इतो गच्छ विमूढ त्वमेवं श्रोतुं न मे क्षमम् ।
महाप्रसाद इत्युक्त्वा वेपमानो गृहं ययौ ॥ ४ ॥

अरे मूर्खा, तू आता येथून चालता हो. अशा प्रकारचे तुझे भाषण मला ऐकवत नाही." "तेव्हा आपली मोठी कृपा आहे," असे बोलून शुक हा भीतीने कापत कापत आपल्या घरी गेला. पूर्वजन्मी शुक हासुद्धा वेद जाणणारा आणि श्रेष्ठ ब्रह्मवेत्ता असा ब्राह्मण होता. तो

शुकोऽपि ब्राह्मणः पूर्वं ब्रह्मिष्ठो ब्रह्मवित्तमः ।
वानप्रस्थविधानेन वने तिष्ठन् स्वकर्मकृत् ॥ ५ ॥

वानप्रस्थाश्रमाच्या नियमांना धरून आपली धर्म-कर्मे करीत एका वनामध्ये राहात होता. (४-५)

देवानामभिवृद्ध्यर्थं विनाशाय सुरद्विषाम् ।
चकार यज्ञवितिमविच्छिन्नां महामतिः ॥ ६ ॥

राक्षसानां विरोधोऽभूच्छुको देवहितोद्यतः ।
वज्रदंष्ट्र इति ख्यातस्तत्रैको राक्षसो महान् ॥ ७ ॥

अन्तरं प्रेप्सुरातिष्ठच्छुकापकरणोद्यतः ।
कदाचिदागतोऽगस्त्यस्तस्याश्रमपदं मुनेः ॥ ८ ॥

तेन सम्पूजितोऽगस्त्यो भोजनार्थं निमन्त्रितः ।
गते स्नातुं मुनौ कुम्भसम्भवे प्राप्य चान्तरम् ॥ ९ ॥

अगस्त्यरूपधृक् सोऽपि राक्षसः शुकमब्रवीत् ।
यदि दास्यसि मे ब्रह्मन् भोजनं देहि सामिषम् ॥ १० ॥

बहुकालं न भुक्तं मे मांसं छागाङ्गसम्भवम् ।
तथेति कारयामास मांसभोज्यं सविस्तरम् ॥ ११ ॥

उपविष्टे मुनौ भोक्तुं राक्षसोऽतीव सुन्दरम् ।
शुकभार्यांवपुर्धृत्वा तां चान्तर्मोहयन् खलः ॥ १२ ॥

नरमांसं ददौ तस्मै सुपक्वं बहुविस्तरम् ।
दत्त्वैवान्तर्दधे रक्षस्ततो दृष्ट्वा चुकोप सः ॥ १३ ॥

अमेध्यं मानुषं मांसमगस्त्यः शुकमब्रवीत् ।
अभक्ष्यं मानुषं मांसं दत्तवानसि दुर्मते ॥ १४ ॥

मह्यं त्वं राक्षसो भूत्वा तिष्ठ त्वं मानुषाशनः ।
इति शप्तः शुको भीत्या प्राहागस्त्यं मुने त्वया ॥ १५ ॥

इदानीं भाषितं मेऽद्य मांसं देहीति विस्तरम् ।
तथैव दत्तं भो देव किं मे शापं प्रदास्यसि ॥ १६ ॥

श्रुत्वा शुकस्य वचनं मुहूर्तं ध्यानमास्थितः ।
ज्ञात्वा रक्षःकृतं सर्वं ततः प्राह शुकं सुधीः ॥ १७ ॥

देवांच्या अभिवृद्धीसाठी आणि देवांचा द्वेष करणाऱ्या दैत्यांच्या नाशासाठी, त्या महाबुद्धिमान शुकाने अखंडितपणे अनेक यज्ञ केले होते. (६)

देवांचे हित करण्यात तत्पर असणाऱ्या शुकाला राक्षसांचा विरोध होऊ लागला. त्या वेळी तेथे वज्रदंष्ट्र नावाचा एक प्रख्यात असा महान राक्षस होता. (७)

शुकाचा अपकार करण्याकरता उत्सुक असणारा वज्रदंष्ट्र योग्य संधीची वाट पाहात थांबला होता. एकदा त्या शुक मुनीच्या आश्रमस्थानी अगस्त्य नावाचे ऋषी आले. (८)

शुकाने अगस्तींची पूजा केली आणि त्यांना भोजनासाठी आमंत्रण दिले. नंतर अगस्त्य स्नानासाठी गेले. ती संधी साधून, त्या राक्षसानेसुद्धा अगस्त्यांचे रूप धारण करून शुकाला म्हटले, "हे ब्राह्मणा, जर तू मला भोजन देणार असशील, तैर मला मांसयुक्त भोजन दे. (९-१०)

बरेच दिवस झाले मी बोकडाच्या शरीरांतील मांस खाल्लेले नाही." 'ठीक आहे' असे म्हणून शुकाने पुष्कळ मांसयुक्त पदार्थ तयार करवून घेतले. (११)

नंतर खरे अगस्त्य मुनी जेवावयास बसले असता, त्या दुष्ट राक्षसाने शुकाच्या पत्नीला आश्रमाच्या आतल्या बाजूला मूर्च्छित केले आणि त्या शुक पत्नीचे अतिशय सुंदर रूप धारण करून, चांगले शिजविलेले, नाना प्रकारचे नरमांसाचे पदार्थ त्याने अगस्त्यांना वाढले. ते पदार्थ वाढून तो राक्षस अंतर्धान पावला. आपल्यापुढे वाढलेले ते अपवित्र व अभक्ष्य माणसाचे मांस पाहून अगस्त्य अत्यंत क्रुद्ध झाले. ते शुकाला म्हणाले, "अरे दुष्ट बुद्धीच्या मुने, तू मला अभक्ष्य असे मानवाचे मांस दिले आहेस. म्हणून तू माणसांना खाणारा राक्षस होऊन राहा." अशा प्रकारे अगस्त्यांचा शाप मिळालेला शुक घाबरून जाऊन त्यांना म्हणाला,"हे मुनी, तुम्हीच मला आत्ता सांगितले होते की, आज मला नाना प्रकारचे मांस भोजनास दे. त्याप्रमाणे मी ते दिले आहे. तेव्हा हे देवा, तुम्ही मला का बरे शाप देत आहात?" (१२-१६)

शुकाचे वचन ऐकल्यावर महाबुद्धिमान अगस्त्यांनी थोडा वेळ ध्यान केले, तेव्हा त्यांना कळून आले की ते सर्व एका राक्षसाचे कृत्य होते. मग अतिशय बुद्धिवान अगस्त्य शुकाला म्हणाले . (१७)

तवापकारिणा सर्वं राक्षसेन कृतं त्विदम् ।
अविचार्यैव मे दत्तः शापस्ते मुनिसत्तम ॥ १८ ॥

तथापि मे वचोऽमोघमेवमेव भविष्यति ।
राक्षसं वपुरास्थाय रावणस्य सहायकृत् ॥ १९ ॥

तिष्ठ तावद्यदा रामो दशाननवधाय हि ।
आगमिष्यति लङ्कायाः समीपं वानरैः सह ॥ २० ॥

प्रेषितो रावणेन त्वं चारो भूत्वा रघूत्तमम् ।
दृष्ट्वा शापाद्विनिर्मुक्तो बोधयित्वा च रावणम् ॥ २१ ॥

तत्त्वज्ञानं ततो मुक्तः परं पदमवाप्स्यसि ।
इत्युक्तोऽगस्त्यमुनिना शुको ब्राह्मणसत्तमः ॥ २२ ॥

बभूव राक्षसः सद्यो रावणं प्राप्य संस्थितः ।
इदानीं चाररूपेण दृष्ट्वा रामं सहानुजम् ॥ २३ ॥

रावणं तत्त्वविज्ञानं बोधयित्वा पुनर्द्रुतम् ।
पूर्ववद्ब्राह्मणो भूत्वा स्थितो वैखानसैः सह ॥ २४ ॥

ततः समागमद्वृद्धो माल्यवान् राक्षसो महान् ।
बुद्धिमान्नीतिनिपुणो राज्ञो मातुः प्रियः पिता ॥ २५ ॥

प्राह तं राक्षसं वीरं प्रशान्तेनान्तरात्मना ।
शृणु राजन्वचो मेऽद्य श्रुत्वा कुरु यथेप्सितम् ॥ २६ ॥

यदा प्रविष्टा नगरीं जानकी रामवल्लभा ।
तदादि पुर्यां दृश्यन्ते निमित्तानि दशानन ॥ २७ ॥

घोराणि नाशहेतूनि तानि मे वदतः शृणु ।
खरस्तनितनिर्घोषा मेघा अतिभयङ्कराः ॥ २८ ॥

शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वदा ।
रुदन्ति देवलिङ्गानि स्विद्यन्ति प्रचलन्ति च ॥ २९ ॥

"हे मुनिश्रेष्ठा, तुझ्यावर अपकार करू इच्छिणाऱ्या एका राक्षसाने हे सर्व केले आहे आणि मी विचार न करताच तुला शाप दिला. (१८)

तरीसुद्धा माझे वचन खोटे ठरणार नाही. तेव्हा हे असेच होईल. राक्षसाचे शरीर धारण करून तू रावणाला साहाय्य करीत राहा. तसे तू करीत असताना श्रीराम रावणाच्या वधासाठी वानरांसह लंकेजवळ येतील. तत्पूर्वी रावणाने पाठविल्यामुळे त्याचा दूत होऊन जेव्हा तू रघूत्तमांना पाहाशील, तेव्हा तू शापातून मुक्त होशील. त्याच वेळी रावणाला तत्त्वज्ञानाचा उपदेश केल्यानंतर, तू मुक्त होऊन परम पद प्राप्त करून घेशील." अगस्त्य मुनींनी असे म्हटल्यावर, तो ब्राह्मणश्रेष्ठ शुक राक्षस झाला आणि लगेच रावणाकडे जाऊन तो त्याच्या आश्रयाने राहू लागला. आता या वेळी तो दूत रूपात असताना लक्ष्मणासह रामांचे दर्शन शुकाला झाले आणि रावणाला तत्त्वज्ञानाचा उपदेश केल्यावर, तो चट्दिशी पूर्वीप्रमाणे ब्राह्मण झाला आणि इतर वानप्रस्थी लोकांबरोबर राहू लागला. (१९-२४)

नंतर इकडे रावणाच्या आईचा प्रिय पिता, बुद्धिमान, नीति-निपुण आणि वृद्ध असा माल्यवान नावाचा राक्षस रावणाजवळ आला. (२५)

राक्षस वीर रावणाला तो अतिशय शांत चित्ताने म्हणाला, "हे राजा, तू माझे म्हणणे अतिशय शांत चित्ताने ऐकून घे आणि मग तुझी जशी इच्छा असेल तसे तू कर. (२६)

हे रावणा, जेव्हापासून रामांची पत्नी जानकी या नगरीत प्रविष्ट झाली आहे, तेव्हापासून नगरीत जे भयंकर व नाशाचे कारण असणारे शकुन दिसू लागले आहेत, ते मी सांगतो ऐक. अत्यंत भयानक मेघ विजेच्या कडकडाटांसह गर्जना करीत आहेत आणि ते सर्वकाळ लंकेवर गरम रक्ताची वृष्टी करीत आहेत. देवतांच्या मूर्ती रडत आहेत. त्या घामेजून जात आहेत आणि आपल्या जागेवरून हलत आहेत. (२७-२९)

कालिका पाण्डुरैर्दन्तैः प्रहसत्यग्रतः स्थिता ।
खरा गोषु प्रजायन्ते मूषका नकुलैः सह ॥ ३० ॥

मार्जारेण तु युध्यन्ति पन्नगा गरुडेन तु ।
करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः ॥ ३१ ॥

कालो गृहाणि सर्वेषां काले काले त्ववेक्षते ।
एतान्यन्यानि दृश्यन्ते निमित्तान्युद्भवन्ति च ॥ ३२ ॥

अतः कुलस्य रक्षार्थं शान्तिं कुरु दशानन ।
सीतां सत्कृत्य सधनां रामायाशु प्रयच्छ भोः ॥ ३३ ॥

रामं नारायणं विद्धि विद्वेषं त्यज राघवे ।
यत्पादपोतमाश्रित्य ज्ञानिनो भवसागरम् ॥ ३४ ॥

तरन्ति भक्तिपूतान्तास्ततो रामो न मानुषः ।
भजस्व भक्तिभावेन रामं सर्वहृदालयम् ॥ ३५ ॥

यद्यपि त्वं दुराचारो भक्त्या पूतो भविष्यसि ।
मद्वाक्यं कुरु राजेन्द्र कुलकौशलहेतवे ॥ ३६ ॥

तत्तु माल्यवतो वाक्यं हितमुक्तं दशाननः ।
न मर्षयति दुष्टात्मा कालस्य वशमागतः ॥ ३७ ॥

मानवं कृपणं राममेकं शाखामृगाश्रयम् ।
समर्थं मन्यसे केन हीनं पित्रा मुनिप्रियम् ॥ ३८ ॥

रामेण प्रेषितो नूनं भाषसे त्वमनर्गलम् ।
गच्छ वृद्धोऽसि बन्धुस्त्वं सोढं सर्वं त्वयोदितम् ॥ ३९ ॥

इतो मत्कर्णपदवीं दहत्येतद्वचस्तव ।
इत्युक्त्वा सर्वसचिवैः सहितः प्रस्थितस्तदा ॥ ४० ॥

प्रासादाग्रे समासीनः पश्यन्वानरसैनिकान् ।
युद्धायायोजयत्सर्वराक्षसान्समुपस्थितान् ॥ ४१ ॥

कालिका देवी ही राक्षसांच्या पुढे उभी राहून आपले पांढरे दात विचकीत भेसूर हसते. गाईच्या पोटी गाढव जन्म घेत आहेत. उंदीर हे मुंगुस व मांजरे यांच्याबरोबर, आणि साप हे गरुडाबरोबर युद्ध करीत आहेत. एक भयानक विक्राळ , मुंडन केलेला, काळसर पिंगट रंगाचा, पुरुषाचा आकार धारण केलेला असा काल पुरुष वेळोवेळी सर्व राक्षसांच्या घरांमध्ये डोकावून पाहात आहे. अशा प्रकारचे तसेच अन्य काही अपशकुन निर्माण होत आहेत आणि ते दिसून येत आहेत. (३०-३२)

म्हणून हे रावणा, कुळाच्या रक्षणासाठी शांती कर. अरे रावणा, सीतेचा सत्कार करून तिला द्रव्यासह ताबडतोब रामांना परत देऊन टाक. (३३)

श्रीराम हे प्रत्यक्ष नारायण आहेत, हे तू जाणून घे. राघवांच्या बाबतीतील तुझा द्वेषभाव सोडून दे. ज्या अर्थी या रघुनाथांच्या चरणरूपी नावेचा आधार घेऊन भक्तीमुळे पवित्र अंतःकरण झालेले ज्ञानीजन भवसागर पार करून जातात, त्या अर्थी ते श्रीराम हे कोणी सामान्य माणूस नाहीत. म्हणून सर्वांच्या हृदयांत वास करणाऱ्या श्रीरामांचे तू भक्तिभावाने भजन कर. (३४-३५)

जरी तू दुराचारी असलास, तरी रामांच्या भक्तीने तू पवित्र होशील. तेव्हा हे राजेंद्रा, आपल्या कुळाचे कुशल व्हावे, या हेतूने तू माझे वचन मान्य कर." (३६)

तथापि माल्यवानाने सांगितले ते हितकारक बोलणे दशाननाला सहन झाले नाही; कारण तो दुष्ट मनाचा राक्षस काळाच्या अधीन झाला होता. (३७)

(रावण म्हणाला,) "ज्याने वानरांचा आधार घेतला आहे, ज्याला बापाने टाकले आहे, जो मुनिजनांना प्रिय आहे, अशा एकट्या दीन मानव रामाला, हे माल्यवाना, तू कोणत्या कारणाने इतका समर्थ समजत आहेस? (३८)

मला वाटते, रामाने तुला माझ्याकडे पाठविले आहे, म्हणून तू असे निरर्गल बोलत आहेस. जा, जा, तू वृद्ध आहेस आणि माझा नातेवाईक आहेस. म्हणून तू बोललेले सर्व काही मी सहन केले आहे. (३९)

खरे तर इकडे हे तुझे वचन माझ्या कानांना जाळत आहे." असे बोलून, सर्व सचिवांसह रावण तेव्हा तेथून निघून गेला. (४०)

नंतर आपल्या राज-प्रासादाच्या गच्चीवर बसून, वानर सैनिकांना पाहात आपल्याजवळ उपस्थित असणाऱ्या सर्व राक्षसांना त्याने युद्धासाठी सज्ज होण्याची आज्ञा केली. (४१)

रामोऽपि धनुरादाय लक्ष्मणेन समाहृतम् ।
दृष्ट्वा रावणमासीनं कोपेन कलुषीकृतः ॥ ४२ ॥

किरीटिनं समासीनं मन्त्रिभिः परिवेष्टितम् ।
शशाङ्कार्धनिभेनैव बाणेनैकेन राघवः ॥ ४३ ॥

श्वेतच्छत्रसहस्राणि किरीटदशकं तथा ।
चिच्छेद निमिषार्धेन तदद्भुतमिवाभवत् ॥ ४४ ॥

लज्जितो रावणस्तूर्णं विवेश भवनं स्वकम् ।
आहूय राक्षसान् सर्वान्प्रहस्तप्रमुखान् खलः ॥ ४५ ॥

वानरैः सह युद्धाय नोदयामास सत्वरः ।
ततो भेरीमृदङ्गाद्यैः पणवानकगोमुखैः ॥ ४६ ॥

महिषोष्ट्रैः खरैः सिंहैर्द्वीपिभिः कृतवाहनाः ।
खड्गशूलधनुःपाशयष्टितोमरशक्तिभिः ॥ ४७ ॥

लक्षिताः सर्वतो लङ्कां प्रतिद्वारमुपाययुः ।
तत्पूर्वमेव रामेण नोदिता वानरर्षभाः ॥ ४८ ॥

उद्यम्य गिरिशृङ्गाणि शिखराणि महान्ति च ।
तरूंश्चोत्पाट्य विविधान्युद्धाय हरियूथपाः ॥ ४९ ॥

प्रेक्षमाणा रावणस्य तान्यनीकानि भागशः ।
राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा ॥ ५० ॥

ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः ।
ततः सहस्रयूथाश्च कोटियूथाश्च यूथपाः ॥ ५१ ॥

कोटीशतयुताश्चान्ये रुरुधुर्नगरं भृशम् ।
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ ५२ ॥

रामो जयत्यतिबलो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणानुपालितः ॥ ५३ ॥

इत्येवं घोषयन्तश्च समं युयुधिरेऽरिभिः ।
हनूमानङ्गदश्चैव कुमुदो नील एव च ॥ ५४ ॥

नलश्च शरभश्चैव मैन्दो द्विविद एव च ।
जाम्बवान्दधिवक्त्रश्च केसरी तार एव च ॥ ५५ ॥

गद्दीवर बसलेल्या रावणाला पाहून, क्रोधाने क्षुब्ध झालेल्या रामांनीसुद्धा लक्ष्मणाने आणून दिलेले धनुष्य हातात घेतले. (४२)

मंत्र्यांनी सर्व बाजूंनी वेढलेला असा रावण मस्तकावर मुकुट धारण करून बसलेला होता. त्या वेळी अर्ध चंद्राप्रमाणे आकार आणि तेज असणाऱ्या एका बाणाने रामांनी अर्ध्या निमिषात हजारो शुभ्र छत्रे तसेच रावणाचे दहा किरीट तोडून टाकले. ते एखाद्या अद्‌भुत गोष्टीप्रमाणे झाले. (४३-४४)

तेव्हा लज्जित झालेला रावण चट्‌दिशी उठून स्वतःच्या महालात निघून गेला. त्यानंतर प्रहस्तादी सर्व राक्षसांना बोलावून, त्यांना त्या दुष्टाने वानरांबरोबर सत्वर युद्ध सुरू करण्याची आज्ञा केली. तेव्हा भेरी, मृदुंग, पणव, आनक, गोमुख इत्यादी वाद्यांच्या गजरात, रेडे, उंट, गाढवे, सिंह, वाघ, हत्ती इत्यादी वाहनांवर आरूढ होऊन, खड्‌ग, शूल, धनुष्य, पाश, सोटे, तोमर आणि शक्ती अशी आयुधे घेऊन, ते सर्व राक्षस सर्व बाजूंनी लंकेच्या प्रत्येक प्रवेशद्वाराजवळ गेले. तत्पूर्वीच श्रीरामांनी वानरश्रेष्ठांना युद्धाला निघण्याची आज्ञा दिली होती. (४५-४८)

त्यानुसार पर्वतांची शिखरे, मोठमोठे शिलाखंड, आणि नाना प्रकारचे वृक्ष उपटून घेऊन, ते वानर सेनापती युद्धासाठी निघाले होते. रावणाच्या अनेक तुकड्या तुकड्यांनी येणाऱ्या सैन्याला पाहून, रामांचे प्रिय कार्य करण्याच्या इच्छेने त्या वानरांनी लंकेवर चाल केली. (४९-५०)

काही वानरांनी हातात वृक्ष आणि पर्वत शिखरे घेतली होती. तर काहींनी मुठी वळवून ठेवल्या होत्या. त्यातील काही वानर हे हजार वानरांचा समूह, काही कोटी समूह, काही शतकोटी वानरांचा समूह यांचे सेनापती होते. वर- खाली उड्या मारीत व गर्जना करीत त्या वानरांनी सर्व लंका नगरीला संपूर्ण वेढा घातला. (५१-५२)

'अतिशय बलवान अशा रामांचा विजय असो; महाबलवान लक्ष्मणाचा विजय असो; आणि राघवाने रक्षिलेल्या सुग्रीवाचा विजय असो', अशा घोषणा करीत ते वानर शत्रूंबरोबर लढू लागले. हनुमान, अंगद, कुमुद, नील, नल, शरभ, मैंद, द्विविद, जांबवान, दधिमुख, केसरी, तार तसेच अन्य सर्व बलवान वानर आणि सेनापती यांनी लंकेच्या सर्व द्वारांवर उड्या

अन्ये च बलिनः सर्वे यूथपाश्च प्लवङ्गमाः ।
द्वाराण्युत्प्लुत्य लङ्कायाः सर्वतो रुरुधुर्भृशम् ।
तदा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः ॥ ५६ ॥

निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिताः ।
राक्षसाश्च तदा भीमा द्वारेभ्यः सर्वतो रुषा ॥ ५७ ॥

निर्गत्य भिन्दिपालैश्च खड्गैः शूलैः परश्वधैः ।
निजघ्नुर्वानरानीकं महाकाया महाबलाः ॥ ५८ ॥

राक्षसांश्च तथा जघ्नुर्वानरा जितकाशिनः ।
तदा बभूव समरो मांसशोणितकर्दमः ॥ ५९ ॥

रक्षसां वानराणां च सम्बभूवाद्भुतोपमः ।
ते हयैश्च गजैश्चैव रथैः काञ्चनसन्निभैः ॥ ६० ॥

रक्षोव्याघ्रा युयुधिरे नादयन्तो दिशो दश ।
राक्षसाश्च कपीन्द्राश्च परस्परजयैषिणः ॥ ६१ ॥

राक्षसान्वानरा जघ्नुर्वानरांश्चैव राक्षसाः ।
रामेण विष्णुना दृष्टा हरयो दिविजांशजाः ॥ ६२ ॥

बभूवुर्बलिनो हृष्टास्तदा पीतामृता इव ।
सीताभिमर्शपापेन रावणेनाभिपालिताः ॥ ६३ ॥

हतश्रीकान्हतबलान् राक्षसान् जघ्नुरोजसा ।
चतुर्थांशावशेषेण निहतं राक्षसं बलम् ॥ ६४ ॥

स्वसैन्यं निहतं दृष्ट्वा मेघनादोऽथ दुष्टधीः ।
ब्रह्मदत्तवरः श्रीमानन्तर्धानं गतोऽसुरः ॥ ६५ ॥

सर्वास्त्रकुशलो व्योम्नि ब्रह्मास्त्रेण समन्ततः ।
नानाविधानि शस्त्राणि वानरानीकमर्दयन् ॥ ६६ ॥

ववर्ष शरजालानि तदद्भुतमिवाभवत् ।
रामोऽपि मानयन्ब्राह्ममस्त्रमस्त्रविदां वरः ॥ ६७ ॥

क्षणं तूष्णीमुवासाथ ददर्श पतितं बलम् ।
वानराणां रघुश्रेष्ठश्चुकोपानलसन्निभः ॥ ६८ ॥

मारल्या. त्यांनी सर्व बाजूंनी लंकेला वेढून टाकले. त्या वेळी प्रचंड देहाच्या वानरांनी वृक्ष, पर्वतांची शिखरे, नखे आणि दात यांच्या द्वारा राक्षसांवर प्रहार करण्यास प्रारंभ केला. तेव्हा लंकेच्या सर्व दारांतून वेगाने बाहेर पडून भयंकर राक्षसांनी रागारागाने गोफणी, खड्ग, शूल,परशू यांचे द्वारा वानर सैन्यावर प्रहार केले. उलट प्रचंड शरीर असणाऱ्या, महाबलवान आणि जयशील वानरांनी राक्षसांवर हल्ला केला. अशा प्रकारे तेव्हा राक्षस आणि वानर यांच्यामध्ये ज्याला अद्‌भुत म्हणता येईल, असे युद्ध झाले आणि त्यात मांस आणि रक्त यांचा चिखल झाला. गर्जनांनी दाही दिशा निनादून टाकीत, ते राक्षस-श्रेष्ठ घोडे, हत्ती यांवर बसून आणि सोन्यासारख्या तेजस्वी रथांत बसून युद्ध करीत होते. त्यावेळी राक्षस तसेच वानरश्रेष्ठ हे परस्परांवर विजय मिळवू इच्छित होते. (५३-६१)

वानर राक्षसांना मारीत होते, तर राक्षस वानरांना मारीत होते. देवांच्या अंशापासून उत्पन्न झालेले ते वानर विष्णुरूपी रामांची दृष्टी पडल्याने अतिशय बलवान झाले होते आणि जणू अमृताचे पान केल्याप्रमाणे ते आनंदित झाले होते. सीतेचे हरण करताना तिला स्पर्श केल्यामुळे ज्याला पाप लागले होते, अशा रावणाकडून पालन केल्या गेलेल्या, निस्तेज आणि बलहीन झालेल्या राक्षसांना ते वानर आपल्या पराक्रमाने ठार करत होते. हळू हळू राक्षसांचे बहुतेक सैन्य नष्ट झाले; फक्त त्या सैन्याचा चौथा भाग शिल्लक राहिला. (६२-६४)

आपले सैन्य ठार केले जात आहे, हे पाहिल्यानंतर, ब्रह्मदेवांनी ज्याला वर दिला होता, जो वीरश्रीने संपन्न होता, असा मेघनाद नावाचा दुष्टबुद्धी राक्षस युद्धभूमीवरून अंतर्धान पावला. (६५)

तो सर्व प्रकारची अस्त्रे चालविण्यात कुशल होता. आकाशात जाऊन ब्रह्मास्त्राच्या द्वारा वानर सैन्याला पीडा देत, तो सर्व बाजूंनी नाना प्रकारची शस्त्रे आणि बाणांची जाळी यांचा वर्षाव करू लागला. ते एखाद्या अद्‌भुत गोष्टीप्रमाणे झाले. त्या वेळी अस्त्रवेत्त्यांमध्ये श्रेष्ठ असे श्रीरामसुद्धा ब्रह्मास्त्राला मान देण्यासाठी क्षणभर स्वस्थ राहिले. जेव्हा ब्रह्मास्त्रामुळे वानरांचे सैन्य मरत आहे हे रघुश्रेष्ठांनी पाहिले तेव्हा ते रागाने अग्नीप्रमाणे लाल झाले. (६६-६८)

चापमानय सौमित्रे ब्रह्मास्त्रेणासुरं क्षणात् ।
भस्मीकरोमि मे पश्य बलमद्य रघूत्तम ॥ ६९ ॥

मेघनादोऽपि तच्छ्रुत्वा रामवाक्यमतन्द्रितः ।
तूर्णं जगाम नगरं मायया मायिकोऽसुरः ॥ ७० ॥

पतितं वानरानीकं दृष्ट्वा रामोऽतिदुःखितः ।
उवाच मारुतिं शीघ्रं गत्वा क्षीरमहोदधिम् ॥ ७१ ॥

तत्र द्रोणगिरिर्नाम दिव्यौषधिसमुद्भवः ।
तमानय द्रुतं गत्वा सञ्जीवय महामते ॥ ७२ ॥

वानरौघान्महासत्त्वान्कीर्तिस्ते सुस्थिरा भवेत् ।
आज्ञा प्रमाणमित्युक्त्वा जगामानिलनन्दनः ॥ ७३ ॥

आनीय च गिरिं सर्वान्वानरान्वानर्षभः ।
जीवयित्वा पुनस्तत्र स्थापयित्वाययौ द्रुतम् ॥ ७४ ॥

पूर्ववद्भैरवं नादं वानराणां बलौघतः ।
श्रुत्वा विस्मयमापन्नो रावणो वाक्यमब्रवीत् ॥ ७५ ॥

राघवो मे महान् शत्रुः प्राप्तो देवविनिर्मितः ।
हन्तुं तं समरे शीघ्रं गछन्तु मम यूथपाः ॥ ७६ ॥

मन्त्रिणो बान्धवाः शूरा ये च मत्प्रियकाङ्क्षिणः ।
सर्वे गच्छन्तु युद्धाय त्वरितं मम शासनात् ॥ ७७ ॥

ये न गच्छन्ति युद्धाय भीरवः प्राणविप्लवात् ।
तान्हनिष्याम्यहं सर्वान्मच्छासनपराङ्मुखान् ॥ ७८ ॥

तच्छ्रुत्वा भयसन्त्रस्ता निर्जग्मू रणकोविदाः ।
अतिकायः प्रहस्तश्च महानादमहोदरौ ॥ ७९ ॥

देवशत्रुर्निकुम्भश्च देवान्तकनरान्तकौ ।
अपरे बलिनः सर्वे ययुर्युद्धाय वानरैः ॥ ८० ॥

ते म्हणाले, "हे लक्ष्मणा, माझे धनुष्य आण. माझ्या ब्रह्मास्त्राने मी या राक्षसाला क्षणात भस्मसात करून टाकतो. हे रघूत्तम लक्ष्मणा, तू आज माझे सामर्थ्य पाहा." (६९)

ते रामांचे वचन ऐकल्यावर, मेघनादसुद्धा सावध झाला आणि तो कपटी असुर मायेने चटदिशी लंका नगरीत निघून गेला. (७०)

वानरांचे सैन्य मरून पडलेले पाहून, अतिशय दुःखी होऊन, श्रीराम मारुतीला म्हणाले, "तू त्वरित क्षीरसागराकडे जा. तेथे अनेक दिव्य औषधी ज्याच्यावर उत्पन्न झाल्या आहेत असा द्रोणगिरी नावाचा पर्वत आहे. पटकन जाऊन तो पर्वत तू घेऊन ये आणि हे महाबुद्धिमंता, या महासामर्थ्यसंपन्न वानरसमूहांना तू जिवंत कर. असे केल्याने तुझी कीर्ती कायमची राहील." "तुमची आज्ञा प्रमाण." असे बोलून वायुपुत्र मारुती तेथून निघून गेला. (७१-७३)

द्रोणगिरी पर्वत आणून, सर्व वानरांना जिवंत करून, पुनः पूर्ववत तो पर्वत जागच्या जागी ठेवून, वानरश्रेष्ठ मारुती त्वरेने परत आला. (७४)

पुनः पूर्वीप्रमाणेच वानरांच्या सैन्यसमूहातून येऊ लागलेला भयानक नाद ऐकून, विस्मयचकित झालेला रावण म्हणाला, (७५)

"देवांनी निर्माण केलेला माझा मोठा शत्रू, राघव येथे आला आहे. त्याला युद्धात ठार करण्यास माझ्या सेनापतींनी शीघ्र कूच करावे. (७६)

तसेच जे कोणी माझे मंत्री, बांधव असतील, आणि जे कोणी माझे प्रिय करू इच्छिणारे शूरवीर असतील, त्या सर्वांनी माझी आज्ञा मान्य करून युद्ध करण्यास त्वरित जावे. (७७)

जे कोणी भित्रे राक्षस भीतीने युद्ध करण्यास जाणार नाहीत, त्या माझी आज्ञा मोडणाऱ्या सर्वांना मी ठार करीन." (७८)

ते रावणाचे वचन ऐकल्यावर, भीतीने त्रस्त झालेले, युद्धनिपुण राक्षस युद्ध करण्यास बाहेर पडले. अतिकाय, प्रहस्त, महानाद, महोदर, देवशत्रू, निकुंभ, देवांतक व नरांतक तसेच अन्य सर्व बलवान राक्षस वानरांबरोबर युद्ध करण्यास निघाले. (७९-८०)

एते चान्ये च बहवः शूराः शतसहस्रशः ।
प्रविश्य वानरं सैन्यं ममन्थुर्बलदर्पिताः ॥ ८१ ॥

भुशुण्डीभिन्दिपालैश्च बाणैः खड्गैः परश्वधैः ।
अन्यैश्च विविधैरस्त्रैर्निजघ्नुर्हरियूथपान् ॥ ८२ ॥

ते पादपैः पर्वताग्रैर्नखदंष्ट्रैश्च मुष्टिभिः ।
राणैर्विमोचयामासुः सर्वराक्षसयूथपान् ॥ ८३ ॥

रामेण निहताः केचित्सुग्रीवेण तथापरे ।
हनूमता चाङ्गदेन लक्ष्मणेन महात्मना ।
यूथपैर्वानराणां ते निहताः सर्वराक्षसाः ॥ ८४ ॥

रामतेजः समाविश्य वानरा बलिनोऽभवन् ।
निर्मशक्तिविहीनानामेवं शक्तिः कुतो भवेत् ॥ ८५ ॥

सर्वेश्वरः सर्वमयो विधाता
मायामनुष्यत्वविडम्बनेन ।
सदा चिदानन्दमयोऽपि रामो
युद्धादिलीलां वितनोति मायाम् ॥ ८६ ॥

हे राक्षस तसेच इतर पुष्कळ शूर आणि बलाने उन्मत्त झालेले शेकडो- हजारो राक्षस वानर-सैन्यात घुसून वानरांचा नाश करू लागले. (८१)

भुशुंडी, गोफणी, बाण, खड्गे, परशू, तसेच अन्य विविध अस्त्रे यांच्या द्वारा वानर-सेनापतींना ते मारू लागले. (८२)

तर वृक्ष, पर्वत शिखरे, नखे, दात, बुक्क्या यांच्या द्वारा ते वानर सर्व राक्षस नायकांना ठार करू लागले. (८३)

काही राक्षसांना रामांनी ठार केले. काहींना सुग्रीवाने मारून टाकले, तर इतर राक्षसांना हनुमान, अंगद आणि महात्मा लक्ष्मण यांनी ठार केले. इतर काही राक्षसांना वानरसेनापतींनी ठार केले. अशा प्रकारे ते सर्व राक्षस मारले गेले. (८४)

रामांचे तेज अंगात भरल्याने ते वानर अतिशय बलिष्ठ झाले होते. रामाच्या शक्तीने रहित असणाऱ्या प्राण्यांच्या ठिकाणी असली शक्ती कोठून बरे असणार? (८५)

जरी राम हे सदा सर्वांचा ईश्वर, सर्वमय, सर्वांचे विधाते आणि नेहमी चिदानंदमय आहेत, तरीसुद्धा मायेमुळे मनुष्याप्रमाणे आचरण करीत, आपली युद्ध इत्यादी लीला करीत ते आपल्या मायेचा विस्तार करीत असतात. (८६)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे पंचमः सर्गः ॥ ५ ॥

षष्ठ सर्ग

लक्ष्मणाची मूर्च्छा, राम-रावण-युद्ध, हनुमंताने औषधी आणणे आणि रावण-कालनेमि-संवाद

श्रीमहादेव उवाच

दृष्ट्वा युद्धे बलं नष्टमतिकायमुखं महत् ।
रावणो दुःखसन्तप्तः क्रोधेन महतावृतः ॥ १ ॥

प्रायेन्द्रजितं लङ्कारक्षणार्थं महाद्युतिः ।
ययौ जगाम युद्धाय रामेण सह राक्षसः ॥ २ ॥

सर्वं स्यन्दनमारुह्य सर्वशस्त्रास्त्रसंयुतम् ।
तमेवाभिदुद्राव राक्षसेन्द्रो महाबलः ॥ ३ ॥

श्रीमहादेव म्हणाले– हे पार्वती, अतिकायादिकांचे आपले मोठे सैन्य युद्धात नष्ट झाले आहे, हे ऐकल्यावर, रावण दुःखाने संतप्त झाला आणि अतिशय क्रुद्ध झाला. (१)

मग लंकेच्या रक्षणासाठी इंद्रजिताला ठेवून, तो महातेजस्वी रावण रामांबरोबर युद्ध करण्यास स्वतःच निघाला. (२)

सर्व शस्त्रे आणि अस्त्रे यांनी सुसज्ज केलेल्या एका दिव्य रथावर आरूढ होऊन, महाबळी राक्षसराज रावण रामांवरच चाल करून गेला. (३)

वानरान्बहुशो हत्वा बाणैराशीविषोपमैः ।
पातयामास सुग्रीवप्रमुखान्यूथनायकान् ॥ ४ ॥

गदापाणिं महासत्त्वं तत्र दृष्ट्वा बिभीषणम् ।
उत्ससर्ज महाशक्तिं मयदत्तां बिभीषणे ॥ ५ ॥

तामापतन्तीमालोक्य बिभीषणविघातिनीम् ।
दत्ताऽभयोऽयं रामेण वधार्हो नायमासुरः ॥ ६ ॥

इत्युक्त्वा लक्ष्मणो भीमं चापमादाय वीर्यवान् ।
बिभीषणस्य पुरतः स्थितोऽकम्प इवाचलः ॥ ७ ॥

सा शक्तिर्लक्ष्मणतनुं विवेशामोघशक्तितः ।
यावन्त्यः शक्तयो लोके मायायाः सम्भवन्ति हि ॥ ८ ॥

तासामाधारभूतस्य लक्ष्मणस्य महात्मनः ।
मायाशक्त्या भवेत्किं वा शेषांशस्य हरेस्तनोः ॥ ९ ॥

तथापि मानुषं भावमापन्नस्तदनुव्रतः ।
मूर्च्छितः पतितो भूमौ तमादातुं दशाननः ॥ १० ॥

हस्तैस्तोलयितुं शक्तो न बभूवातिविस्मितः ।
सर्वस्य जगतः सारं विराजं परमेश्वरम् ॥ ११ ॥

कथं लोकाश्रयं विष्णुं तोलयेल्लघुराक्षसः ।
ग्रहीतुकामं सौमित्रिं रावणं वीक्ष्य मारुतिः ॥ १२ ॥

आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ।
तेन मुष्टिप्रहारेण जानुभ्यामपतद्भुवि ॥ १३ ॥

आस्यैश्च नेत्रश्रवणैरुद्वमन् रुधिरं बहु ।
विघूर्णमाननयनो रथोपस्थ उपाविशत् ॥ १४ ॥

अथ लक्ष्मणमादाय हनुमान् रावणार्दितम् ।
आनयद्रामसामीप्यं बाहुभ्यां परिगृह्य तम् ॥ १५ ॥

हनूमतः सुहृत्त्वेन भक्त्या च परमेश्वरः ।
लघुत्वमगमद्देवो गुरूणां गुरुरप्यजः ॥ १६ ॥

सर्पाप्रमाणे असणाऱ्या बाणांनी पुष्कळ वानरांना मारून, रावणाने सुग्रीवादी सेनानायकांना जमिनीवर पाडले. (४)

तेथे हातात गदा घेतलेल्या महापराक्रमी बिभीषणाला पाहून, रावणाने मय राक्षसाने दिलेली महाशक्ती बिभीषणावर सोडली. (५)

बिभीषणाचा नाश करण्यास पुढे पुढे येणारी ती शक्ती पाहिल्यावर, 'त्याला रामांनी अभय दिले आहे. हा बिभीषण वध होण्यास योग्य नाही,' असे म्हणून महावीर्यशाली लक्ष्मण आपले भयंकर धनुष्य घेऊन, बिभीषणाच्या पुढे एखाद्या पर्वताप्रमाणे स्थिर उभा राहिला. (६-७)

अमोघ सामर्थ्य असल्यामुळे ती महाशक्ती लक्ष्मणाच्या शरीरात घुसली. या जगात मायेपासून उत्पन्न झालेल्या जितक्या शक्ती आहेत, त्या सर्वांचा आधारभूत विष्णू आहे; आणि शेषाचा अंशावतार असणारा महात्मा लक्ष्मण हा तर विष्णुस्वरूपच होता; त्यामुळे त्या मायाशक्तीचे लक्ष्मणापुढे काय चालणार? (८-९)

तथापि या वेळी मनुष्य-भावाचा अंगीकार करून लक्ष्मण मनुष्य स्वरूपास अनुसरून वागला आणि म्हणून तो मूर्च्छित होऊन जमिनीवर पडला. तेव्हा पकडण्यासाठी गेलेला रावण त्याला आपल्या हातांनी उचलू शकला नाही. त्याला अतिशय विस्मय वाटला. सर्व जगाचे सार, लोकांचा आधार, विराट, परमेश्वर अशा विष्णूला एक फडतूस राक्षस कसा बरे उचलू शकेल? सुमित्रा-पुत्र लक्ष्मणाला घेऊन जाऊ इच्छिणाऱ्या रावणाला पाहून, क्रुद्ध झालेल्या मारुतीने वज्राप्रमाणे कठीण असणाऱ्या आपल्या मुष्टीने त्याच्या छातीवर प्रहार केला. त्या मुष्टीच्या प्रहाराने रावण गुडघ्यावर खाली जमिनीवर आदळला. (१०-१३)

आणि आपली तोंडे, डोळे आणि कान यांतून पुष्कळ रक्त ओकत आणि गरागरा डोळे फिरवीत तो आपल्या रथाच्या मागील भागात जाऊन बसला. (१४)

त्यानंतर रावणाकडून घायाळ झालेल्या लक्ष्मणाला आपल्या दोन बाहूंनी उचलून घेऊन, हनुमंताने रामांजवळ आणले. (१५)

जन्मरहित, प्रकाशरूप असा परमेश्वर हा जरी जड पदार्थांपेक्षा अधिक जड होता, तरी तो हनुमंताच्या प्रेमामुळे व भक्तीमुळे अगदी हलका झाला होता. (१६)

पा शक्तिरपि तं त्यक्त्वा ज्ञात्वा नारायणांशजम् ।
ावणस्य रथं प्रागाद्रावणोऽपि शनैस्ततः ॥ १७ ॥

संज्ञामवाप्य जग्राह बाणासनमथो रुषा ।
ाममेवाभिदुद्राव दृष्ट्वा रामोऽपि तं क्रुधा ॥ १८ ॥

आरुह्य जगतां नाथो हनूमन्तं महाबलम् ।
थस्थं रावणं दृष्ट्वा अभिदुद्राव राघवः ॥ १९ ॥

ज्याशब्दमकरोत्तीव्रं वज्रनिष्पेषनिष्ठुरम् ।
ामो गम्भीरया वाचा राक्षसेन्द्रमुवाच ह ॥ २० ॥

राक्षसाधम तिष्ठाद्य क्व गमिष्यसि मे पुरः ।
कृत्वापराधमेवं मे सर्वत्र समदर्शिनः ॥२१ ॥

प्रेन बाणेन निहता राक्षसास्ते जनालये ।
नैव त्वां हनिष्यामि तिष्ठाद्य मम गोचरे ॥ २२ ॥

श्रीरामस्य वचः श्रुत्वा रावणो मारुतात्मजम् ।
वहन्तं राघवं सङ्ख्ये शरैस्तीक्ष्णैरताडयत् ॥ २३ ॥

ैतस्यापि शरैस्तीक्ष्णैर्वायुसूनोः स्वतेजसा ।
त्यवर्धत पुनस्तेजो ननर्द च महाकपिः ॥ २४ ॥

ततो दृष्ट्वा हनूमन्तं सव्रणं रघुसत्तमः ।
क्रोधमाहारयामास कालरुद्र इवापरः ॥ २५ ॥

पार्श्वं रथं ध्वजं सूतं शस्त्रौघं धनुरञ्जसा ।
छत्रं पताकां तरसा चिच्छेद शितसायकैः ॥ २६ ॥

ततो महाशरेणाशु रावणं रघुसत्तमः ।
वेव्याध वज्रकल्पेन पाकारिरिव पर्वतम् ॥ २७ ॥

रामबाणहतो वीरश्चचाल च मुमोह च ।
स्तान्निपतितश्चापस्तं समीक्ष्य रघूत्तमः ॥ २८ ॥

लक्ष्मण नारायणाचा अंश म्हणून उत्पन्न झाला आहे हे जाणून, आणि मग त्याला सोडून देऊन, ती शक्ती रावणाच्या रथाकडे परत गेली. त्यानंतर इकडे रावणसुद्धा हळूहळू शुद्धीवर आला. लगेच त्याने रागाने धनुष्य घेतले आणि पुनः रामांवरच चाल केली. त्याला पाहून रामसुद्धा क्रुद्ध झाले. मग रथात बसून येणाऱ्या रावणाला पाहून, जगाचा नाथ असलेले राघव महाबळी हनुमंताच्या खांद्यावर चढून रावणाकडे धावले. (१७-१९)

वज्रालासुद्धा चूर्ण करू शकेल असा आपल्या प्रत्यंचेचा अतिशय तीव्र आणि कठोर शब्द रामांनी केला. आणि मग गंभीर वाणीने राम राक्षसराज रावणाला म्हणाले. (२०)

"अरे अधम राक्षसा, थांब.सर्वत्र समदर्शी असणाऱ्या माझा अशा प्रकारे अपराध करून, आता तू माझ्या समोरून कुठे बरे जाऊ शकशील ? (२१)

आता तू असाच माझ्यापुढे उभा राहा. जनस्थानात ज्या बाणाने मी तुझ्या त्या खर इत्यादी राक्षसांना ठार केले होते, त्याच बाणाने आज मी तुला ठार करणार आहे. (२२)

श्रीरामांचे वचन ऐकल्यावर, राघवांना खांद्यावरून वाहून नेणाऱ्या मारुतीवर रावणाने तीक्ष्ण बाणांनी प्रहार केले . (२३)

त्या तीक्ष्ण बाणांचे प्रहार झाले तरी वायुसुत मारुतीचे तेज रामांच्या तेजामुळे पुन्हा वाढतच गेले आणि तो महान वानर गर्जना करू लागला. (२४)

त्यानंतर जखमी झालेल्या हनुमंताला पाहिल्यावर, दुसऱ्या कालरुद्राप्रमाणे दिसणाऱ्या रघुश्रेष्ठ रामांना भयंकर क्रोध आला. (२५)

आणि आपल्या तीक्ष्ण बाणांनी रामांनी सहजपणे रावणाचे घोड्यांसह रथ, ध्वज, सारथी, शस्त्रसमूह, धनुष्य, छत्र आणि पताका हे सर्व तोडून टाकले. (२६)

नंतर इंद्राने ज्या प्रमाणे आपल्या वज्राने पर्वतांना विद्ध केले होते, त्याप्रमाणे रघुश्रेष्ठ रामांनी वज्राप्रमाणे असणाऱ्या एका महान बाणाने रावणाला त्वरित विद्ध केले . (२७)

रामांच्या बाणाने घायाळ झालेला तो वीर रावण कापू लागला, त्याला मूर्च्छा आली आणि त्याच्या हातातून धनुष्य गळून पडले. तेव्हा त्या स्थितीतील रावणाला पाहून रघूत्तमांनी एका अर्धचंद्राकार बाणाने त्याचा सूर्याप्रमाणे

अर्धचन्द्रेण चिच्छेद तत्किरीटं रविप्रभम् ।
अनुजानामि गच्छ त्वमिदानीं बाणपीडितः ॥ २९ ॥

प्रविश्य लङ्कामाश्वास्य श्वः पश्यसि बलं मम ।
रामबाणेन संविद्धो हतदर्पोऽथ रावणः ॥ ३० ॥

महत्या लज्जया युक्तो लङ्कां प्राविशदातुरः ।
रामोऽपि लक्ष्मणं दृष्ट्वा मूर्च्छितं पतितं भुवि ॥ ३१ ॥

मानुषत्वमुपाश्रित्य लीलयानुशुशोच ह ।
ततः प्राह हनूमन्तं वत्स जीवय लक्ष्मणम् ॥ ३२ ॥

महौषधीः समानीय पूर्ववद्वानरानपि ।
तथेति राघवेणोक्तो जगामाशु महाकपिः ॥ ३३ ॥

हनूमान्वायुवेगेन क्षणात्तीर्त्वा महोदधिम् ।
एतस्मिन्नन्तरे चारा रावणाय न्यवेदयन् ॥ ३४ ॥

रामेण प्रेषितो देव हनूमान् क्षीरसागरम् ।
गतो नेतुं लक्ष्मणस्य जीवनार्थं महौषधीः ॥ ३५ ॥

श्रुत्वा तच्चारवचनं राजा चिन्तापरोऽभवत् ।
जगाम रात्रावेकाकी कालनेमिगृहं क्षणात् ॥ ३६ ॥

गृहागतं समालोक्य रावणं विस्मयान्वितः ।
कालनेमिरुवाचेदं प्राञ्जलिर्भयविह्वलः ।
अर्घ्यादिकं ततः कृत्वा रावणस्याग्रतः स्थितः ॥ ३७ ॥

किं ते करोमि राजेन्द्र किमागमनकारणम् ।
कालनेमिमुवाचेदं रावणो दुःखपीडितः ॥ ३८ ॥

ममापि कालवशतः कष्टमेतदुपस्थितम् ।
मया शक्त्या हतो वीरो लक्ष्मणः पतितो भुवि ॥ ३९ ॥

तं जीवयितुमानेतुमोषधीर्हनुमान् गतः ।
यथा तस्य भवेद्विघ्नस्तथा कुरु महामते ॥ ४० ॥

तेजस्वी असणारा मुकुट तोडून टाकला व म्हटले "हे रावणा, तू आता माझ्या बाणाने घायाळ झाला आहेस. तेव्हा तू आता परत जा. माझी तुला अनुज्ञा आहे. (२८-२९)

लंकेत प्रवेश करून विश्रांती घे. मग उद्या तू पुनः माझे सामर्थ्य पाहाशील." त्यानंतर रामांच्या बाणाने विद्ध झालेला, ताठा नष्ट होऊन, व्याकूळ झालेला, रावण अतिशय लज्जित होऊन लंकेत आला. इकडे मूर्च्छित होऊन पडलेल्या लक्ष्मणाला पाहून, रामसुद्धा मनुष्य-स्वभावाचा आश्रय घेऊन लीलेने शोक करू लागले. त्यानंतर ते हनूमंताला म्हणाले, "वत्सा, पूर्वीप्रमाणेच (द्रोणगिरी पर्वतावरून) महौषधी आणून या लक्ष्मणाला तसेच अन्य वानरांनासुद्धा तू जिवंत कर." राघवांचे वचनानंतर 'ठीक आहे', असे म्हणून एका क्षणात महासागर ओलांडून हनुमान वायुवेगाने निघून गेला. दरम्यानच्या काळात, गुप्तहेरांनी रावणाला सांगितले की, (३०-३४)

"महाराज, लक्ष्मणाला जिवंत करण्यास महौषधी आणण्यासाठी रामांनी पाठविलेला हनुमान क्षीरसमुद्राकडे गेला आहे." (३५)

ते गुप्तहेरांचे वचन ऐकल्यावर, राजा रावण अतिशय चिंतातुर झाला. मग त्याच रात्री एका क्षणात तो एकटाच कालनेमीच्या घरी गेला. (३६)

आपल्या घरी आलेल्या रावणाला पाहून कालनेमी आश्चर्यचकित झाला. मग त्याला अर्घ्य इत्यादी देऊन, रावणाच्यापुढे हात जोडून उभे राहून, भयाने विव्हळ झालेला कालनेमी म्हणाला. (३७)

"हे राजेंद्रा, तुमच्या आगमनाचे कारण काय ? मी तुमची काय सेवा करू ?" तेव्हा दुःखी झालेला रावण कालनेमीला म्हणाला, (३८)

कालवशेकरून माझ्यावरसुद्धा संकट कोसळले आहे. माझ्या शक्तीचा प्रहार झालेला तो वीर लक्ष्मण जमिनीवर पडलेला आहे. (३९)

आता त्याला जिवंत करण्यासाठी म्हणून औषधी आणण्यास हनुमान गेला आहे. तेव्हा हे महाबुद्धिमंता, असे काही तरी करा की ज्यामुळे त्याच्या कार्यात विघ्न येईल. (४०)

मायया मुनिवेषेण मोहयस्व महाकपिम् ।
कालात्ययो यथा भूयात्तथा कृत्वैहि मन्दिरे ॥ ४१ ॥

कपटाने मुनीचा वेष धारण करून त्या महावानराला तू मोहित कर. ज्यामुळे औषधीच्या प्रयोगाचा काळ निघून जाईल, असे काही तरी करून तू मग परत ये." (४१)

रावणस्य वचः श्रुत्वा कालनेमिरुवाच तम् ।
रावणेश वचो मेऽद्य शृणु धारय तत्त्वतः ॥ ४२ ॥

रावणाचे वचन ऐकून कालनेमी त्याला म्हणाला, "हे रावण महाराज, आता तुम्ही माझे वचन ऐका आणि ते खरे आहे असे समजून ध्यानी घ्या. (४२)

प्रियं ते करवाण्येव न प्राणान् धारयाम्यहम् ।
मारीचस्य यथारण्ये पुराभून्मृगरूपिणः ॥ ४३ ॥

मी तुमचे प्रिय करीनच. त्यासाठी मी माझ्या प्राणांचीसुद्धा पर्वा करणार नाही. पण त्यामुळे काय होणार? हे रावणा, पूर्वी दंडकारण्यात मृगाचे रूप धारण केलेल्या मारीचाची जशी अवस्था झाली होती, तशीच माझीसुद्धा अवस्था होणार यात संशय नाही. आणखी असे पाहा. तुमचे पुत्र, पौत्र, बांधव आणि अन्य राक्षस आत्तापर्यंत मारले गेले आहेत. (४३-४४)

तथैव मे न सन्देहो भविष्यति दशानन ।
हताः पुत्राश्च पौत्राश्च बान्धवा राक्षसाश्च ते ॥ ४४ ॥

घातयित्वासुरकुलं जीवितेनापि किं तव ।
राज्येन वा सीतया वा किं देहेन जडात्मना ॥ ४५ ॥

अशा प्रकारे राक्षसांच्या कुळाचा नाश करवून, तुमच्या जगण्याचा काय उपयोग आहे ? किंवा राज्य, सीता अथवा जडस्वरूप देह यांचा तुम्हांला काय उपयोग होणार आहे? (४५)

सीतां प्रयच्छ रामाय राज्यं देहि बिभीषणे ।
वनं याहि महाबाहो रम्यं मुनिगणाश्रयम् ॥ ४६ ॥

त्यापेक्षा हे महाबाहो, सीता श्रीरामांना परत देऊन टाका. बिभीषणाला राज्य द्या. मुनि-समूहांचा आश्रय असणाऱ्या रम्य अशा तपोवनात तुम्ही जा. (४६)

स्नात्वा प्रातःशुभजले कृत्वा सन्ध्यादिकाःक्रियाः ।
तत एकान्तमाश्रित्य सुखासनपरिग्रहः ॥ ४७ ॥

तेथे प्रातःकाळी निर्मल पाण्यात स्नान करून, संध्या इत्यादी नित्य कर्मे करून, नंतर एकांत स्थानी तुम्ही सुखासनावर बसा. सर्व प्रकारे आसक्ती सोडून, अन्य विषयांना मनात प्रवेश न देता बाहेरच ठेवून, बाहेर प्रवृत्त होणाऱ्या इंद्रियांच्या समूहाला तुम्ही हळूहळू आत वळवून घ्या. (४७- ४८)

विसृज्य सर्वतः सङ्गमितरान्विषयान्बहिः ।
बहिःप्रवृत्ताक्षगणं शनैः प्रत्यक् प्रवाहय ॥ ४८ ॥

प्रकृतेर्भिन्नमात्मानं विचारय सदानघ ।
चराचरं जगत्कृत्स्नं देहबुद्धीन्द्रियादिकम् ॥ ४९ ॥

हे निष्पाप रावणा, प्रकृतीपेक्षा आत्मा भिन्न आहे, असा नेहमी विचार करा. ब्रह्मदेवांपासून ते सूक्ष्म कीटकापर्यंत देह, बुद्धी, इंद्रिये इत्यादी सर्व स्थावर जंगमात्मक असे जे जग पाहिले जाते व ऐकले जाते, त्या सर्वाला प्रकृती असे म्हटले जाते आणि त्या प्रकृतीलाच माया असेही म्हटले जाते. (४९-५०)

आब्रह्मस्तम्बपर्यन्तं दृश्यते श्रूयते च यत् ।
सैषा प्रकृतिरित्युक्ता सैव मायेति कीर्तिता ॥ ५० ॥

सर्गस्थितिविनाशानां जगद्वृक्षस्य कारणम् ।
लोहितश्वेतकृष्णादिप्रजाः सृजति सर्वदा ॥ ५१ ॥

जगरूपी वृक्षाची उत्पत्ती, स्थिती आणि विनाश यांचे कारण असणारी ही प्रकृती सात्त्विक, राजस,तामस इत्यादी प्रकारची प्रजा नेहमी उत्पन्न करते. (५१)

कामक्रोधादिपुत्राद्यान्हिंसातृष्णादिकन्यकाः ।
मोहयत्यनिशं देवमात्मानं स्वैर्गुणैर्विभुम् ॥ ५२ ॥

तसेच ती काम, क्रोध इत्यादी पुत्र आणि हिंसा, तृष्णा इत्यादी कन्या निर्माण करते आणि ती माया स्वतःच्या गुणांनी सर्वव्यापक अशा आत्मदेवाला रात्रंदिवस मोहित करते. (५२)

भजस्व रामं परिपूर्णमेकं
विहाय वैरं निजभक्तियुक्तः ।
हृदा सदा भावितभावरूप-
मनामरूपं पुरुषं पुराणम् ॥ ६३ ॥

तुम्ही रामांबरोबरचे वैर सोडून द्या आणि त्यांच्यावरील स्वतःच्या भक्तीने युक्त व्हा. मग परिपूर्ण, अद्वितीय, नामरूपरहित, पुराण पुरुष अशा त्या रामांच्या सगुण रूपाची आपल्या हृदयात भावना करून त्यांना भजत राहा." (६३)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तम सर्ग

कालनेमीचे कपट, हनुमानाकडून त्याचा वध, लक्ष्मण जिवंत होणे आणि रावणाने कुंभकर्णास जागे करणे

श्रीमहादेव उवाच

कालनेमिवचः श्रुत्वा रावणोऽमृतसन्निभम् ।
तज्वाल क्रोधताम्राक्षः सर्पिरद्धिरिवाग्निमत् ॥ १ ॥

मेहन्मि त्वां दुरात्मानं मच्छासनपराङ्मुखम् ।
रैः किञ्चिद्गृहीत्वा त्वं भाषसे रामकिंकरः ॥ २ ॥

कालनेमिरुवाचेदं रावणं देव किं क्रुधा ।
न रोचते मे वचनं यदि गत्वा करोमि तत् ॥ ३ ॥

त्युक्त्वा प्रययौ शीघ्रं कालनेमिर्महासुरः ।
ोदितो रावणेनैव हनूमद्विघ्नकारणात् ॥ ४ ॥

र गत्वा हिमवत्पार्श्वं तपोवनमकल्पयत् ।
त्र शिष्यैः परिवृतो मुनिवेषधरः खलः ॥ ५ ॥

च्छतो मार्गमासाद्य वायुसूनोर्महात्मनः ।
तो गत्वा ददर्शाथ हनूमानाश्रमं शुभम् ॥ ६ ॥

चन्तयामास मनसा श्रीमान्पवननन्दनः ।
रा न दृष्टमेतन्मे मुनिमण्डलमुत्तमम् ॥ ७ ॥

ार्गो विभ्रंशितो वा मे भ्रमो वा चित्तसम्भवः ।
द्याविश्याश्रमपदं दृष्ट्वा मुनिमशेषतः ॥ ८ ॥

श्रीमहादेव म्हणाले – हे पार्वती, तापलेल्या तुपात पाणी पडल्यास जसे तडतडते, त्याप्रमाणे कालनेमीचे अमृततुल्य वचन ऐकल्यावर, रागाने डोळे लाल झालेला रावण जळफळू लागला. (१)

(तो म्हणाला,) "माझ्या आज्ञेच्या विरुद्ध वागणाऱ्या, दुष्टात्म्या, तुला मी आत्ताच ठार करीन. मला वाटते की शत्रूकडून काही तरी लाच घेऊन, रामाचा सेवक होऊन, तू अशा प्रकारे बोलत आहेस." (२)

तेव्हा कालनेमी रावणाला म्हणाला, "महाराज, रागावून काय उपयोग आहे ? जर तुम्हांला माझे वचन आवडले नसेल तर मी जाऊन, तुम्ही सांगाल ते करीन."(३)

असे सांगून, रावणाने पाठवलेला तो महासुर कालनेमी हनुमानाच्या कार्यात विघ्न आणण्याच्या हेतूने त्वरित तेथून निघाला. (४)

हिमालय पर्वताच्या एका बाजूवर जाऊन वायुपुत्र महात्म्या हनुमानाचा जाण्याचा मार्ग लक्षात घेऊन, त्याच्या वाटेत त्याने एक तपोवन तयार केले आणि तो दुष्ट राक्षस मुनीचा वेष धारण करून तेथे बसला. सभोवती शिष्य होते. तेथून जात असताना वाटेत हनुमानाला तो सुंदर आश्रम दिसून आला. (५-६)

श्रीमान पवनसुत हनुमान मनात विचार करू लागला- 'हे उत्तम असे आश्रमस्थान मला पूर्वी दिसले नव्हते. (७)

माझा मार्ग चुकला की काय ? की माझ्या मनांत काही भ्रम निर्माण झाला आहे ? हे कळत नाही. या आश्रमस्थानात प्रवेश करून, मुनींचे दर्शन घेऊन, आणि

पीत्वा जलं ततो यामि द्रोणाचलमनुत्तमम् ।
इत्युक्त्वा प्रविवेशाथ सर्वतो योजनायतम् ॥ ९ ॥

आश्रमं कदलीशालखर्जूरपनसादिभिः ।
समावृतं पक्वफलैर्नम्रशाखैश्च पादपैः ॥ १० ॥

वैरभावविनिर्मुक्तं शुद्धं निर्मललक्षणम् ।
तस्मिन्महाश्रमे रम्ये कालनेमिः स राक्षसः ॥ ११ ॥

इन्द्रयोगं समास्थाय चकार शिवपूजनम् ।
हनूमानभिवाद्याह गौरवेण महासुरम् ॥ १२ ॥

भगवन् रामदूतोऽहं हनूमान्नाम नामतः ।
रामकार्येण महता क्षीराब्धिं गन्तुमुद्यतः ॥ १३ ॥

तृषा मां बाधते ब्रह्मन्नुदकं कुत्र विद्यते ।
यथेच्छं पातुमिच्छामि कथ्यतां मे मुनीश्वर ॥ १४ ॥

तच्छ्रुत्वा मारुतेर्वाक्यं कालनेमिस्तमब्रवीत् ।
कमण्डलुगतं तोयं मम त्वं पातुमर्हसि ॥ १५ ॥

भुङ्क्ष्व चेमानि पक्वानि फलानि तदनन्तरम् ।
निवसस्व सुखेनात्र निद्रामेहि त्वरास्तु मा ॥ १६ ॥

भूतं भव्यं भविष्यं च जानामि तपसा स्वयम् ।
उत्थितो लक्ष्मणः सर्वे वानरा रामवीक्षिताः ॥ १७ ॥

तच्छ्रुत्वा हनुमानाह कमण्डलुजलेन मे ।
न शाम्यत्यधिका तृष्णा ततो दर्शय मे जलम् ॥ १८ ॥

तथेत्याज्ञापयामास बटुं मायाविकल्पितम् ।
बटो दर्शय विस्तीर्णं वायुसूनोर्जलाशयम् ॥ १९ ॥

निमील्य चाक्षिणी तोयं पीत्वागच्छ ममान्तिकम् ।
उपदेक्ष्यामि ते मन्त्रं येन द्रक्ष्यसि चौषधीः ॥ २० ॥

पाणी पिऊन मग मी अतिशय उत्तम अशा द्रोण पर्वताकडे जाईन.' असा विचार करून त्याने त्या आश्रमात प्रवेश केला. तो आश्रम लांबी रुंदीच्या सर्व बाजूंनी एक योजन विस्तृत होता. केळी, सागवान, खजूर, फणस इत्यादी पिकलेल्या फळांनी ज्यांच्या फांद्या वाकलेल्या होत्या, अशा वृक्षांनी तो संपन्न होता. (८-१०)

तो आश्रम वैर-भावनेने रहित असून पवित्र व निर्मळ होता. त्या रम्य अशा मोठ्या आश्रमात तो कालनेमि राक्षस इंद्रजाल विद्येचा आश्रय घेऊन शिवाचे पूजन करीत होता. हनुमानाने त्या महाराक्षसाला आदरपूर्वक वंदन केले आणि म्हटले. (११-१२)

" हे भगवन, हनुमान नावाचा मी रामांचा दूत आहे. रामांचे एक महान कार्य करण्यास मी क्षीरसागराकडे जाण्यास निघालो आहे. (१३)

हे ब्रह्मन्, तहानेने मी व्याकूळ झालो आहे. यथेच्छ पाणी पिण्याची माझी इच्छा आहे. हे मुनीश्वरा, मला सांग की पाणी कुठे आहे ?" (१४)

मारुतीचे हे वाक्य ऐकल्यावर कालनेमी त्याला म्हणाला, "माझ्या कमंडलूतील पाणी पिण्यास हरकत नाही. (१५)

त्यानंतर ही पिकलेली फळे तू खा. येथे सुखाने राहा. थोडीशी झोप घे. फार घाई करू नकोस. (१६)

माझ्या स्वतःच्या तपोबलाने मी भूत, वर्तमान आणि भविष्य सर्व काही जाणतो आणि आता मला कळले आहे की लक्ष्मण हा सावध होऊन उठला आहे आणि रामाच्या दृष्टिक्षेपामुळे सर्व वानरही जिवंत झाले आहेत." (१७)

ते ऐकून हनुमान म्हणाला, "मला फार तहान लागली आहे. ती कमंडलूतील पाण्याने शांत होणार नाही. तेव्हा तू मला जलाशय दाखव." (१८)

" ठीक आहे," असे म्हणून मायेने निर्माण केलेल्या बटूला कालनेमीने आज्ञा केली, 'अरे बटू, या वायुपुत्राला विस्तीर्ण जलाशय दाखव." (१९)

(मग कालनेमी मारुतीला म्हणाला,) "अरे हनुमाना, डोळे मिटून तू पाणी पी आणि माझ्याजवळ ये. मी तुला एका मंत्राचा उपदेश करीन. त्यामुळे तुला औषधी दिसतील." (२०)

ते दर्शितं शीघ्रं बटुना सलिलाशयम् ।
श्य हनुमांस्तोयमपिबन्मीलितेक्षणः ॥ २१ ॥

ागत्य मकरी महामाया महाकपिम् ।
सत्तं महावेगान्मारुतिं घोररूपिणी ॥ २२ ॥

ददर्श हनुमान् ग्रसन्तीं मकरीं रुषा ।
ामास हस्ताभ्यां वदनं सा ममार ह ॥ २३ ॥

ऽन्तरिक्षे ददृशे दिव्यरूपधराङ्गना ।
मालीति विख्याता हनूमन्तमथाब्रवीत् ॥ २४ ॥

सादादहं शापाद्विमुक्तास्मि कपीश्वर ।
हं मुनिना पूर्वमप्सराः कारणान्तरे ॥ २५ ॥

मे यस्तु ते दृष्टः कालनेमिर्महासुरः ।
ाप्रहितो मार्गे विघ्नं कर्तुं तवानघ ॥ २६ ॥

वेषधरो नासौ मुनिर्विप्रविहिंसकः ।
दुष्टं गच्छ शीघ्रं द्रोणाचलमनुत्तमम् ॥ २७ ॥

ाम्यहं ब्रह्मलोकं त्वत्स्पर्शाद्धतकल्मषा ।
क्त्वा सा ययौ स्वर्गं हनूमानप्यथाश्रमम् ॥ २८ ॥

तं तं समालोक्य कालनेमिरभाषत ।
विलम्बेन महता तव वानरसत्तम ॥ २९ ॥

ा मत्तो मन्त्रांस्त्वं देहि मे गुरुदक्षिणाम् ।
क्तो हनुमान्मुष्टिं दृढं बद्ध्वाह राक्षसम् ॥ ३० ॥

ा दक्षिणामेतामित्युक्त्वा निजघान तम् ।
न्य मुनिवेषं स कालनेमिर्महासुरः ॥ ३१ ॥

ा वायुपुत्रेण नानामायाविधानतः ।
ायिकदूतोऽसौ हनूमान्मायिनां रिपुः ॥ ३२ ॥

"ठीक आहे," असे मारुती म्हणाला. मग बटूने मारुतीला जलाशय दाखविला. त्यात शिरून मारुती डोळे मिटून पाणी पिऊ लागला. (२१)

तितक्यात महाभयंकर रूप असणारी महामाया अशी एक सुसर तेथे आली आणि ती मारुतीला अतिशय वेगाने गिळू लागली. (२२)

तेव्हा डोळे उघडल्यावर मारुतीला दिसले की एक सुसर आपणास गिळत आहे. तेव्हा क्रोधाने मारुतीने आपल्या हातांनी तिचे तोंड फाडले. त्यामुळे ती तत्काळ मरून गेली. (२३)

तेव्हा आकाशात एक दिव्य रूप धारण करणारी स्त्री दिसू लागली. ती धान्यमाली या नावाने विख्यात होती. त्या वेळी ती हनूमंताला म्हणाली. (२४)

"हे वानरश्रेष्ठा, तुझ्या कृपेमुळे मी शापातून मुक्त झाले आहे. पूर्वी मी एक अप्सरा होते. काही कारणाने एका मुनीने शाप दिला होता म्हणून मी सुसर झाले होते. (२५)

या आश्रमात जो मुनिवेष धारण केलेला पुरुष तू पाहिला आहेस, तो कालनेमी नावाचा महान असुर आहे. हे पुण्यशील वानरा, तुझ्या मार्गात विघ्न निर्माण करण्यास त्याला रावणाने पाठविलेला आहे. (२६)

मुनीचा वेष धारण करणारा तो खरा मुनी नाही, तर तो ब्राह्मणांची हिंसा करणारा आहे. त्या दुष्टाचा वध कर आणि तू झटपट अतिउत्तम अशा द्रोण पर्वताकडे जा. (२७)

तुझ्या स्पर्शाने माझी पापे नष्ट झाली आहेत. मी आता ब्रह्मलोकी जाईन," असे सांगून ती स्वर्गलोकी निघून गेली. मारुतीसुद्धा आश्रमाकडे परत गेला. (२८)

तो परत आलेला पाहून कालनेमी त्याला म्हणाला, "हे वानरश्रेष्ठा, इतका उशीर का ? (२९)

तू माझ्याकडून त्वरित मंत्र घे आणि मला गुरुदक्षिणा दे." त्याने असे म्हटल्यावर, हनुमानाने आपली मूठ घट्ट आवळून त्या राक्षसाला म्हटले. (३०)

"घे ही दक्षिणा," असे बोलून त्याने एक मुष्टिप्रहार केला. तेव्हा मुनिवेष टाकून तो महासुर कालनेमी वायुपुत्राबरोबर नाना प्रकारच्या मायावी प्रकारांनी लढू लागला. परंतु हनुमान हा महामायेच्या स्वामींचा (रामांचा) दूत होता. शिवाय तो मायावी राक्षसांचा शत्रू होता. (३१-३२)

जघान मुष्टिना शीर्ष्णि भग्नमूर्धा ममार सः ।
ततः क्षीरनिधिं गत्वा दृष्ट्वा द्रोणं महागिरिम् ॥ ३३ ॥

अदृष्ट्वा चौषधीस्तत्र गिरिमुत्पाट्य सत्वरः ।
गृहीत्वा वायुवेगेन गत्वा रामस्य सन्निधिम् ॥ ३४ ॥

उवाच हनुमान् राममानीतोऽयं महागिरिः ।
यद्युक्तं कुरु देवेश विलम्बो नात्र युज्यते ॥ ३५ ॥

श्रुत्वा हनूमतो वाक्यं रामः सन्तुष्टमानसः ।
गृहीत्वा चौषधीः शीघ्रं सुषेणेन महामतिः ॥ ३६ ॥

चिकित्सां कारयामास लक्ष्मणाय महात्मने ।
ततः सुप्तोत्थित इव बुद्ध्वा प्रोवाच लक्ष्मणः ॥ ३७ ॥

तिष्ठ तिष्ठ क्व गन्तासि हन्मीदानीं दशानन ।
इति ब्रुवन्तमालोक्य मूर्ध्न्यवघ्राय राघवः ॥ ३८ ॥

मारुतिं प्राह वत्साद्य त्वत्प्रसादान्महाकपे ।
निरामयं प्रपश्यामि लक्ष्मणं भ्रातरं मम ॥ ३९ ॥

इत्युक्त्वा वानरैः सार्धं सुग्रीवेण समन्वितः ।
बिभीषणमतेनैव युद्धाय समवस्थितः ॥ ४० ॥

पाषाणैः पादपैश्चैव पर्वताग्रैश्च वानराः ।
युद्धायाभिमुखा भूत्वा ययुः सर्वे युयुत्सवः ॥ ४१ ॥

रावणो विव्यथे रामबाणैर्विद्धो महासुरः ।
मातङ्ग इव सिंहेन गरुडेनेव पन्नगः ॥ ४२ ॥

अभिभूतोऽगमद्राजा राघवेण महात्मना ।
सिंहासने समाविश्य राक्षसानिदमब्रवीत् ॥ ४३ ॥

मानुषेणैव मे मृत्युमाह पूर्वं पितामहः ।
मानुषो हि न मां हन्तुं शक्तोऽस्ति भुवि कश्चन ॥ ४४ ॥

ततो नारायणः साक्षान्मानुषोऽभून्न संशयः ।
रामो दाशरथिर्भूत्वा मां हन्तुं समुपस्थितः ॥ ४५ ॥

हनुमानाने कालनेमीच्या मस्तकावर बुक्की मारली. डोके फुटून तो कालनेमी मरण पावला. त्यानंतर क्षीरसागरी गेल्यावर त्याला द्रोण नावाचा महापर्वत दिसला. पण तेथे त्याला आवश्यक त्या औषधी दिसल्या नाहीत. तेव्हा त्याने तो पर्वत उपटून घेतला आणि तो वायुवेगाने सत्वर रामांजवळ पोचला आणि म्हणाला, "हे देवेश्वरा, हा महापर्वतच मी आणला आहे. जे योग्य असेल ते करा. या बाबतीत विलंब करणे योग्य नाही." (३३-३५)

हनुमंताचे वाक्य ऐकल्यावर, रामांचे मन संतुष्ट झाले. मग त्या महाबुद्धिमान रामांनी सुषेणाकडून चद्दिशी औषधी तोडून घेतल्या आणि त्याच्याकडून महात्म्या लक्ष्मणावर उपचार करविला. तेव्हा झोपेतून उठलेल्या माणसाप्रमाणे जागे होऊन लक्ष्मण म्हणू लागला. (३६-३७)

"अरे रावणा, थांब, थांब. जातोस कुठे? मी आत्ताच तुला ठार करतो." असे बोलणाऱ्या लक्ष्मणाला पाहून राघवांनी त्याच्या मस्तकाचे अवघ्राण केले आणि मग त्यांनी मारुतीला म्हटले, "वत्सा, महावानरा, आज तुझ्याच कृपेमुळे लक्ष्मणाला मी सुखरूप पाहात आहे." (३८-३९)

असे बोलून वानरांसह सुग्रीवाला बरोबर घेऊन, बिभीषणाच्या संमतीनेच, श्रीराम पुनः युद्ध करण्यास सिद्ध झाले. (४०)

युद्ध करण्यासाठी ते सर्व वानर पाषाण, वृक्ष, आणि पर्वतशिखरे घेऊन, युद्धाभिमुख होऊन चालू लागले. (४१)

इकडे, ज्याप्रमाणे सिंहाकडून हत्ती किंवा गरुडाकडून सर्प विद्ध होऊन व्याकूळ होतो, त्या प्रमाणे रामांच्या बाणांनी विद्ध झालेला महाराक्षस रावण हा अगदी व्याकूळ झालेला होता. (४२)

म्हणून महात्म्या राघवांकडून पराभूत झालेला राजा रावण लंकापुरीत परत गेला. तेथे आपल्या सिंहासनावर बसून तो राक्षसांना असे म्हणाला. (४३)

"माणसाकडूनच मला मृत्यू येईल, असे पूर्वी मला पितामह ब्रह्मदेवांनी सांगितले होते. परंतु जो मला ठार करण्यास समर्थ होईल असा या पृथ्वीवर कोणीही मनुष्य नाही. (४४)

म्हणून साक्षात नारायणच मनुष्य झाला आहे. दशरथपुत्र राम होऊन तो माझा वध करण्यास आला आहे, यात संशय नाही. (४५)

नरण्येन यत्पूर्वं शप्तोऽहं राक्षसेश्वर ।
पत्स्यते च मद्वंशे परमात्मा सनातनः ॥ ४६ ॥

ा त्वं पुत्रपौत्रैश्च बान्धवैश्च समन्वितः ।
नेष्यसे न सन्देह इत्युक्त्वा मां दिवं गतः ॥ ४७ ॥

एव रामः संजातो मदर्थे मां हनिष्यति ।
म्भकर्णस्तु मूढात्मा सदा निद्रावशं गतः ॥ ४८ ॥

विबोधय महासत्त्वमानयन्तु ममान्तिकम् ।
युक्तास्ते महाकायास्तूर्णं गत्वा तु यत्नतः ॥४९ ॥

बोधय कुम्भश्रवणं निन्यू रावणसन्निधिम् ।
स्कृत्य स राजानमासनोपरि संस्थितः ॥ ५० ॥

ाह रावणो राजा भ्रातरं दीनया गिरा ।
म्भकर्ण निबोध त्वं महत्कष्टमुपस्थितम् ॥ ५१ ॥

ाण निहताः शूराः पुत्राः पौत्राश्च बान्धवाः ।
कर्तव्यमिदानीं मे मृत्युकाल उपस्थिते ॥ ५२ ॥

दाशरथी रामः सुग्रीवसहितो बली ।
द्रं सबलस्तीर्त्वा मूलं नः परिकृन्तति ॥ ५३ ॥

राक्षसा मुख्यतमास्ते हता वानरैर्युधि ।
राणां क्षयं युद्धे न पश्यामि कदाचन ॥ ५४ ॥

ायस्व महाबाहो यदर्थं परिबोधितः ।
तुरर्थे महासत्त्व कुरु कर्म सुदुष्करम् ॥ ५५ ॥

वा तद्रावणेन्द्रस्य वचनं परिदेवितम् ।
म्भकर्णो जहासोच्चैर्वचनं चेदमब्रवीत् ॥ ५६ ॥

मन्त्रविचारे ते गदितं यन्मया नृप ।
द्य त्वामुपगतं फलं पापस्य कर्मणः ॥ ५७ ॥

पूर्वकाळी अनरण्याने मला जो शाप दिला होता की, 'राक्षसराज, माझ्या वंशात सनातन परमात्मा जन्माला येणार आहे आणि त्याच्याकडून तुझे पुत्र, पौत्र आणि बांधव यांच्यासह तू ठार मारला जाशील, यात संशय नाही, असे मला सांगून तो स्वर्गाला गेला होता.' (४६-४७)

तोच हा राम मला ठार करण्यासाठी जन्माला आला आहे, आणि तो नक्कीच माझा वध करील. कुंभकर्ण हा तर मूर्ख असून तो नेहमीच झोपलेला असतो. (४८)

त्या महापराक्रमी कुंभकर्णाला जागे करून तुम्ही त्याला माझ्याजवळ घेऊन या. " रावणाने असे सांगताच, ते प्रचंड देहाचे राक्षस त्वरेने गेले आणि फार प्रयत्नांनी कुंभकर्णाला जागे करून, त्यांनी रावणाजवळ नेले. रावण राजाला नमस्कार करून तो एका आसनावर बसला. (४९-५०)

राजा रावण त्या भावाला दीनवाणीने म्हणाला, "हे कुंभकर्णा, माझ्यावर फार मोठे संकट कोसळले आहे, हे तू जाणून घे व त्याचा विचार कर. (५१)

माझे शूर असे पुत्र, पौत्र आणि बांधव यांना रामाने ठार केले आहे. आता माझा मृत्युकाळ जवळ आला. मी आता काय करू ? (५२)

हा बलवान दशरथपुत्र राम सुग्रीवासहित आपले सैन्य घेऊन, समुद्र ओलांडून, इकडे आला आहे. आणि तो आमचा समूळ नाश करील. (५३)

आमच्याकडील जे मुख्य मुख्य राक्षस होते, ते सगळे युद्धामध्ये वानरांकडून मारले गेले आहेत. परंतु या युद्धात वानरांचा नाश झाल्याचे मात्र मला कधीच दिसून आलेले नाही. (५४)

हे महाबाहो कुंभकर्णा, तू यांचा नाश कर. त्यासाठीच तुला मी झोपेतून जागे केले आहे. हे महासामर्थ्यसंपन्न कुंभकर्णा, आपल्या भावासाठी हे अतिशय दुष्कर असे कार्य तू कर." (५५)

राजा रावणाचे ते दुःखपूर्ण शब्द ऐकल्यावर, कुंभकर्ण मोठ्मोठ्यांदा हसला आणि म्हणाला. (५६)

"हे राजा, पूर्वी विचार-विनिमय करीत असताना, मी जे काही तुला सांगितले होते, तेच तुझ्या पाप-कर्माचे फळ आज तुझ्याजवळ आले आहे. (५७)

पूर्वमेव मया प्रोक्तो रामो नारायणः परः ।
सीता च योगमायेति बोधितोऽपि न बुध्यसे ॥ ५८ ॥

मी पूर्वीच तुला सांगितले होते की राम हा साक्षात परमात्मा नारायण आहे आणि सीता ही योगमाया आहे. त्या वेळी मी तुला असा बोध केला असूनसुद्धा तू ते लक्षात घेतले नाहीस. (५८)

एकदाहं वने सानौ विशालायां स्थितो निशि ।
दृष्टो मया मुनिः साक्षान्नारदो दिव्यदर्शनः ॥ ५९ ॥

एकदा मी रात्रीच्या वेळी एका वनामध्ये एका विशाल पर्वतशिखरावरील शिलेवर बसलो होतो. तेथे दिव्यदृष्टी असणारे साक्षात नारद मुनी मला भेटले होते. (५९)

तमब्रवं महाभाग कुतो गन्तासि मे वद ।
इत्युक्तो नारदः प्राह देवानां मन्त्रणे स्थितः ॥ ६० ॥

मी त्यांना म्हटले, 'अहो महाभाग, तुम्ही कोठून आलात, ते मला सांगा.' मी असे विचारल्यावर नारद म्हणाले, 'जेथे देवांचा गुप्त विचार-विनिमय चालला होता, तेथे मी होतो. (६०)

तत्रोत्पन्नमुदन्तं ते वक्ष्यामि शृणु तत्त्वतः ।
युवाभ्यां पीडिता देवाः सर्वे विष्णुमुपागताः ॥ ६१ ॥

तेथे जो वृत्तांत घडला तो मी तुला खराखुरा सांगतो, ऐक. तुम्हा दोघांकडून (म्हणजे रावण व कुंभकर्ण या दोघांकडून) त्रस्त झालेले सर्व देव विष्णूंकडे गेले होते. (६१)

ऊचुस्ते देवदेवेशं स्तुत्वा भक्त्या समाहिताः ।
जहि रावणमक्षोभ्यं देव त्रैलोक्यकण्टकम् ॥ ६२ ॥

त्या देवदेवेश्वरांची एकाग्र भक्तीने स्तुती करून ते त्यांना म्हणाले, 'हे देवा, तिन्ही लोकांचा शत्रू आणि अजिंक्य अशा रावणाचा वध करा. (६२)

मानुषेण मृतिस्तस्य कल्पिता ब्रह्मणा पुरा ।
अतस्त्वं मानुषो भूत्वा जहि रावणकण्टकम् ॥ ६३ ॥

माणसाच्या हातून त्या रावणाला मरण येणार आहे, असे ब्रह्मदेवांनी पूर्वीच ठरवून दिले आहे. म्हणून तुम्ही माणूस होऊन रावणरूपी शत्रूचा नाश करा." (६३)

तथेत्याह महाविष्णुः सत्यसङ्कल्प ईश्वरः ।
जातो रघुकुले देवो राम इत्यभिविश्रुतः ॥ ६४ ॥

'ठीक आहे' असे सत्य संकल्प असणारे ईश्वर महाविष्णू म्हणाले. 'तेच देव आता रघुकुळात जन्म घेऊन राम या नावाने विख्यात झाले आहेत. (६४)

स हनिष्यति वः सर्वानित्युक्त्वा प्रययौ मुनिः ।
अतो जानीहि रामं त्वं परं ब्रह्म सनातनम् ॥ ६५ ॥

तुम्हां सर्वांचा ते वध करतील.' असे सांगून नारद मुनी निघून गेले. म्हणून हे रावणा, राम हे सनातन परब्रह्म आहेत, हे लक्षात घे. (६५)

त्यज वैरं भजस्वाद्य मायामानुषविग्रहम् ।
भजतो भक्तिभावेन प्रसीदति रघूत्तमः ॥ ६६ ॥

म्हणून रामांबरोबरचे वैर सोडून दे. मायेने मनुष्य देह धारण केलेल्या रामांची आता तू भक्ती कर. भक्तिभावाने भजणाऱ्या पुरुषावर रघूत्तम प्रसन्न होतात. (६६)

भक्तिर्जननित्री ज्ञानस्य भक्तिर्मोक्षप्रदायिनी ।
भक्तिहीनेन यत्किञ्चित्कृतं सर्वमसत्समम् ॥ ६७ ॥

भक्ती ही ज्ञानाची जननी आहे. भक्ती ही मोक्ष देणारी आहे. भक्तिरहित माणसाने जे काही केलेले असते, ते सर्व न केल्यातच जमा होते. (६७)

अवताराः सुबहवो विष्णोर्लीलानुकारिणः ।
तेषां सहस्रसदृशो रामो ज्ञानमयः शिवः ॥ ६८ ॥

विष्णूंनी आत्तापर्यंत पुष्कळ अवतार घेतले आहेत. आणि तदनुरूप त्यांनी अनेक लीला केल्या आहेत. अशा हजारो अवतारासमान हे ज्ञानस्वरूप आणि कल्याणकारक राम आहेत. (६८)

रामं भजन्ति निपुणा मनसा वचसानिशम् ।
अनायासेन संसारं तीर्त्वा यान्ति हरेः पदम् ॥ ६९ ॥

ये राममेव सततं भुवि शुद्धसत्त्वा
ध्यायन्ति तस्य चरितानि पठन्ति सन्तः ।
मुक्तास्त एव भवभोगमहाहिपाशैः
सीतापतेः पदमनन्तसुखं प्रयान्ति ॥ ७० ॥

भक्तीमध्ये निपुण असणारे जे लोक मनाने आणि वाचेने रात्रंदिवस रामांचे भजन करतात, ते विनासायास संसार-सागर तरून जाऊन हरीचे पदी पोचतात. (६९)

शुद्ध चित्त असणारे जे साधू पुरुष या जगात सतत रामांचेच ध्यान करतात आणि त्या रामांची चरित्रे पठण करतात, तेच संसारातील भोगरूपी महासर्पाचे पाशांतून मुक्त होतात आणि शेवटी सीतापती रामांच्या अनंत सुखाने युक्त असणाऱ्या स्थानी जाऊन पोचतात. (७०)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टम सर्ग

कुंभकर्णाचा वध

श्रीमहादेव उवाच

कुम्भकर्णवचः श्रुत्वा भ्रुकुटीविकटाननः ।
दशग्रीवो जगादेदमासनादुत्पतन्निव ॥ १ ॥

त्वमानीतो न मे ज्ञानबोधनाय सुबुद्धिमान् ।
मया कृतं समीकृत्य युध्यस्व यदि रोचते ॥ २ ॥

नोचेद्गच्छ सुषुप्त्यर्थं निद्रा त्वां बाधतेऽधुना ।
रावणस्य वचः श्रुत्वा कुम्भकर्णो महाबलः ॥ ३ ॥

नष्टोऽयमिति विज्ञाय तूर्णं युद्धाय निर्ययौ ।
स लङ्घयित्वा प्राकारं महापर्वतसन्निभः ॥ ४ ॥

निर्ययौ नगरात्तूर्णं भीषयन्हरिसैनिकान् ।
स ननाद महानादं समुद्रमभिनादयन् ॥ ५ ॥

वानरान्कालयामास बाहुभ्यां भक्षयन् रुषा ।
कुम्भकर्णं तदा दृष्ट्वा सपक्षमिव पर्वतम् ॥ ६ ॥

दुद्रुवुर्वानराः सर्वे कालान्तकमिवाखिलाः ।
यमन्तं हरिवाहिन्यां मुद्गरेण महाबलम् ॥ ७ ॥

श्रीमहादेव म्हणाले – हे पार्वती, कुंभकर्णाचे वचन ऐकल्यावर, भुवया वर चढवून रावणाने आपले तोंड विकृत आणि भयंकर केले. तो आसनावरून जणू उडी मारतो की काय असे वाटले. तो म्हणाला. (१)

"तू फार शहाणा आहेस हे मला माहीत आहे. परंतु मला ज्ञानाचा उपदेश करण्यासाठी मी तुला येथे बोलावून घेतलेले नाही. मी आत्तापर्यंत जे काही केले ते तुला रुचत असेल, तर तू युद्ध कर. (२)

नाही तर तू सरळ झोपायला जा. कारण तुला आता झोप सतावीत असेल." रावणाचे ते वचन ऐकल्यावर, 'हा रावण क्रुद्ध झाला आहे' हे ओळखून महाबलवान कुंभकर्ण तत्काळ युद्धासाठी बाहेर पडला. प्रचंड पर्वताप्रमाणे शरीर असलेला तो लंका नगरीचा तट ओलांडून नगरातून बाहेर पडला (कारण अतिशय प्रचंड शरीर असल्याने तो नगरीच्या लहान वेशीतून बाहेर जाऊ शकत नव्हता) आणि मग वानर सैनिकांना भिववीत, समुद्राला नादाने भेदून टाकणारी, अशी मोठी गर्जना त्याने केली . (३-५)

क्रोधाने दोन्ही हातांनी वानरांना धरून, त्यांना खाऊन टाकीत तो वानरांना नष्ट करू लागला. त्या वेळी कुंभकर्ण पंख असणाऱ्या प्रत्यक्ष पर्वताप्रमाणे दिसत होता. आणि यमराज दिसल्यावर ज्या प्रमाणे सर्व लोक पळू लागतात, त्या प्रमाणे त्या कुंभकर्णाला पाहून सर्व वानर पळू लागले. त्या वेळी महाबलवान कुंभकर्ण हातात मुद्गर

कालयन्तं हरीन्वेगाद्भक्षयन्तं समन्ततः ।
चूर्णयन्तं मुद्गरेण पाणिपादैरनेकधा ॥ ८ ॥

कुम्भकर्णं तदा दृष्ट्वा गदापाणिर्बिभीषणः ।
ननाम चरणं तस्य भ्रातुर्ज्येष्ठस्य बुद्धिमान् ॥ ९ ॥

बिभीषणोऽहं भ्रातुर्मे दयां कुरु महामते ।
रावणस्तु मया भ्रातर्बहुधा परिबोधितः ॥ १० ॥

सीतां देहीति रामाय रामः साक्षाज्जनार्दनः ।
न शृणोति च मां हन्तुं खड्गमुद्यम्य चोक्तवान् ॥ ११ ॥

धिक् त्वां गच्छेति मां हत्वा पदा पापिभिरावृतः ।
चतुर्भिर्मन्त्रिभिः सार्धं रामं शरणमागतः ॥ १२ ॥

तच्छ्रुत्वा कुम्भकर्णोऽपि ज्ञात्वा भ्रातरमागतम् ।
समालिङ्ग्य च वत्स त्वं जीव रामपदाश्रयात् ॥ १३ ॥

कुलसंरक्षणार्थाय राक्षसानां हिताय च ।
महाभागवतोऽसि त्वं पुरा मे नारदाच्छ्रुतम् ॥ १४ ॥

गच्छ तात ममेदानीं दृश्यते न च किञ्चन ।
मदीयो वा परो वापि मदमत्तविलोचनः ॥ १५ ॥

इत्युक्तोऽश्रुमुखो भ्रातुश्चरणावभिवन्द्य सः ।
रामपार्श्वमुपागत्य चिन्तापर उपस्थितः ॥ १६ ॥

कुम्भकर्णोऽपि हस्ताभ्यां पादाभ्यां पेषयन्हरीन् ।
चचार वानरीं सेनां कालयन् गन्धहस्तिवत् ॥ १७ ॥

दृष्ट्वा तं राघवः क्रुद्धो वायव्यं शस्त्रमादरात् ।
चिक्षेप कुम्भकर्णाय तेन चिच्छेद रक्षसः ॥ १८ ॥

समुद्गरं दक्षहस्तं तेन घोरं ननाद सः ।
स हस्तः पतितो भूमावनेकानर्दयन्कपीन् ॥ १९ ॥

घेऊन वानर सैन्यात फिरत होता आणि संधी मिळताच वानरांना ठार करीत, आजबाजूला सापडतील त्या वानरांना वेगाने खाऊन टाकीत होता. तसेच आपला मुद्गर व आपले हातपाय यांचे द्वारा नाना प्रकारांनी तो वानरांचे चूर्ण करीत होता. कुंभकर्णाला तेव्हा पाहिल्यावर, हातात गदा घेतलेल्या बुद्धिमान बिभीषणाने आपल्या थोरल्या भावाच्या चरणांना वंदन केले. (६-९)

(मग बिभीषण कुंभकर्णाला म्हणाला,) "हे महा बुद्धिमंता, मी तुझा भाऊ बिभीषण आहे. माझ्यावर दया कर. हे बंधो, मी रावणाला नाना प्रकारांनी बोध केला की बाबा रे, राम हे साक्षात जनार्दन आहेत. तू रामांना सीता परत देऊन टाक. पण त्याने माझे ऐकले नाही. उलट मला ठार मारण्यास तलवार उगारून तो मला म्हणाला, 'तुझा धिक्कार असो. तू येथून चालता हो.' असे बोलून पापी मंत्र्यांनी वेढलेल्या त्याने मला पायाने लाथ मारली. तेव्हा माझ्या चार मंत्र्यांसह मी रामांना शरण आलो."(१०-१२)

ते ऐकल्यावर आपला भाऊ बिभीषण जवळ आला आहे, हे कुंभकर्णाला कळले. मग बिभीषणाला आलिंगन देऊन तो म्हणाला, "अरे वत्सा, रामांच्या चरणांचा आश्रय घेऊन तू आपल्या कुळाच्या संरक्षणासाठी आणि राक्षसांच्या हितासाठी जिवंत राहा. तू महान् भगवद्भक्त आहेस, असे मी पूर्वी नारदांकडून ऐकलेले आहे. (१३-१४)

बाबा रे, तू जा आता. रणाच्या मदाने माझे डोळे धुंद झाले असल्यामुळे, कोण आपला आणि कोण परका हे मला आता काहीच दिसेनासे झाले आहे." (१५)

कुंभकर्णाने असे सांगितल्यावर, बिभीषणाच्या मुखावर अश्रू ओघळू लागले. नंतर बंधूच्या चरणांना वंदन करून, चिंताग्रस्त झालेला बिभीषण रामांजवळ येऊन उभा राहिला. (१६)

इकडे हातांनी व पायांनी वानरांना चिरडीत आणि गर्जना करीत एखाद्या मदमस्त हत्तीप्रमाणे कुंभकर्ण वानरांच्या सैन्यात फिरू लागला. (१७)

त्या कुंभकर्णाला पाहून राघव रागावले. त्यांनी वायव्य अस्त्र घेतले आणि ते दक्षतेने कुंभकर्णावर सोडले. त्या अस्त्राने मुद्गर घेतलेल्या राक्षसाचा उजवा हात तोडून टाकला. त्यामुळे तो भयंकर गर्जना करू लागला. अनेक वानरांना चिरडून टाकीत तो तुटलेला हात जमिनीवर पडला. (१८-१९)

पर्यन्तमाश्रिताः सर्वे वानरा भयवेपिताः ।
रामराक्षसयोर्युद्धं पश्यन्तः पर्यवस्थिताः ॥ २० ॥

रामांच्या जवळपास उभे असणारे सर्व वानर भीतीने कापू लागले आणि श्रीराम व कुंभकर्ण यांचे युद्ध पाहात उभे राहिले. (२०)

कुम्भकर्णश्छिन्नहस्तः शालमुद्यम्य वेगतः ।
समरे राघवं हन्तुं दुद्राव तमथोऽच्छिनत् ॥ २१ ॥

हात तुटलेल्या कुंभकर्णाने एक शाल वृक्ष उगारून, रामांना ठार करण्यास तो वेगाने त्यांच्याकडे धावला. तेव्हा राघवांनी इंद्र-अस्त्राने त्याचा डावा हात शालवृक्षासह तोडून टाकला. नंतर दोन्ही बाहू तुटलेले असूनसुद्धा तो गर्जना करीत आपल्याकडे येत आहे, हे पाहून राघवांनी दोन अर्धचंद्राकार तीक्ष्ण बाण घेऊन त्यांच्या द्वारा त्याचे दोन्ही पाय तोडून टाकले. तेव्हा ते पाय धाड्दिशी लंकेच्या द्वारात जाऊन पडले. (२१-२३)

शालेन सहितं वामहस्तमैन्द्रेण राघवः ।
छिन्नबाहुमथायान्तं नर्दन्तं वीक्ष्य राघवः ॥ २२ ॥

द्वावर्धचन्द्रौ निशितावादायास्य पदद्वयम् ।
चिच्छेद पतितौ पादौ लङ्काद्वारि महास्वनौ ॥ २३ ॥

ज्या प्रमाणे राहू हा चंद्राकडे धावतो, त्या प्रमाणे दोन्ही हात आणि दोन्ही पाय तुटले होते, तरीसुद्धा तो महाभयंकर कुंभकर्ण राक्षस वडवानलाप्रमाणे आपले विस्तीर्ण तोंड वासून गर्जना करीत रघुनंदनांकडे धावू लागला; तेव्हा तीक्ष्ण टोके असणाऱ्या अनेक बाणांनी रघूत्तम रामांनी कुंभकर्णाचे तोंड भरून टाकले. (२४-२५)

निकृत्तपाणिपादोऽपि कुम्भकर्णोऽतिभीषणः ।
वडवामुखवद्वक्त्रं व्यादाय रघुनन्दनम् ॥ २४ ॥

अभिदुद्राव निनदन्राहुश्चन्द्रमसं यथा ।
अपूरयच्छितायैश्च सायकैस्तद्रघूत्तमः ॥ २५ ॥

त्याचे तोंड बाणांनी भरून गेले होते, तो अतिभयंकर राक्षस आक्रोश करू लागला. त्यानंतर सूर्याप्रमाणे तेजस्वी असणारा अतिशय उत्तम असा, वज्र किंवा विद्युत्पाताप्रमाणे असणारा तो ऐंद्र बाण रामांनी त्या कुंभकर्ण असुराच्या वधासाठी सोडला. ज्या प्रमाणे इंद्राच्या वज्राने वृत्रासुराचे शिर तोडले, त्या प्रमाणे ज्यावर कुंडले आणि दाढा चमकत होत्या असे ते राक्षसाधिपती कुंभकर्णाचे पर्वताप्रमाणे असणारे मस्तक तुटले. ते लंकेच्या द्वारात जाऊन पडले आणि कुंभकर्णाचे धड महासागरात पडले. (२६-२८)

शरपूरितवक्त्रोऽसौ चुक्रोशातिभयङ्करः ।
अथ सूर्यप्रतीकाशमैन्द्रं शरमनुत्तमम् ॥ २६ ॥

वज्राशनिसमं रामश्चिक्षेपासुरमृत्यवे ।
स तत्पर्वतसङ्काशं स्फुरत्कुण्डलदंष्ट्रकम् ॥ २७ ॥

चकर्त रक्षोऽधिपतेः शिरो वृत्रमिवाशनिः ।
तच्छिरः पतितं लङ्काद्वारि कायो महोदधौ ॥ २८ ॥

त्याच्या मस्तकाने लंकेचे द्वार बंद करून टाकले तर त्याच्या धडाने सागरातील नक्र इत्यादी जलचरांचे चूर्ण करून टाकले. तेव्हा ऋषींचेसह देव आणि अप्सरांसहित गंधर्व, नाग, पक्षी, सिद्ध, यक्ष आणि गुह्यक हे सर्व अतिशय आनंदित झाले आणि फुलांचा वर्षाव करीत ते राघवांची स्तुती करू लागले. (२९-३०)

शिरोऽस्य रोधयद्द्वारं कायो नक्राद्यचूर्णयत् ।
ततो देवाः सऋषयो गन्धर्वाः पन्नगाः खगाः ॥ २९ ॥

सिद्धा यक्षा गुह्यकाश्च अप्सरोभिश्च राघवम् ।
ईडिरे कुसुमासारैर्वर्षन्तश्चाभिनन्दिताः ॥ ३० ॥

त्या वेळी स्वतःच्या तेजाने दिशांना प्रकाशित करीत, देवमहर्षी नारद रामांचे दर्शन घेण्यास आकाशातून त्वरेने खाली पृथ्वीवर आले. (३१)

आजगाम तदा रामं द्रष्टुं देवमुनीश्वरः ।
नारदो गगनात्तूर्णं स्वभासा भासयन्दिशः ॥ ३१ ॥

राममिन्दीवरश्याममुदाराङ्गं धनुर्धरम् ।
ईषत्ताम्रविशालाक्षमैन्द्रास्त्राञ्चितबाहुकम् ॥ ३२ ॥

दयार्द्रदृष्ट्या पश्यन्तं वानराञ्छरपीडितान् ।
दृष्ट्वा गद्गदया वाचा भक्त्या स्तोतुं प्रचक्रमे ॥ ३३ ॥

नारद उवाच

देवदेव जगन्नाथ परमात्मन् सनातन ।
नारायणाखिलाधार विश्वसाक्षिन्नमोऽस्तु ते ॥ ३४ ॥

विशुद्धज्ञानरूपोऽपि त्वं लोकानतिवञ्चयन् ।
मायया मनुजाकारः सुखदुःखादिमानिव ॥ ३५ ॥

त्वं मायया गुह्यमानः सर्वेषां हृदि संस्थितः ।
स्वयंज्योतिःस्वभावस्त्वं व्यक्त एवामलात्मनाम् ॥ ३६ ॥

उन्मीलयन् सृजस्येतन्नेत्रे राम जगत्त्रयम् ।
उपसंहियते सर्वं त्वया चक्षुर्निमीलनात् ॥ ३७ ॥

यस्मिन्सर्वमिदं भाति यतश्चैतच्चराचरम् ।
यस्मान्न किञ्चिल्लोकेऽस्मिंस्तस्मै ते ब्रह्मणे नमः ॥ ३८ ॥

प्रकृतिं पुरुषं कालं व्यक्ताव्यक्तस्वरूपिणम् ।
यं जानन्ति मुनिश्रेष्ठास्तस्मै रामाय ते नमः ॥ ३९ ॥

विकाररहितं शुद्धं ज्ञानरूपं श्रुतिर्जगौ ।
त्वां सर्वजगदाकारमूर्तिं चाप्याह सा श्रुतिः ॥ ४० ॥

विरोधो दृश्यते देव वैदिको वेदवादिनाम् ।
निश्चयं नाधिगच्छन्ति त्वत्प्रसादं विना बुधाः ॥ ४१ ॥

मायया क्रीडतो देव न विरोधो मनागपि ।
रश्मिजालं रवेर्यद्वद्दृश्यते जलवद् भ्रमात् ॥ ४२ ॥

नंतर जे नीलकमलाप्रमाणे श्याम वर्ण होते, ज्यांचे शरीर मनोहर होते, ज्यांनी धनुष्य धारण केले होते, ज्यांचे विशाल डोळे किंचित् लाल झाले होते, ज्यांनी एका हाताने ऐंद्र अस्त्र पकडले होते, जे आपल्या दयार्द्र दृष्टीने बाणांनी त्रस्त झालेल्या वानरांकडे पाहात होते, अशा त्या रामांना पाहिल्यावर, नारदांनी भक्तीने गद्गद झालेल्या वाणीने स्तुती करण्यास प्रारंभ केला. (३२-३३)

नारद म्हणाले– "हे देवाधिदेवा, हे जगन्नाथा, हे सनातन परमात्म्या, हे सर्वांचा आधार असणाऱ्या नारायणा, हे विश्वसाक्षिन, तुम्हांला नमस्कार असो. (३४)

जरी तुम्ही विशुद्ध ज्ञानस्वरूप आहात, तरी मायेने मनुष्यरूप धारण करून तुम्ही जणू सुखी-दुःखी होता असे भासवत लोकांना मोहवीत आहात. (३५)

मायेमुळे झाकले गेलेले तुम्ही अंतर्यामी रूपाने सर्वांच्या हृदयांत स्थित आहात. तुम्ही स्वयंप्रकाशी आहात. ज्यांचे चित्त शुद्ध झाले आहे, अशा लोकांना तुम्ही स्पष्टपणे दिसता. (३६)

हे श्रीरामा, जेव्हा तुम्ही तुमचे डोळे उघडता तेव्हा तुम्ही हे त्रैलोक्य निर्माण करता आणि जेव्हा तुम्ही डोळे मिटता तेव्हा तुमच्याकडून या सर्व त्रैलोक्याचा नाश केला जातो. (३७)

ज्यांच्या ठिकाणी हे स्थावर जंगमात्मक जग भासते, ज्यांच्यापासून या जगाची उत्पत्ती, स्थिती व नाश होतात आणि ज्यांच्याखेरीज या जगात अन्य काहीही नाही, असे ब्रह्म तुम्ही आहात, त्या तुम्हांला नमस्कार असो. (३८)

तुम्हांला मुनिश्रेष्ठ प्रकृती, पुरुष, काल तसेच व्यक्त आणि अव्यक्त असे म्हणतात, त्या तुम्हांला, रामांना नमस्कार असो. (३९)

विकारांनी रहित, शुद्ध आणि ज्ञानरूप असे तुम्ही आहात, असे श्रुती सांगते आणि ती श्रुती असेसुद्धा सांगते की तुम्ही सर्व जगदाकार स्वरूपाचे आहात. (४०)

अशा प्रकारे हे देवा, वेदाची चर्चा करणाऱ्या लोकांमध्ये वेदाचे मत सांगताना वेद-वचनांचे बाबतीत विरोध दिसून येतो. परंतु तुमची कृपा झाल्याशिवाय विद्वानांना तुमच्या स्वरूपाचा निश्चय करता येत नाही.(४१)

परंतु हे देवा, तुम्ही मायेच्या योगाने क्रीडा करता म्हणून श्रुतींमधील वाक्यात वाटतो तसा थोडासुद्धा विरोध येत नाही. ज्या प्रमाणे सूर्याच्या किरणांचा समूह हा भ्रमामुळे

ान्तिज्ञानात्तथा राम त्वयि सर्वं प्रकल्प्यते ।
नसोऽविषयो देव रूपं ते निर्गुणं परम् ॥ ४३ ॥

थं दृश्यं भवेद्देव दृश्याभावे भजेत्कथम् ।
तस्तवावतारेषु रूपाणि निपुणा भुवि ॥ ४४ ॥

जन्ति बुद्धिसम्पन्नास्तरन्त्येव भवार्णवम् ।
ामक्रोधादयस्तत्र बहवः परिपन्थिनः ॥ ४५ ॥

ीषयन्ति सदा चेतो मार्जारा मूषकं यथा ।
त्राम स्मरतां नित्यं त्वद्रूपमपि मानसे ॥ ४६ ॥

त्पूजानिरतानां ते कथामृतपरात्मनाम् ।
ब्रद्धक्तसङ्गिनां राम संसारो गोष्पदायते ॥ ४७ ॥

ातस्ते सगुणं रूपं ध्यात्वाहं सर्वदा हृदि ।
ुक्तश्चरामि लोकेषु पूज्योऽहं सर्वदैवतैः ॥ ४८ ॥

ाम त्वया महत्कार्यं कृतं देवहितेच्छया ।
ुम्भकर्णवधेनाद्य भूभारोऽयं गतः प्रभो ॥ ४९ ॥

त्रो हनिष्यति सौमित्रिरिन्द्रजेतारमाहवे ।
निष्यसेऽथ राम त्वं परश्वो दशकन्धरम् ॥ ५० ॥

ाश्यामि सर्वं देवेश सिद्धैः सह नभोगतः ।
नुगृह्णीष्व मां देव गमिष्यामि सुरालयम् ॥ ५१ ॥

त्युक्त्वा राममामन्त्र्य नारदो भगवानृषिः ।
ययौ दैवैः पूज्यमानो ब्रह्मलोकमकल्मषम् ॥ ५२ ॥

ातरं निहतं श्रुत्वा कुम्भकर्णं महाबलम् ।
रावणः शोकसन्तप्तो रामेणाक्लिष्टकर्मणा ॥ ५३ ॥

मूर्च्छितः पतितो भूमावुत्थाय विललाप ह ।
पितृव्यं निहतं श्रुत्वा पितरं चातिविह्वलम् ॥ ५४ ॥

पाण्याप्रमाणे दिसतो, त्या प्रमाणे हे श्रीरामा, भ्रांति-ज्ञानामुळे तुमच्या ठिकाणी सर्व जग कल्पिले जाते. हे देवा, तुमचे श्रेष्ठ निर्गुण रूप हे मनाचा विषय होत नाही, (निर्गुण रूप हे मनाला आकलन होत नाही.) (४२-४३)

तर असे ते निर्गुण रूप कसे बरे दृश्य होईल ? आणि जर ते दृश्य होत नसेल तर त्याची भक्ती कोण व कशी बरे करेल ? म्हणून बुद्धि -संपन्न आणि हुशार लोक हे पृथ्वीवरील तुमच्या अवतारांतील रूपांची भक्ती करतात आणि ते संसारसागर तरून जातात. भक्ति-मार्गात काम, क्रोध इत्यादी बरेच शत्रू आहेत. मांजर ज्या प्रमाणे उंदराला भयभीत करते, त्याप्रमाणे ते काम इत्यादी माणसाच्या मनाला भयभीत करतात. हे श्रीरामा, जे लोक तुमच्या नामाचे नित्य स्मरण करतात, जे तुमच्या रूपाचे मनात ध्यान करतात, जे तुमच्या पूजेत रत असतात, तुमचे कथामृत सेवन करण्यात ज्यांचे मन गढलेले असते आणि जे तुमच्या भक्तांची संगती करतात, त्यांना हा संसार चिखलात उमटलेल्या गाईच्या पावलाप्रमाणे तुच्छ वाटतो. (४४-४७)

म्हणून हे रामा, सदा सर्वदा माझ्या हृदयात तुमच्या सगुण रूपाचे ध्यान करून मुक्त झालेला मी सर्व लोकांत फिरत असतो आणि मी सर्व देवांनाही पूजनीय झालो आहे. (४८)

हे रामा, देवांचे हित करण्याच्या इच्छेने तुम्ही फार महान कार्य केले आहे. हे प्रभो, कुंभकर्णाचा वध झाल्यामुळे आज भूमीचा भार नाहीसा झाला आहे. (४९)

उद्या युद्धात लक्ष्मण इंद्रजिताचा वध करील आणि त्यानंतर परवा दिवशी हे रामा, तुम्ही रावणाला ठार कराल. (५०)

हे देवेश्वरा, हे सर्व काही मी सिद्धांसह आकाशात राहून पाहीन. हे देवा, माझ्यावर कृपा करा. आता मी स्वर्ग लोकात जातो. " (५१)

असे बोलून आणि रामांचा निरोप घेऊन, देवांचे कडून पूजिले जाणारे भगवान नारद मुनी निष्कलंक अशा ब्रह्मलोकाला निघून गेले. (५२)

आपल्या महाबलवान अशा कुंभकर्ण भावाला फारसे कष्ट न करता रामांनी ठार केले, हे ऐकल्यावर रावण अतिशय शोकाकुल झाला आणि मूर्च्छित होऊन तो जमिनीवर पडला. मग शुद्धीवर आल्यावर उठून तो विलाप करू लागला. इकडे आपला चुलता कुंभकर्ण ठार झाला

इन्द्रजित्प्राह शोकार्तं त्यज शोकं महामते ।
मयि जीवति राजेन्द्र मेघनादे महाबले ॥ ५५ ॥

दुःखस्यावसरः कुत्र देवान्तक महामते ।
व्येतु ते दुःखमखिलं स्वस्थो भव महीपते ॥ ५६ ॥

सर्वं समीकरिष्यामि हनिष्यामि च वै रिपून् ।
गत्वा निकुम्भिलां सद्यस्तर्पयित्वा हुताशनम् ॥ ५७ ॥

लब्ध्वा रथादिकं तस्मादजेयोऽहं भवाम्यरेः ।
इत्युक्त्वा त्वरितं गत्वा निर्दिष्टं हवनस्थलम् ॥ ५८ ॥

रक्तमाल्याम्बरधरो रक्तगन्धानुलेपनः ।
निकुम्भिलास्थले मौनी हवनायोपचक्रमे ॥ ५९ ॥

बिभीषणोऽथ तच्छ्रुत्वा मेघनादस्य चेष्टितम् ।
प्राह रामाय सकलं होमारम्भं दुरात्मनः ॥ ६० ॥

समाप्यते चेद्धोमोऽयं मेघनादस्य दुर्मतेः ।
तदाजेयो भवेद्राम मेघनादः सुरासुरैः ॥ ६१ ॥

अतः शीघ्रं लक्ष्मणेन घातयिष्यामि रावणिम् ।
आज्ञापय मया सार्धं लक्ष्मणं बलिनां वरम् ।
हनिष्यति न सन्देहो मेघनादं तवानुजः ॥ ६२ ॥

श्रीरामचन्द्र उवाच

अहमेवागमिष्यामि हन्तुमिन्द्रजितं रिपुम् ।
आग्नेयेन महास्त्रेण सर्वराक्षसघातिना ॥ ६३ ॥

बिभीषणोऽपि तं प्राह नासावन्यैर्निहन्यते ।
यस्तु द्वादश वर्षाणि निद्राहारविवर्जितः ॥ ६४ ॥

तेनैव मृत्युर्निर्दिष्टो ब्रह्मणास्य दुरात्मनः ।
लक्ष्मणस्तु अयोध्याया निर्गम्यायात्त्वया सह ॥ ६५ ॥

आणि आपला पिता रावण अतिशय विव्हल झाला आहे हे ऐकल्यावर, इंद्रजित आपल्या शोकाकुल पित्याला म्हणाला, "हे महाबुद्धिमंता, तुम्ही शोक करणे सोडून द्या. हे महाबुद्धिवाना, देवांचा अंत करणाऱ्या हे राजेंद्रा, मी महाबलवान मेघनाद जिवंत असताना, तुम्हांला दुःख करायचे कारण काय ? हे पृथ्वीपते, तुमचे सर्व दुःख नष्ट होवो. तुम्ही स्वस्थ व्हा. (५३-५६)

मी सर्व काही सरळ व्यवस्थित करीन. मी सर्व शत्रूंना ठार मारीन. आता ताबडतोब निकुंभिला* स्थानी जाऊन, अग्नीला हवनांनी तृप्त करून, रथ इत्यादी प्राप्त करून घेतल्यावर, मी शत्रूला अजिंक्य होईन." असे बोलून तो नियोजित यज्ञशाळेत निघून गेला. (५७-५८)

लाल फुलांच्या माळा व लाल वस्त्रे परिधान करून आणि रक्तचंदनाचा लाल लेप लावून, त्या निकुंभिलेच्या स्थानी, त्याने मौन धारण करून हवन करण्यास प्रारंभ केला. (५९)

मेघनादाच्या त्या कृत्याची माहिती बिभीषणाला लागली. तेव्हा तो रामांना म्हणाला, "हे रामा, जर त्या दुरात्म्या, दुष्टबुद्धी मेघनादाने सुरू केलेला हा होम निर्विघ्नपणे समाप्त झाला, तर तो देव आणि असुर यांना अजिंक्य होईल. (६०-६१)

म्हणून मी ताबडतोब लक्ष्मणाकडून रावणपुत्र मेघनादाचा वध करवून घेतो. तेव्हा बलवानांमधील श्रेष्ठ अशा लक्ष्मणाला माझ्याबरोबर येण्याची आज्ञा द्या. तुमचा धाकटा भाऊ लक्ष्मण हा मेघनादाला ठार करेल, यात संशय नाही." (६२)

श्रीरामचंद्र म्हणाले– "सर्व राक्षसांचा घात करू शकणाऱ्या आग्नेय या महान् अस्त्राने इंद्रजिताला ठार करण्यास मीच स्वतः येतो." (६३)

तेव्हा बिभीषण म्हणाला, "हा मेघनाद अन्य कुणाकडूनही ठार केला जाऊ शकणार नाही. जो कोणी बारा वर्षे निद्रा व आहार सोडून राहिला असेल, त्याच्या कडूनच या दुरात्म्याचा मृत्यू होईल, असे ब्रह्मदेवानेच निश्चित केलेले आहे. हे रघूत्तम रामा, हा लक्ष्मण अयोध्येतून बाहेर

* निकुंभिला हे लंकेजवळचे एक स्थान अथवा गुहा.

तदादि निद्राहारादीन्न जानाति रघूत्तम ।
सेवार्थं तव राजेन्द्र ज्ञातं सर्वमिदं मया ॥ ६६ ॥

तदाज्ञापय देवेश लक्ष्मणं त्वरया मया ।
हनिष्यति न सन्देहः शेषः साक्षाद्धराधरः ॥ ६७ ॥

त्वमेव साक्षाज्जगतामधीशो
नारायणो लक्ष्मण एव शेषः ।
युवां धराभारनिवारणार्थं
जातौ जगन्नाटकसूत्रधारौ ॥ ६८ ॥

पडून तुमच्याबरोबर आला आहे. तेव्हापासून तो तुमच्या सेवेत मग्न असल्याने त्याला आहार व निद्रा माहीतच नाहीत. हे राजेंद्रा, हे सर्व मला ज्ञात आहे. (६४-६६)

म्हणून हे देवेश्वरा, माझ्याबरोबर येण्यास लक्ष्मणाला चट्दिशी आज्ञा द्या. हा लक्ष्मण त्या मेघनादाला नक्कीच ठार करील यात संशय नाही. कारण तो पृथ्वीला धारण करणारा साक्षात शेष नाग आहे. (६७)

हे श्रीरामा, तुम्हीच सर्व जगतांचे अधिपती नारायण आहात आणि लक्ष्मण हा शेष नाग आहे. जगरूपी नाटकाचे सूत्रधार असणारे तुम्ही दोघे भूमीचा भार हरण करण्यासाठी मनुष्यरूपाने जन्माला आलेले आहात." (६८)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवम सर्ग

मेघनादाचा वध

श्रीमहादेव उवाच

बिभीषणवचः श्रुत्वा रामो वाक्यमथाब्रवीत् ।
जानामि तस्य रौद्रस्य मायां कृत्स्नां बिभीषण ॥ १ ॥

स हि ब्रह्मास्त्रविच्छूरो मायावी च महाबलः ।
जानामि लक्ष्मणस्यापि स्वरूपं मम सेवनम् ॥ २ ॥

ज्ञात्वैवासमहं तूष्णीं भविष्यत्कार्यगौरवात् ।
इत्युक्त्वा लक्ष्मणं प्राह रामो ज्ञानवतां वरः ॥ ३ ॥

गच्छ लक्ष्मण सैन्येन महता जहि रावणिम् ।
हनूमत्प्रमुखैः सर्वैर्यूथपैः सह लक्ष्मण ॥ ४ ॥

जाम्बवानृक्षराजोऽयं सह सैन्येन संवृतः ।
बिभीषणश्च सचिवैः सह त्वामभियास्यति ॥ ५ ॥

अभिज्ञस्तस्य देशस्य जानाति विवराणि सः ।
रामस्य वचनं श्रुत्वा लक्ष्मणः सबिभीषणः ॥ ६ ॥

श्रीमहादेव म्हणाले– हे पार्वती, बिभीषणाचे म्हणणे ऐकल्यावर श्रीराम म्हणाले, "अरे बिभीषणा, त्या महाभयंकर दैत्याची संपूर्ण माया मी जाणतो. (१)

तो मेघनाद ब्रह्मास्त्र जाणणारा, शूर, मायावी आणि महाबलशाली आहे. तसेच लक्ष्मणाचे स्वरूप आणि तो करीत असलेली माझी सेवा, हे दोन्हीही मला माहीत आहेत. (लक्ष्मणाने माझ्या सेवेसाठी निद्रा व आहार सोडले आहेत.) हे सगळे माहीत असूनही, भविष्य कालीन इंद्रजित वधाचे महत्त्वाचे कार्य लक्षात घेऊन मी त्याला खाण्यापिण्याचा किंवा झोप घेण्याचा आग्रह केला नव्हता." असे बोलून ज्ञानी माणसांतील श्रेष्ठ असे राम लक्ष्मणाला म्हणाले, 'अरे लक्ष्मणा, हनुमान इत्यादी वानर समूहांचे सर्व नायक आणि मोठी सेना यांना बरोबर घेऊन तू जा आणि मेघनादाला ठार कर. (२-४)

सर्व सैन्यासह हा अस्वलांचा राजा जांबवान आणि मंत्र्यांसह बिभीषण हे तुझ्याबरोबर येतील. (५)

बिभीषण तो प्रदेश जाणणारा आहे, तसेच तेथील लपून राहण्याच्या गुहा त्याला माहीत आहेत." रामांचे वचन ऐकल्यावर, लक्ष्मण हा बिभीषणासह जाण्यास तयार झाला. भयंकर पराक्रम असणाऱ्या लक्ष्मणाने आपले दुसरे एक

जग्राह कार्मुकं श्रेष्ठमन्यद्भीमपराक्रमः ।
रामपादाम्बुजं स्पृष्ट्वा हृष्टः सौमित्रिरब्रवीत् ॥ ७ ॥

अद्य मत्कार्मुकान्मुक्ताः शरा निर्भिद्य रावणिम् ।
गमिष्यन्ति हि पातालं स्नातुं भोगवतीजले ॥ ८ ॥

एवमुक्त्वा स सौमित्रिः परिक्रम्य प्रणम्य तम् ।
इन्द्रजिन्निधनाकाङ्क्षी ययौ त्वरितविक्रमः ॥ ९ ॥

वानरैर्बहुसाहस्रैर्हनूमान्पृष्ठतोऽन्वगात् ।
बिभीषणश्च सहितो मन्त्रिभिस्त्वरितं ययौ ॥ १० ॥

जाम्बवत्प्रमुखा ऋक्षाः सौमित्रिं त्वरयान्वयुः ।
गत्वा निकुम्भिलादेशं लक्ष्मणो वानरैः सह ॥ ११ ॥

अपश्यद्बलसङ्घातं दूराद्राक्षसकुलम् ।
धनुरायम्य सौमित्रिर्यत्तोऽभूद्भूरिविक्रमः ॥ १२ ॥

अङ्गदेन च वीरेण जाम्बवान् राक्षसाधिपः ।
तदा बिभीषणः प्राह सौमित्रिं पश्य राक्षसान् ॥ १३ ॥

यदेतद्राक्षसानीकं मेघश्यामं विलोक्यते ।
अस्यानीकस्य महतो भेदने यत्नवान् भव ॥ १४ ॥

राक्षसेन्द्रसुतोऽप्यस्मिन् भिन्ने हृश्यो भविष्यति ।
अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते ॥ १५ ॥

जहि वीर दुरात्मानं हिंसापरमधार्मिकम् ।
बिभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः ॥ १६ ॥

ववर्ष शरवर्षाणि राक्षसेन्द्रसुतं प्रति ।
पाषाणैः पर्वताग्रैश्च वृक्षैश्च हरियूथपाः ॥ १७ ॥

निर्जघ्नुः सर्वतो दैत्यांस्तेऽपि वानरयूथपान् ।
परश्वधैः शितैर्बाणैरसिभिर्यष्टितोमरैः ॥ १८ ॥

निर्जघ्नुर्वानरानीकं तदा शब्दो महानभूत् ।
स सम्प्रहारस्तुमुलः संजज्ञे हरिरक्षसाम् ॥ १९ ॥

उत्तम धनुष्य घेतले. नंतर रामांच्या पदकमलांना स्पर्श करून आनंदित होऊन लक्ष्मण म्हणाला. (६-७)

"आज माझ्या धनुष्यावरून सुटलेले हे बाण इंद्रजिताचे भेदन करून, पाताळातील भोगवती नदीच्या पाण्यात स्नान करण्यास जातील." (८)

अशा प्रकारे बोलून, लक्ष्मणाने रामांना प्रदक्षिणा घालून प्रणाम केला आणि इंद्रजिताच्या वधाच्या इच्छेने तो वेगाने निघाला. (९)

अनेक सहस्र वानरांबरोबर हनुमान लक्ष्मणाच्या मागोमाग चालू लागला. मंत्र्यांसह बिभीषणसुद्धा त्वरेने निघाला. (१०)

जांबवान इत्यादी अस्वलेसुद्धा त्वरेने लक्ष्मणाच्या मागोमाग निघाली. वानरांसह लक्ष्मण जेव्हा निकुंभिला प्रदेशात पोचला, तेव्हा राक्षसांची गर्दी त्याला दुरूनच दिसली. महापराक्रमी लक्ष्मण धनुष्य सज्ज करून तयार झाला. (११-१२)

वीर अंगदासह जांबवानसुद्धा तयार झाला. त्या वेळी राक्षसांचा अधिपती बिभीषण लक्ष्मणाला म्हणाला, "लक्ष्मणा, हे राक्षस बघ. (१३)

हे जे मेघाप्रमाणे काळे असे राक्षसांचे सैन्य दिसून येत आहे, त्या प्रचंड सैन्याचा नाश करण्याचा प्रयत्न कर. (१४)

हे सैन्य नष्ट झाल्यावर मगच मेघनाद तुला दिसू लागेल. जोपर्यंत मेघनादाने सुरू केलेले हवन पूर्ण झालेले नाही, तोपर्यंतच तू ताबडतोब त्याच्यावर चालून जा. (१५)

हे वीरा, हिंसापरायण, अधार्मिक, दुरात्मा अशा मेघनादाला तू त्वरेने ठार कर." हे बिभीषणाचे वचन ऐकल्यावर शुभ लक्षणे असणाऱ्या लक्ष्मणाने मेघनादावर बाणांचा वर्षाव केला. तर वानर समूहांच्या नायकांनी पाषाण, पर्वतशिखरे आणि वृक्ष यांनी दैत्यांवर सर्व बाजूंनी प्रहार केले. तेव्हा त्या राक्षसांनी सुद्धा परशू, तीक्ष्ण बाण, तलवारी आणि तोमर यांनी वानर-समूहांचे नायक व वानर सैन्य यांच्यावर हल्ला केला. त्या वेळी फार कोलाहल झाला. अशा प्रकारे वानर आणि राक्षस यांच्यामध्ये तुमुल युद्ध सुरु झाले. (१६-१९)

इन्द्रजित्स्वबलं सर्वमर्द्यमानं विलोक्य सः ।
निकुम्भिलां च होमं च त्यक्त्वा शीघ्रं विनिर्गतः ॥ २० ॥

रथमारुह्य सधनुः क्रोधेन महतागमत् ।
समाह्वयन् स सौमित्रिं युद्धाय रणमूर्धनि ॥ २१ ॥

सौमित्रे मेघनादोऽहं मया जीवन्न मोक्ष्यसे ।
तत्र दृष्ट्वा पितृव्यं स प्राह निष्ठुरभाषणम् ॥ २२ ॥

इहैव जातः संवृद्धः साक्षाद् भ्राता पितुर्मम ।
यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः ॥ २३ ॥

कथं द्रुह्यसि पुत्राय पापीयानसि दुर्मतिः ।
इत्युक्त्वा लक्ष्मणं दृष्ट्वा हनूमत्पृष्ठतः स्थितम् ॥ २४ ॥

उद्यदायुधनिस्त्रिंशे रथे महति संस्थितः ।
महाप्रमाणमुद्यम्य घोरं विस्फारयन्धनुः ॥ २५ ॥

अद्य वो मामका बाणाः प्राणान्पास्यन्ति वानराः ।
ततः शरं दाशरथिः सन्धायामित्रकर्षणः ॥ २६ ॥

ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ।
इन्द्रजिद्रक्तनयनो लक्ष्मणं समुदैक्षत ॥ २७ ॥

शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः ।
मुहूर्तमभवन्मूढः पुनः प्रत्याहृतेन्द्रियः ॥ २८ ॥

ददर्शावस्थितं वीरं वीरो दशरथात्मजम् ।
सोऽभिचक्राम सौमित्रिं क्रोधसंरक्तलोचनः ॥ २९ ॥

शरान्धनुषि सन्धाय लक्ष्मणं चेदमब्रवीत् ।
यदि ते प्रथमे युद्धे न दृष्टो मे पराक्रमः ॥ ३० ॥

अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ।
इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् ॥ ३१ ॥

दशभिश्च हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ।
ततः शरशतेनैव सम्प्रयुक्तेन वीर्यवान् ॥ ३२ ॥

आपले सर्व सैन्य सगळीकडून मारले जात आहे हे पाहून, इंद्रजित निकुंभिला आणि होमहवन सोडून सत्वर बाहेर आला. (२०)

अतिशय क्रोधाने धनुष्य घेऊन आणि रथावर आरूढ होऊन तो रणांगणात आला व युद्धासाठी लक्ष्मणाला आव्हान देत म्हणाला. (२१)

"अरे लक्ष्मणा, मी मेघनाद आहे. माझ्याकडून तू आता जिवंत सुटणार नाहीस." आणि तेथेच आपल्या चुलत्याला-बिभीषणाला पाहून तो निष्ठुर शब्द बोलला. (२२)

"अरे काका, तू इथेच लंकेमध्ये जन्मलास आणि वाढलास. तू माझ्या पित्याचा सख्खा भाऊ आहेस. परंतु आता मात्र तू स्वजनांना सोडून देऊन, शत्रूची सेवा पत्करलेली आहेस. (२३)

तुझ्या पुत्राप्रमाणेच असलेल्या माझा तू कसा बरे द्रोह करीत आहेस ? तू पापी आणि दुष्ट बुद्धीचा आहेस." बिभीषणाला असे बोलून हनुमानाच्या खांद्यावर बसलेल्या लक्ष्मणाला त्याने पाहिले. (२४)

तेव्हा अनेक आयुधे आणि तलवारी सज्ज करून ठेवलेल्या रथात बसलेल्या मेघनादाने प्रचंड आकाराचे एक धनुष्य उचलून त्याचा भयंकर टणत्कार करून तो म्हणाला, "अरे वानरांनो, आज माझे बाण तुमच्या प्राणांचे प्राशन करतील." त्या वेळी रागाने फूत्कार टाकणाऱ्या सापाप्रमाणे असणाऱ्या आणि शत्रूचे दमन करणाऱ्या लक्ष्मणाने धनुष्यावर बाणाचे संधान करून, तो राक्षसश्रेष्ठ इंद्रजितावर सोडला. तेव्हा रागाने डोळे लाल झालेल्या इंद्रजिताने लक्ष्मणाकडे पाहिले. (२५-२७)

लक्ष्मणाने सोडलेल्या आणि इंद्राच्या वज्राप्रमाणे कठीण असणाऱ्या बाणांचा प्रहार होताच, इंद्रजित एक क्षणभर मूर्च्छित पडला, पण तो पुनः शुद्धीवर आला. (२८)

वीर लक्ष्मण आपणापुढे उभा ठाकला आहे, असे त्या वीर इंद्रजिताला दिसले. तेव्हा रागाने डोळे लाल झालेला इंद्रजित लक्ष्मणावर धावून गेला. (२९)

आणि धनुष्याला बाण जोडून तो लक्ष्मणाला म्हणाला, "जरी पहिल्या युद्धात तुला दिसला नाही, तरी आत्ता मी तुला माझा पराक्रम दाखवतो. माझ्यापुढे तू आता नीट उभा राहा." असे सांगून त्याने सात बाणांनी

क्रोधद्विगुणसंरब्धो निर्बिभेद बिभीषणम् ।
लक्ष्मणोऽपि तथा शत्रुं शरवर्षैरवाकिरत् ॥ ३३ ॥

तस्य बाणैः सुसंविद्धं कवचं काञ्चनप्रभम् ।
व्यशीर्यत रथोपस्थे तिलशः पतितं भुवि ॥ ३४ ॥

ततः शरसहस्रेण सङ्क्रुद्धो रावणात्मजः ।
बिभेद समरे वीरं लक्ष्मणं भीमविक्रमम् ॥ ३५ ॥

व्यशीर्यतापतद्दिव्यं कवचं लक्ष्मणस्य च ।
कृतप्रतिकृतान्योन्यं बभूवतुरभिद्रुतौ ॥ ३६ ॥

अभीक्ष्णं निःश्वसन्तौ तौ युध्येतां तुमुलं पुनः ।
शरसंवृतसर्वाङ्गौ सर्वतो रुधिरोक्षितौ ॥ ३७ ॥

सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः ।
अयुध्येतां महासत्त्वौ जयाजयविवर्जितौ ॥ ३८ ॥

एतस्मिन्नन्तरे वीरो लक्ष्मणः पञ्चभिः शरैः ।
रावणेः सारथिं साश्वं रथं च समचूर्णयत् ॥ ३९ ॥

चिच्छेद कार्मुकं तस्य दर्शयन्हस्तलाघवम् ।
सोऽन्यत्तु कार्मुकं भद्रं सज्यं चक्रे त्वरान्वितः ॥ ४० ॥

तच्चापमपि चिच्छेद लक्ष्मणस्त्रिभिराशुगैः ।
तमेव छिन्नधन्वानं विव्याधानेकसायकैः ॥ ४१ ॥

पुनरन्यत्समादाय कार्मुकं भीमविक्रमः ।
इन्द्रजिल्लक्ष्मणं बाणैः शितैरादित्यसन्निभैः ॥ ४२ ॥

बिभेद वानरान्सर्वान्बाणैरापूरयन्दिशः ।
तत ऐन्द्रं समादाय लक्ष्मणो रावणिं प्रति ॥ ४३ ॥

सन्धायाकृष्य कर्णान्तं कार्मुकं दृढनिष्ठुरम् ।
उवाच लक्ष्मणो वीरः स्मरन् रामपदाम्बुजम् ॥ ४४ ॥

लक्ष्मणाला विद्ध केले, तसेच तीक्ष्ण धार असणाऱ्या दहा उत्तम बाणांनी त्याने हनुमानाला विद्ध केले. त्यानंतर वीर्यशाली आणि रागाने ज्याचा उत्साह द्विगुणित झाला होता, अशा इंद्रजिताने अचूक सोडलेल्या शंभर बाणांनी बिभीषणाला विद्ध केले. लक्ष्मणानेसुद्धा त्याचप्रकारे शत्रूवर बाणांचा वर्षाव केला. (३०-३३)

सोन्याप्रमाणे चमकणारे इंद्रजिताचे चिलखत लक्ष्मणाच्या बाणांनी चांगलेच विद्ध झाल्यामुळे ते फुटले आणि त्याचे तिळाएवढे तुकडे होऊन ते रथाच्या मागील भागात पडून तेथून जमिनीवर पडले. (३४)

तेव्हा क्रुद्ध झालेल्या इंद्रजिताने भयंकर पराक्रमी, वीर अशा लक्ष्मणाला युद्धामध्ये हजारो बाणांनी विद्ध केले. त्यामुळे लक्ष्मणाचे दिव्य कवचही फुटले आणि ते खाली पडले. अशा प्रकारे परस्परांचा प्रतिकार करीत ते दोघे एकमेकावर धावून जाऊन लढू लागले. (३५-३६)

आणि वारंवार निःश्वास टाकणाऱ्या त्या दोघांचे पुनः तुंबळ युद्ध झाले. दोघांची सर्व अंगे सर्व बाजूंनी बाणांनी झाकली गेली आणि ते दोघेही रक्तात न्हाऊन गेले. (३७)

ते दोघे महापराक्रमी वीर दीर्घ काळपर्यंत एकमेकांवर तीक्ष्ण बाण टाकून लढत राहिले. पण कुणाचाही जय अथवा पराजय झाला नाही. (३८)

दरम्यानच्या काळात वीर लक्ष्मणाने पाच बाणांनी इंद्रजिताचा सारथी आणि घोड्यासहित रथ, यांचे चूर्ण करून टाकले. (३९)

आणि आपल्या हाताची चलाखी दाखवीत लक्ष्मणाने त्याचे धनुष्य तोडून टाकले. तेव्हा मेघनादाने दुसरे एक उत्तम धनुष्य त्वरेने सज्ज केले. (४०)

ते धनुष्यसुद्धा लक्ष्मणाने तीन बाणांनी तोडून टाकले आणि ज्याचे धनुष्य तुटले होते अशा मेघनादाला सुद्धा अनेक बाणांनी विद्ध केले. (४१)

तेव्हा पुनः दुसरे नवीन धनुष्य घेऊन, सूर्याप्रमाणे चमकणाऱ्या धारदार बाणांनी, प्रचंड पराक्रम असणाऱ्या इंद्रजिताने लक्ष्मणाला विद्ध केले. तसेच बाणांनी दिशा भरून टाकीत त्याने वानरांनाही विद्ध केले. तेव्हा ऐंद्र बाण धनुष्यावर चढवून व तो इंद्रजितावर रोखून, अतिशय बळकट अशा आपल्या धनुष्याची दोरी त्याने कानापर्यंत ओढली आणि रामांच्या चरणकमळांचे स्मरण करीत वीर लक्ष्मण म्हणाला. (४२-४४)

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।
त्रिलोक्यामप्रतिद्वन्द्वस्तदेनं जहि रावणिम् ॥ ४५ ॥

इत्युक्त्वा बाणमाकर्णाद्विकृष्य तमजिह्मगम् ।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥ ४६ ॥

स शरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् ।
प्रमथ्येन्द्रजितः कायात्पातयामास भूतले ॥ ४७ ॥

ततः प्रमुदिता देवाः कीर्तयन्तो रघूत्तमम् ।
ववर्षुः पुष्पवर्षाणि स्तुवन्तश्च मुहुर्मुहुः ॥ ४८ ॥

जहर्ष शक्रो भगवान्सह देवैर्महर्षिभिः ।
आकाशेऽपि च देवानां शुश्रुवे दुन्दुभिस्वनः ॥ ४९ ॥

विमलं गगनं चासीत्स्थिराभूद्विश्वधारिणी ।
निहतं रावणिं दृष्ट्वा जयजल्पसमन्वितः ॥ ५० ॥

गतश्रमः स सौमित्रिः शङ्खमापूरयद्रणे ।
सिंहनादं ततः कृत्वा ज्याशब्दमकरोद्विभुः ॥ ५१ ॥

तेन नादेन संहृष्टा वानराश्च गतश्रमाः ।
वानरेन्द्रैश्च सहितः स्तुवद्भिर्हृष्टमानसैः ॥ ५२ ॥

लक्ष्मणः परितुष्टात्मा ददर्शाभ्येत्य राघवम् ।
हनूमद्राक्षसाभ्यां च सहितो विनयान्वितः ॥ ५३ ॥

ववन्दे भ्रातरं रामं ज्येष्ठं नारायणं विभुम् ।
त्वत्प्रसादाद्रघुश्रेष्ठ हतो रावणिराहवे ॥ ५४ ॥

श्रुत्वा तल्लक्ष्मणाद्वक्त्रा तमालिङ्ग्य रघूत्तमः ।
मूर्ध्न्यवघ्राय मुदितः सस्नेहमिदमब्रवीत् ॥ ५५ ॥

साधु लक्ष्मण तुष्टोऽस्मि कर्म ते दुष्करं कृतम् ।
मेघनादस्य निधने जितं सर्वमरिन्दम ॥ ५६ ॥

"जर दशरथपुत्र राम धर्मात्मा, सत्यप्रतिज्ञ आणि तिन्ही लोकात प्रतिद्वंद्वीरहित वीर असेल, तर हे बाणा, तू या रावणपुत्र इंद्रजिताला ठार कर." (४५)

असे बोलून, तो सरळ लक्ष्याचा वेध घेणारा बाण कानापर्यंत ओढून, वीर लक्ष्मणाने इंद्रजितावर सोडला. (४६)

ज्यावर चमचमणारी कांतिमान कुंडले होती, असे इंद्रजिताचे शोभिवंत मस्तक शिरस्त्राणासह धडापासून वेगळे करून, त्या बाणाने ते जमिनीवर पाडले. (४७)

तेव्हा आनंदित झालेले देव हे रघूत्तम लक्ष्मणाचे गुणगान करीत आणि वारंवार त्याची स्तुती करीत, त्याच्यावर पुष्पवृष्टी करू लागले. (४८)

देव आणि महर्षी यांच्यासह भगवान इंद्र अतिशय हर्षित झाला आणि आकाशातसुद्धा देवांच्या दुंदुभींचा निनाद ऐकू येऊ लागला. (४९)

इंद्रजित मारला गेला, हे पाहून आकाश स्वच्छ झाले, जगाला धारण करणारी पृथ्वी स्थिर झाली आणि सर्वत्र जयजयकार होऊ लागला. (५०)

श्रम दूर झाल्यावर लक्ष्मणाने शंख फुंकून त्या नादाने रणांगण भरून टाकले आणि त्यानंतर सिंहाप्रमाणे गर्जना करून, त्या प्रभू लक्ष्मणाने धनुष्याच्या दोरीचा टणत्कार केला. (५१)

त्या नादाने वानर अतिशय हृष्ट झाले आणि त्यांचे श्रमही दूर झाले. त्यानंतर ज्यांची मने आनंदित झाली होती आणि जे लक्ष्मणाची स्तुती करीत होते अशा वानर श्रेष्ठांसह तसेच हनुमान व बिभीषण यांना बरोबर घेऊन, अतिशय संतुष्ट झालेल्या लक्ष्मणाने रामांजवळ जाऊन त्यांचे दर्शन घेतले आणि मग त्याने विनयपूर्वक साक्षात प्रभू नारायणस्वरूप आपल्या श्रीराम या ज्येष्ठ भावाला वंदन केले आणि म्हटले, "हे रघुश्रेष्ठा, केवळ तुमच्या कृपाप्रसादामुळे इंद्रजित युद्धात ठार झाला." (५२-५४)

लक्ष्मणाने भक्तिपूर्वक उच्चारलेले ते वाक्य ऐकून आनंदित झालेल्या रघूत्तमांनी त्याला आलिंगन दिले, त्याच्या मस्तकाचे अवघ्राण केले आणि प्रेमपूर्वक म्हटले. (५५)

"हे लक्ष्मणा, छान ! छान ! उत्तम ! मी तुझ्यावर संतुष्ट झालो आहे. तू फार दुष्कर असे कर्म केले आहेस. मेघनादाचे निधन झाल्यामुळे, हे शत्रुमर्दना, आपण जणू काही सर्व जिकले आहे. (५६)

अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद्विनिपातितः ।
निःसपत्नः कृतोऽस्म्यद्य निर्यास्यति हि रावणः ॥ ५७ ॥

पुत्रशोकान्मया योद्धुं तं हनिष्यामि रावणम् ॥ ५८ ॥

मेघनादं हतं श्रुत्वा लक्ष्मणेन महाबलम् ।
रावणः पतितो भूमौ मूर्च्छितः पुनरुत्थितः ।
विललापातिदीनात्मा पुत्रशोकेन रावणः ॥ ५९ ॥

पुत्रस्य गुणकर्माणि संस्मरन्पर्यदेवयत् ।
अद्य देवगणाः सर्वे लोकपाला महर्षयः ॥ ६० ॥

हतमिन्द्रजितं ज्ञात्वा सुखं स्वप्स्यन्ति निर्भयाः ।
इत्यादि बहुशः पुत्रलालसो विललाप ह ॥ ६१ ॥

ततः परमसंक्रुद्धो रावणो राक्षसाधिपः ।
उवाच राक्षसान्सर्वान्निनाशयिषुराहवे ॥ ६२ ॥

स पुत्रवधसन्तप्तः शूरः क्रोधवशं गतः ।
संवीक्ष्य रावणो बुद्ध्या हन्तुं सीतां प्रदुद्रुवे ॥ ६३ ॥

खड्गपाणिमथायान्तं क्रुद्धं दृष्ट्वा दशाननम् ।
राक्षसीमध्यगा सीता भयशोकाकुलाभवत् ॥ ६४ ॥

एतस्मिन्नन्तरे तस्य सचिवो बुद्धिमान् शुचिः ।
सुपार्श्वो नाम मेधावी रावणं वाक्यमब्रवीत् ॥ ६५ ॥

ननु नाम दशग्रीव साक्षाद्वैश्रवणानुजः ।
वेदविद्याव्रतस्नातः स्वकर्मपरिनिष्ठितः ॥ ६६ ॥

अनेकगुणसम्पन्नः कथं स्त्रीवधमिच्छसि ।
अस्माभिः सहितो युद्धे हत्वा रामं च लक्ष्मणम् ।
प्राप्स्यसे जानकीं शीघ्रमित्युक्तः स न्यवर्तत ॥ ६७ ॥

तीन दिवस आणि तीन रात्री युद्ध करून तू कसे का होईना त्या वीर मेघनादाला ठार केले आहेस, त्यामुळे आज तू मला शत्रुरहित केले आहेस. आता पुत्राच्या शोकामुळे व्याकूळ झालेला रावण माझ्याशी युद्ध करण्यास नक्कीच लंकेतून बाहेर येईल. तेव्हा मी त्या रावणाचा वध करीन." (५७-५८)

इकडे लक्ष्मणाकडून महाबलवान मेघनाद मारला गेला, हे ऐकल्यावर रावण मूर्च्छित होऊन जमिनीवर पडला. त्यानंतर शुद्धीवर येऊन तो पुन: उठला आणि पुत्र शोकाने त्यांचे मन अतिशय दीन झाल्यामुळे, तो विलाप करू लागला. (५९)

आपल्या पुत्राचे गुण आणि कर्मे आठवून तो शोक करीत म्हणाला, " इंद्रजित मारला गेला, हे कळल्यावर आज देवांचे सर्व समूह, सर्व लोकपाल आणि सर्व महर्षी भयरहित होऊन सुखाने झोपतील." अशा प्रकारे नाना पद्धतींनी त्या रावणाने पुत्रावरील प्रेमामुळे पुष्कळ विलाप केला. (६०-६१)

त्यानंतर राक्षसांचा राजा रावण अतिशय क्रुद्ध झाला आणि त्याने युद्धामध्ये जणू सर्व राक्षसांचा नाश करण्याच्या इच्छेने त्यांना युद्धाला जाण्याची आज्ञा दिली. त्यानंतर पुत्राच्या वधाने संतप्त झालेल्या आणि क्रोधाच्या आहारी गेलेल्या त्या शूर रावणाने स्वत:च्या बुद्धीने काहीसा विचार केला आणि सीतेचा वध करण्यास तो धावत निघाला . (६२-६३)

रागावलेला रावण हातात खड्ग घेऊन आपल्याकडे येत आहे, हे पाहून राक्षसींच्या वेढ्यात बसलेली सीता भयभीत आणि शोकाकुल झाली. (६४)

तितक्यात त्या रावणाचा एक बुद्धिमान, शुद्ध आचरणाचा, आणि विचारी सुपार्श्व नावाचा सचिव रावणाला म्हणाला. (६५)

"हे रावणा, खरोखर तुम्ही साक्षात कुबेराचे धाकटे भाऊ आहात, वेदविद्येचे व्रत तुम्ही घेतले आहे. स्वधर्म आचरण्यात पटाईत आहात. शिवाय अनेक गुणांनी संपन्न आहात. अशा स्थितीत तुम्हांला एका स्त्रीचा वध करण्याची इच्छा कशी बरे झाली ? आम्हा सर्वांना बरोबर घेऊन तुम्ही युद्धात राम व लक्ष्मण यांचा वध करा म्हणजे तुम्हांला सीता लगेच प्राप्त होईल." असे सुपार्श्वाने म्हटल्यावर, रावण परत फिरला. (६६-६७)

ततो दुरात्मा सुहृदा निवेदितं
वचः सुधर्म्यं प्रतिगृह्य रावणः ।
गृहं जगामाशु शुचा विमूढधीः
पुनः सभां च प्रययौ सुहृद्वृतः ॥ ६८ ॥

हितचिंतकाचे ते धर्मानुकूल वचन दुरात्म्या रावणाने मान्य केले. आणि तो चट्दिशी आपल्या राजवाड्यात परत गेला. नंतर शोकामुळे बुद्धी मूढ होऊन तो आपल्या सुहृदांसह पुनः राजसभेत गेला. (६८)

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे नवमः सर्गः ॥ ९ ॥

दशम सर्ग

रावणाच्या यज्ञाचा विध्वंस व त्याने मंदोदरीची समजूत घालणे

श्रीमहादेव उवाच

स विचार्य सभामध्ये राक्षसैः सह मन्त्रिभिः ।
निर्ययौ येऽवशिष्टास्तै राक्षसैः सह राघवम् ॥ १ ॥

शलभः शलभैर्युक्तः प्रज्वलन्तमिवानलम् ।
ततो रामेण निहताः सर्वे ते राक्षसा युधि ॥ २ ॥

श्रीमहादेव म्हणाले– हे पार्वती, सभेमध्ये राक्षस- मंत्र्यांबरोबर विचार करून, ज्या प्रमाणे एखादा पतंग अन्य पतंगासह पेटत्या अग्नीकडे धावतो, त्या प्रमाणे जे काही राक्षस उरले होते त्यांना बरोबर घेऊन रावण राघवांवर चालून गेला. तेव्हा रामांनी त्या सर्व राक्षसांचा वध केला. (१-२)

स्वयं रामेण निहतस्तीक्ष्णबाणेन वक्षसि ।
व्यथितस्त्वरितं लङ्कां प्रविवेश दशाननः ॥ ३ ॥

नंतर स्वतः रामांनी एका तीक्ष्ण बाणाने रावणाच्या वक्षःस्थळावर प्रहार केला असता, व्याकूळ झालेला रावण त्वरित पुनः लंकेमध्ये प्रविष्ट झाला. (३)

दृष्ट्वा रामस्य बहुशः पौरुषं चाप्यमानुषम् ।
रावणो मारुतेश्चैव शीघ्रं शुक्रान्तिकं ययौ ॥ ४ ॥

रामांचे आणि मारुतीचे फार मोठे अतिमानवी शौर्य पाहून, रावण त्वरित शुक्राचार्याचे जवळ गेला. (४)

नमस्कृत्य दशग्रीवः शुक्रं प्राञ्जलिरब्रवीत् ।
भगवन् राघवेणैवं लङ्का राक्षसयूथपैः ॥ ५ ॥

विनाशिता महादैत्या निहताः पुत्रबान्धवाः ।
कथं मे दुःखसन्दोहस्त्वयि तिष्ठति सद्गुरौ ॥ ६ ॥

शुक्राला नमस्कार करून व हात जोडून रावण त्याला म्हणाला, "हे भगवन, राघवाने अशा प्रकारे राक्षस समूहांच्या नायकांसह लंका नष्ट करून टाकली आहे आणि मोठमोठे दैत्य, माझे पुत्र व बांधव यांना ठार केले आहे. आपल्यासारखे सद्गुरू असताना, माझ्यावर हा दुःखांचा समूह कसा बरे कोसळला आहे ?" (५-६)

इति विज्ञापितो दैत्यगुरुः प्राह दशाननम् ।
होमं कुरु प्रयत्नेन रहसि त्वं दशानन ॥ ७ ॥

रावणाने असा प्रश्न केल्यावर दैत्यांचा गुरू शुक्र रावणाला म्हणाला, "हे रावणा, तू प्रयत्नपूर्वक एकांतात एक होम कर. (७)

यदि विघ्नो न चेद्धोमे तर्हि होमानलोत्थितः ॥ ८ ॥
महान् रथश्च वाहाश्च चापतूणीरसायकाः ।
सम्भविष्यन्ति तैर्युक्तस्त्वमजेयो भविष्यसि ॥ ९ ॥

जर तुझ्या होमात काही विघ्न आले नाही तर त्या होमाच्या अग्नीतून एक प्रचंड रथ, घोडे, धनुष्य, भाता आणि बाण उत्पन्न होतील. त्यांनी तू युक्त झालास, तर तू अजिंक्य होशील. (८-९)

गृहाण मन्त्रान्मद्दत्तान् गच्छ होमं कुरु द्रुतम् ।
इत्युक्तस्त्वरितं गत्वा रावणो राक्षसाधिपः ॥ १० ॥

गुहां पातालसदृशीं मन्दिरे स्वे चकार ह ।
लङ्काद्वारकपाटादि बद्ध्वा सर्वत्र यत्नतः ॥ ११ ॥

होमद्रव्याणि सम्पाद्य यान्युक्तान्याभिचारिके ।
गुहां प्रविश्य चैकान्ते मौनी होमं प्रचक्रमे ॥ १२ ॥

उत्थितं धूममालोक्य महान्तं रावणानुजः ।
रामाय दर्शयामास होमधूमं भयाकुलः ॥ १३ ॥

पश्य राम दशग्रीवो होमं कर्तुं समारभत् ।
यदि होमः समाप्तः स्यात्तदाजेयो भविष्यति ॥ १४ ॥

अतो विघ्नाय होमस्य प्रेषयाशु हरीश्वरान् ।
तथेति रामः सुग्रीवसम्मतेनाङ्गदं कपिम् ॥ १५ ॥

हनूमत्प्रमुखान्वीरानादिदेश महाबलान् ।
प्राकारं लङ्घयित्वा ते गत्वा रावणमन्दिरम् ॥ १६ ॥

दशकोट्यः प्लवङ्गानां गत्वा मन्दिररक्षकान् ।
चूर्णयामासुरश्वांश्च गजांश्च न्यहनन् क्षणात् ॥ १७ ॥

ततश्च सरमा नाम प्रभाते हस्तसंज्ञया ।
बिभीषणस्य भार्या सा होमस्थानमसूचयत् ॥ १८ ॥

गुहापिधानपाषाणमङ्गदः पादघट्टनैः ।
चूर्णयित्वा महासत्त्वः प्रविवेश महागुहाम् ॥ १९ ॥

दृष्ट्वा दशाननं तत्र मीलिताक्षं दृढासनम् ।
ततोऽङ्गदाज्ञया सर्वे वानरा विविशुर्द्रुतम् ॥ २० ॥

तत्र कोलाहलं चक्रुस्ताडयन्तश्च सेवकान् ।
सम्भारांश्चिक्षिपुस्तस्य होमकुण्डे समन्ततः ॥ २१ ॥

मी देतो ते मंत्र घे. जा आता. चट्दिशी होम कर." शुक्राने असे सांगितले असता, राक्षसराज रावण तेथून त्वरेने निघाला. (१०)

आपल्या महालात त्याने पातळासारखी एक गुहा तयार केली. नंतर प्रयत्नपूर्वक लंकेची सगळीकडची दारे, कवाडे इत्यादी बंद करून आणि अभिचार कर्मासाठी शास्त्रात सांगितलेली सर्व होम- द्रव्ये संपादन केली, मग गुहेत प्रवेश करून, मौन धारण करून, त्याने एकांतात होम करण्यास प्रारंभ केला. (११-१२)

त्या होमातून उठणारा तो प्रचंड धूर बिभीषणाने पाहिला. तेव्हा भयभीत होऊन त्याने तो रामांना दाखविला. (१३)

(आणि तो म्हणाला,) "हे रामा, पाहा, रावणाने होम करण्यास आरंभ केला आहे. हा होम जर निर्विघ्नपणे पूर्ण होईल, तर रावण अजेय होईल. (१४)

म्हणून रावणाच्या होमात विघ्न करण्यासाठी तुम्ही श्रेष्ठ वानरांना त्वरित पाठवून द्या. " "ठीक आहे " असे म्हणून सुग्रीवाच्या संमतीने रामांनी अंगद आणि हनुमान इत्यादी महाबलवान वानर वीर यांना आज्ञा केली. त्या प्रमाणे मग ते लंकेचा तट ओलांडून रावणाच्या महालाकडे गेले. (१५-१६)

दहा कोटी वानर तेथे गेले आणि त्यांनी महालाच्या रक्षकांचे चूर्ण केले आणि एका क्षणात त्यांनी घोडे व हत्ती यांनाही ठार केले. (१७)

त्यानंतर प्रातःकाल होताच, सरमा नावाच्या बिभीषणाच्या भार्येने हाताने खूण करून रावणाच्या होमाचे स्थान वानरांना दाखविले . (१८)

गुहेच्या तोंडावर ठेवलेल्या पाषाणाचे अंगदाने आपल्या पायाच्या प्रहारांनी चूर्ण केले आणि तो महापराक्रमी अंगद त्या प्रचंड गुहेत शिरला. (१९)

तेथे डोळे मिटून, दृढ आसन घालून बसलेल्या रावणाला पाहिल्यानंतर अंगदाच्या आज्ञेने सर्व वानर चट्दिशी गुहेत शिरले. (२०)

गुहेत उपस्थित असणाऱ्या सेवकांना बदडून काढीत वानरांनी कोलाहल केला आणि इकडे तिकडे असलेली होमाची द्रव्य-सामग्री त्यांनी त्या होमकुंडात फेकून दिली. (२१)

स्रुवमाच्छिद्य हस्ताच्च रावणस्य बलाद्वृषा ।
तेनैव सञ्जघानाशु हनूमान् प्लवगाग्रणीः ॥ २२ ॥

घ्नन्ति दन्तैश्च काष्ठैश्च वानरास्तमितस्ततः ।
न जहौ रावणो ध्यानं हतोऽपि विजिगीषया ॥ २३ ॥

प्रविश्यान्तःपुरे वेश्मन्यङ्गदो वेगवत्तरः ।
समानयत्केशबन्धे धृत्वा मन्दोदरीं शुभाम् ॥ २४ ॥

रावणस्यैव पुरतो विलपन्तीमनाथवत् ।
विददाराङ्गदस्तस्याः कञ्चुकं रत्नभूषितम् ॥ २५ ॥

मुक्ता विमुक्ताः पतिताः समन्ताद्रत्नसञ्चयैः ।
श्रोणिसूत्रं निपतितं त्रुटितं रत्नचित्रितम् ॥ २६ ॥

कटिप्रदेशाद्विस्रस्ता नीवी तस्यैव पश्यतः ।
भूषणानि च सर्वाणि पतितानि समन्ततः ॥ २७ ॥

देवगन्धर्वकन्याश्च नीता हृष्टैः प्लवङ्गमैः ।
मन्दोदरी रुरोदाथ रावणस्याग्रतो भृशम् ॥ २८ ॥

क्रोशन्ती करुणं दीना जगाद दशकन्धरम् ।
निर्लज्जोऽसि परैरेवं केशपाशे विकृष्यते ॥ २९ ॥

भार्या तवैव पुरतः किं जुहोषि न लज्जसे ।
हन्यते पश्यतो यस्य भार्या पापैश्च शत्रुभिः ॥ ३० ॥

मर्तव्यं तेन तत्रैव जीवितान्मरणं वरम् ।
हा मेघनाद ते माता क्लिश्यते बत वानरैः ॥ ३१ ॥

त्वयि जीवति मे दुःखमीदृशं च कथं भवेत् ।
भार्या लज्जा च सन्त्यक्ता भर्त्रा मे जीविताशया ॥ ३२ ॥

रागावलेल्या वानराग्रणी हनुमानाने बळजबरीने रावणाच्या हातातून स्रुवा हिसकावून घेतली आणि तिनेच तो रावणाला मारू लागला. (२२)

इकडून तिकडून सर्व बाजूंनी वानर आपल्या दातांनी रावणाला चावू लागले आणि लाकडांनी त्याला चोपू लागले. तथापि शत्रूवर विजय मिळविण्याच्या इच्छेमुळे असा मार बसला, तरी रावणाने आपले ध्यान सोडले नाही. (२३)

इकडे अंगद अतिशय वेगाने (रावणाच्या) अंतःपुरातील महालात शिरला आणि शुभलक्षणा मंदोदरीची वेणी पकडून तो तिला त्या गुहेत घेऊन आला. (२४)

रावणाच्या पुढेच ती मंदोदरी अनाथ स्त्री असल्याप्रमाणे विलाप करू लागली, तेव्हा अंगदाने रत्नाने भूषित अशी तिची चोळी फाडली. (२५)

त्या चोळीवरील तुटलेले मोती रत्नांच्या समूहांसह इतस्ततः गळून पडले. तसेच तिचा रत्नखचित कंबरपट्टा सुद्धा तुटून खाली पडला. (२६)

रावण पाहात असतांनाच, तिच्या साडीची निरी ढिली होऊन ती कटिप्रदेशावरून खाली घसरली. आणि तिचे सर्व अलंकार सगळीकडे विखरून पडले. (२७)

आनंदित झालेल्या वानरांनी रावणाच्या भार्या असणाऱ्या किंवा त्याच्या बंदीत असणाऱ्या देव आणि गंधर्व यांच्या कन्यांनाही गुहेत नेले. तेव्हा रावणाच्यापुढे मंदोदरी मोठ्यांदा रडू लागली. (२८)

दीन होऊन करुण स्वरात आक्रोश करीत मंदोदरी रावणाला म्हणाली, "तुम्ही अगदी निर्लज्ज आहात. तुमचीच बायको तुमच्याच पुढे परक्याकडून वेणी धरून खेचली जात आहे. तरीसुद्धा तुम्ही कसे बरे होम करीत बसला आहात? तुम्हांला लाज कशी वाटत नाही ? डोळ्यांदेखत ज्याची पत्नी पापी शत्रूकडून त्रस्त केली जाते, त्याने तेथेच तत्काळ मरून जावयास हवे. जगण्यापेक्षा मरण हेच त्याला अधिक चांगले आहे. हाय रे मेघनादा, अरेरे, तुझी ही आई वानरांकडून क्लेश भोगीत आहे. (२९-३१)

अरे पुत्रा, तू जिवंत असतास तर मला असले दुःख कसे बरे झाले असते ? स्वतःचे जीवन रक्षण करण्यासाठी माझ्या पतीने आपली भार्या आणि आपली लज्जा, हे दोन्हीही सोडून दिले आहेत." (३२)

श्रुत्वा तद्देवितं राजा मन्दोदर्या दशाननः ।
उत्तस्थौ खड्गमादाय त्यज देवीमिति ब्रुवन् ॥ ३३ ॥

जघानाङ्गदमव्यग्रः कटिदेशे दशाननः ।
तदोत्सृज्य ययुः सर्वे विध्वंस्य हवनं महत् ॥ ३४ ॥

रामपार्श्वमुपागम्य तस्थुः सर्वे प्रहर्षिताः ॥ ३५ ॥

रावणस्तु ततो भार्यामुवाच परिसान्त्वयन् ।
दैवाधीनमिदं भद्रे जीवता किं न दृश्यते ।
त्यज शोकं विशालाक्षि ज्ञानमालम्ब्य निश्चितम् ॥ ३६ ॥

अज्ञानप्रभवः शोकः शोको ज्ञानविनाशकृत् ।
अज्ञानप्रभवाहन्धीः शरीरादिष्वनात्मसु ॥ ३७ ॥

तन्मूलः पुत्रदारादिसम्बन्धः संसृतिस्ततः ।
हर्षशोकभयक्रोधलोभमोहस्पृहादयः ॥ ३८ ॥

अज्ञानप्रभवा ह्येते जन्ममृत्युजरादयः ।
आत्मा तु केवलं शुद्धो व्यतिरिक्तो ह्यलेपकः ॥ ३९ ॥

आनन्दरूपो ज्ञानात्मा सर्वभावविवर्जितः ।
न संयोगो वियोगो वा विद्यते केनचित्सतः ॥ ४० ॥

एवं ज्ञात्वा स्वमात्मानं त्यज शोकमनिन्दिते ।
इदानीमेव गच्छामि हत्वा रामं सलक्ष्मणम् ॥ ४१ ॥

आगमिष्यामि नोचेन्मां दारयिष्यति सायकैः ।
श्रीरामो वज्रकल्पैश्च ततो गच्छामि तत्पदम् ॥ ४२ ॥

तदा त्वया मे कर्तव्या क्रिया मच्छासनात्प्रिये ।
सीतां हत्वा मया सार्धं त्वं प्रवेक्ष्यसि पावकम् ॥ ४३ ॥

एवं श्रुत्वा वचस्तस्य रावणस्यातिदुःखिता ।
उवाच नाथ मे वाक्यं शृणु सत्यं तथा कुरु ॥ ४४ ॥

मंदोदरीचा तो दुःखमय विलाप ऐकून राजा रावण खड्ग घेऊन उभा राहिला आणि " अरे, सोड माझ्या राणीला." असे म्हणत त्याने नेमका अंगदाच्या कटिप्रदेशावर प्रहार केला. तेव्हा तेथे असणाऱ्या विपुल हवन-सामुग्रीचा विध्वंस करून, सगळे वानर ते स्थान सोडून निघून गेले. (३३-३४)

आणि अतिशय आनंदित झालेले ते वानर रामांजवळ येऊन उभे राहिले. (३५)

त्यानंतर आपल्या भार्येचे सांत्वन करीत रावण तिला म्हणाला, "हे कल्याणी, हे जे सर्व काही घडले ते दैवाच्या अधीन होते. जिवंत असणाऱ्या प्राण्याला या जगात काय काय पाहावे लागत नाही ? विशालनयने, हे सत्य जाणून घेऊन तू शोक करणे सोडून दे. (३६)

अज्ञानामुळे शोक उत्पन्न होतो. शोक हा ज्ञानाचा नाश करणारा आहे. शरीर इत्यादी जड पदार्थांवर 'मी 'अशी बुद्धी अज्ञानानेच निर्माण होते. (३७)

त्या अहंकारामुळेच पुत्र, पत्नी इत्यादींचा संबंध तसेच त्यापासूनच संसार उत्पन्न होतो. हर्ष, शोक, भय, क्रोध, लोभ, मोह, स्पृहा इत्यादी तसेच हे जन्म, मृत्यू, जरा इत्यादी अज्ञानापासूनच उत्पन्न होतात. याउलट आत्मा हा या सर्वांपेक्षा वेगळा, एकमात्र, शुद्ध, अलिप्त लेपरहित, आनंदरूप, ज्ञानस्वरूप, आणि सर्व भावांनी रहित असा आहे; सत्-अस्तित्व हे स्वरूप असणाऱ्या आत्म्याचा कुणाशीही, कशाशीही संयोग अगर वियोग होत नाही. (३८-४०)

हे प्रिये, स्वतःच्या आत्म्याचे असे स्वरूप जाणून तू शोक करणे सोडून दे. हा मी लगेच जातो आणि लक्ष्मणासह रामाला ठार करून परत येतो. असे घडले नाही तर तो श्रीराम आपल्या वज्रासारख्या बाणांनी मला छिन्न भिन्न करील. तसे घडले तर मी त्या रामाच्या पदी जाईन. (४१-४२)

हे प्रिये, त्या वेळी तू माझ्या आज्ञेने एक काम कर. सीतेला ठार करून माझ्या मृतदेहाबरोबर तू अग्नीमध्ये प्रवेश कर." (४३)

रावणाचे अशा प्रकारे बोलणे ऐकल्यावर अतिशय दुःखी झालेली ती मंदोदरी म्हणाली, "हे नाथा, मी तुम्हांला खरे सांगते, ते ऐका. आणि मग हवे ते करा. (४४)

शक्यो न राघवो जेतुं त्वया चान्यैः कदाचन ।
रामो देववरः साक्षात्प्रधानपुरुषेश्वरः ॥ ४५ ॥

मत्स्यो भूत्वा पुरा कल्पे मनुं वैवस्वतं प्रभुः ।
रक्ष सकलापद्भ्यो राघवो भक्तवत्सलः ॥ ४६ ॥

रामः कूर्मोऽभवत्पूर्वं लक्षयोजनविस्तृतः ।
समुद्रमथने पृष्ठे दधार कनकाचलम् ॥ ४७ ॥

हिरण्याक्षोऽतिदुर्वृत्तो हतोऽनेन महात्मना ।
क्रोडरूपेण वपुषा क्षोणीमुद्धरता क्वचित् ॥ ४८ ॥

त्रिलोककण्टकं दैत्यं हिरण्यकशिपुं पुरा ।
हतवान्नारसिंहेन वपुषा रघुनन्दनः ॥ ४९ ॥

विक्रमैस्त्रिभिरेवासौ बलिं बद्ध्वा जगत्त्रयम् ।
आक्रम्यादात्सुरेन्द्राय भृत्याय रघुसत्तमः ॥ ५० ॥

राक्षसाः क्षत्रियाकारा जाता भूमेर्भरावहाः ।
तान्हत्वा बहुशो रामो भुवं जित्वा ह्यदान्मुनेः ॥ ५१ ॥

स एव साम्प्रतं जातो रघुवंशे परात्परः ।
भवदर्थे रघुश्रेष्ठो मानुषत्वमुपागतः ॥ ५२ ॥

तस्य भार्या किमर्थं वा हता सीता वनाद्बलात् ।
मम पुत्रविनाशार्थं स्वस्यापि निधनाय च ॥ ५३ ॥

इतः परं वा वैदेहीं प्रेषयस्व रघूत्तमे ।
बिभीषणाय राज्यं तु दत्त्वा गच्छामहे वनम् ॥ ५४ ॥

मन्दोदरीवचः श्रुत्वा रावणो वाक्यमब्रवीत् ।
कथं भद्रे रणे पुत्रान् भातॄन् राक्षसमण्डलम् ॥ ५५ ॥

घातयित्वा राघवेण जीवामि वनगोचरः ।
रामेण सह योत्स्यामि रामबाणैः सुशीघ्रगैः ॥ ५६ ॥

तुमच्याकडून अगर अन्य कुणाकडून रामाला जिंकले जाणे, हे कधीही शक्य होणार नाही. कारण देवाधिदेव राम हे साक्षात प्रकृती आणि पुरुष यांचे स्वामी आहेत. (४५)

पूर्वीच्या कल्पात मत्स्य होऊन भक्तवत्सल प्रभू राघवांनी सर्व संकटातून वैवस्वत मनूचे रक्षण केले होते. (४६)

पूर्वी राम हे एक लक्ष योजने विस्तार असणारे कूर्म झाले होते. आणि समुद्र मंथनाचे वेळी त्यांनी आपल्या पाठीवर सुमेरू या सुवर्णपर्वताला धारण केले होते. (४७)

एकादा वराहाचे रूप धारण करून पृथ्वीला वर उचलून काढताना याच महात्म्या रामांनी अती दुराचारी हिरण्याक्षाला ठार केले होते. (४८)

पूर्वी नरसिंहाचे शरीर धारण करून रामांनी त्रैलोक्याला त्रासदायक झालेल्या हिरण्यकशिपू दैत्याचा वध केला होता. (४९)

वामन अवतारात बळीला बांधून आणि तीन पावलांनी तिन्ही लोक व्यापून याच रामांनी आपला सेवक जो इंद्र त्याला राज्य दिले होते. (५०)

एके काळी क्षत्रियांच्या स्वरूपात जन्माला आलेले राक्षस हे भूमीला भारभूत झाले, तेव्हा रामांनी परशुरामाचे रूप धारण करून त्या क्षत्रियांना अनेक वेळा नष्ट केले आणि पृथ्वी जिंकून ती त्यांनी कश्यप नावाच्या मुनींना देऊन टाकली. (५१)

तेच परात्पर परमात्मा सध्या रघुवंशामध्ये उत्पन्न झाले आहेत. तुमच्यासाठी त्या रघुश्रेष्ठांनी मानवाचे रूप धारण केले आहे. (५२)

माझ्या पुत्रांच्या नाशासाठी आणि तुमच्या स्वतःच्या मरणासाठी, तुम्ही त्या रामांची भार्या सीता वनातून बळजबरीने कशासाठी बरे अपहरण करून आणलीत? (५३)

आता तरी वैदेहीला रामांकडे परत पाठवा आणि बिभीषणाला राज्य देऊन आपण वनात जाऊ." (५४)

मंदोदरीचे वचन ऐकल्यावर रावण म्हणाला, "अग भद्रे, युद्धामध्ये पुत्र, भाऊ व राक्षस यांचा वध राघवांकडून झाल्यावर मी वनात जाऊन कसा बरे जिवंत राहू? आता मी रामांबरोबर युद्ध करणारच आणि रामांच्या शीघ्रगामी बाणांनी मी विदीर्ण होऊन मरून गेल्यावर विष्णूच्या परमपदाला जाईन. राघव हे विष्णू आहेत आणि जानकी या लक्ष्मी आहेत हे मला नक्की माहीत आहे. आणि ते माहीत असल्यामुळेच, रामांच्या हातून मरण